पदार्थतत्त्वनिरूपणम् ।

तार्किकशिरोमणिश्रीरघुनाथविरचितम् ।

श्रीरघुदेवन्यायालङ्कारविरचितया टीकया श्रीराम-
भद्रसार्वभौमविरचितया पदार्थतत्त्वविवेचनप्रका-
शाभिधया टीकया च समन्वितम् ।

वाराणसीस्थराजकीयसंस्कृतपाठशालीयपुस्तकालयाध्यक्षेण
पण्डितविन्ध्येश्वरीप्रसादद्विवेदिना परिशोधितम् ।

—:o:—

(PADÂRTHATATTVANIRÛPAṆA)

BY

RAGUNÂTHA S'IROMANI

With the commentaries of Raghudeva, and Râmabhadra Sârbbhauma

Edited by Pandit Vindhyeswari Prasâda Dvivedin, Librarian, Govt. Sanskrit College, Benares.



BENARES:
Printed by Ambikacharan Chakravarti at the Mahamandal Press & published by Bhagavati Prasad, B.A. at the Medical Hall Press, Benares Cantt. for
E. J. LAZARUS & CO, PUBLISHERS, BENARES CANTT.
1916

काश्याम्

ई० जे० लाजरसकम्पन्याख्यस्य मेडिकलहाल् यन्त्रालये
बाबू भगवतीप्रसाद बी० ए० द्वारा प्रकाशितम् ।

पदार्थतत्त्वनिरूपणम् ।

तार्किकशिरोमणिश्रीरघुनाथविरचितम् ।

श्रीरघुदेवन्यायालङ्कारविरचितया टीकया
श्रीरामभद्रसार्वभौमविरचितया पदार्थतत्त्व-
विवेचनप्रकाशाभिधया टीकया च
समन्वितम् ।

वाराणसीस्थराजकीयसंस्कृतपाठशालीय-
पुस्तकालयाध्यक्षेण
पण्डितविन्ध्येश्वरीप्रसादद्विवेदिना परिशोधितम् ।

वाराणस्याम्
महामण्डलयन्त्रालये श्रीअम्बिकाचरणचक्रवर्ति-
द्वारा मुद्रितम्

खीष्टाब्दे १९१५

॥ श्रीः ॥

सटीकस्य पदार्थतत्त्वनिरूपणस्य

भूमिका ।



श्रीहर्षकृतखण्डनखण्डखाद्यस्याध्ययनावसरे ऽस्मद्गुरुवरैर्महामहो-
पाध्यायश्रीहकैलासचन्द्रभट्टाचार्यशिरोमणिभिर्निरूपितं यावत् श्रीरघु-
नाथतार्किकशिरोमणिभिरपि कृतं पदार्थखण्डनं वर्तत इति श्रुत्वा
तस्यान्वेषणे प्रवृत्तोऽहं वाराणस्यां श्रीविभवरामपण्डितानां पुस्तक-
संग्रहे १६०१ विक्रमाब्दे लिखितं परिशुद्धं तत्पुस्तकं लब्धवान् ततः
परमेकस्य संन्यासिनः पुस्तकसंग्रहे रघुदेवन्यायालङ्कारकृतां टीकां श्रीरा-
मभद्रसार्वभौमकृतां टीकामपि समुपलब्धवानिति टीकाद्वयसहितस्य
तस्य मुद्राद्वारा प्रकाशने प्रवृत्तः ततः परं वाराणसीस्थराजकीयसंस्कृत-
पाठशालीयपुस्तकालये समुपलब्धयोः तन्मूलटीकापुस्तकयोः संयोगेन
संशोधनं कृत्वाऽस्य मुद्रणमेवंरूपेण कृतवान् अत्राल्पेऽपि विदुषां
समादरे निजपरिश्रमं सकलं सफलं विभावयिष्यामि ।

तार्किकशिरोमणिः श्रीरघुनाथभट्टाचार्यस्तु शकाब्दारम्भात् १४०७
वर्षेभ्यः किञ्चित् परं वङ्गदेशे प्रादुरभूत् एतमेव तदाविर्भावसमयं तत्कृता-
त्मतत्त्वविवेकटीकापुस्तकमस्मन्निकटे वर्तमानं १५१६ शकाब्दे लिखितं
श्रीविश्वनाथन्यायपञ्चाननैः न्यायसूत्रवृत्त्यन्ते १५५६ शकाब्दे लिखितं
"श्रीमच्छिरोमणिवचःप्रचयैरकारि" इति वचनं च द्रढयति । अनेनैव
रघुनाथशिरोमणिना तत्त्वचिन्तामणिदीधितिः किरणावलीप्रकाशविवृ-
तिर्न्यायलीलावतीविभूतिः षड्दर्शनशिरोमणिः खण्डनखण्डखाद्यटी-
कादयश्च बहवो ग्रन्था रचिताः । विस्तरस्तु न्यायवार्त्तिकभूमिकायां
द्रष्टव्यः ।

अस्य ग्रन्थस्यारम्भे ग्रन्थकारेण "पदार्थतत्त्वं निरूप्यते" इति लिखितम् । आदर्शपुस्तकेषु पुष्पिकायां "पदार्थतत्त्वनिरूपणं समाप्तम्" इति । रघुदेवन्यायालङ्कारेण टीकारम्भे "पदार्थतत्त्वं यदिदं शिरोमणिः" इत्युक्तम् अतः पदार्थतत्त्वनिरूपणमित्येवास्य ग्रन्थस्य नाम साधु ।

पदार्थतत्त्वनिरूपणस्यादर्शपुस्तकेषु प्रकरणनिवेशवैषम्यं दृश्यते तानि प्रकरणानि रघुदेवन्यायालङ्कारानुसृतक्रमेण मुद्रितपुस्तके सन्निवेशितानि ।

रघुदेवन्यायालङ्कारस्तु मथुरानाथतर्कवागीशशिष्यः मथुरानाथश्च रघुनाथशिरोमणिशिष्यः स्वकृतग्रन्थेषु "गुरुचरणास्तु" "भट्टाचार्यास्तु" इत्याकारेण तदुक्तेरुद्धृतत्वात् मथुरानाथेन दीधितिग्रन्थस्य व्याख्यातत्वादिति ।

रामभद्रसार्वभौमस्तु तत अर्वाचीनः जगदीशभट्टाचार्यकृतशब्दशक्तिप्रकाशिकायाः व्याख्यातत्वादिति शम् ॥

गवर्नमेंटसंस्कृतकालेज ।
बनारस
२ । १२ । १९१४ ईसवी

विन्ध्येश्वरीप्रसादद्विवेदी

॥ श्रीगणेशाय नमः ॥

पदार्थतत्त्वनिरूपणम्[1] ।

श्रीरघुनाथशिरोमणिविरचितम् ।

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अथ पदार्थतत्त्वं निरूप्यते । तत्र दि-

श्रीरघुदेवन्यायालङ्कारकृता

पदार्थतत्त्वनिरूपणस्य टीका ।

नन्दनन्दपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवः समासतः ॥

कामहस्तधृतसायककार्मुकं पौष्पमद्भुतमुदीक्ष्य कुप्यतः ।
धूर्जटेर्नयनकोणशोणता हन्तु सर्वजगतामुपद्रवम् ॥

पदार्थतत्त्वं यदिदं शिरोमणि-
र्निर्णीतवान् जीर्णमतस्य दूषणैः ।
तदेव तर्केण विचारयामः
सदर्थकेनेतरखण्डनेन ॥

प्रसङ्गात् पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रति-

---

(१) अस्य ग्रन्थस्य पदार्थखण्डनमितिनामापि प्रसिद्धिः। बङ्गाक्षरपुस्तके त्वन्ते पदार्थतत्त्वं समाप्तमिति देवाक्षरपुस्तके तु पदार्थतत्त्वनिरूपणं समाप्तमिति दृश्यते,

क्कालौ नेश्वरादतिरिच्येते मानाभावात् तत्तन्निमित्तविशेषसमवधानवशादीश्वरादेव तत्तत्का-

---

जानीते। अथेत्यादि। नञ्पदादेः संसर्गाभावत्वान्योन्याभावत्वादौ शक्यतावच्छेदकत्वव्यवस्थापनानन्तरं प्राचीनाभ्युपेतपदार्थानां कस्यचिदनतिरिक्तत्वं कस्यचित् खण्डनं कस्यचिदतिरिक्तत्वं तर्केण व्यवस्थाप्यत इत्यर्थः। तत्रेति। प्राचीनमताभ्युपेतपदार्थेषु मध्य इत्यर्थः। दिक्कालावित्यादि। दिक्कालयोरतिरिक्तत्वं यत् प्राचीनैः स्वीकृतं तन्न युक्तिसिद्धं तयोस्तदतिरिक्तत्वे(१) मानाभावादित्यर्थः। न चात्र दिक्त्वं पक्षतावच्छेदकीकृत्यातिरिक्तत्वाभावसाधने सिद्धासिद्धिव्याघात इति वाच्यम्। पूर्वस्यां दिशि घट इति प्रतीतिविषयीभूतविभुत्वस्यैव दिक्स्वरूपत्वात्। न च कालत्वं पक्षतावच्छेदकीकृत्यातिरिक्तत्वाभावसाधने तद्दोषतादवस्थ्यमिति वाच्यम्। इदानीं घट इति प्रतीतिविषयीभूतविभुत्वस्यैव कालत्वरूपत्वात्। विभुत्वं च मूर्तेतरद्रव्यत्वं न तु परममहत्परिमाणरूपम्। ईश्वरात्मनि तस्य निराकरिष्यमाणत्वेन विभुत्वाभावापत्तेः। ननु दिक्कालयोरतिरिक्तत्वानभ्युपगमे पूर्वस्यां घट इदानीं घट इत्याद्यनुगतप्रतीत्यनुपपत्तिः। न चेश्वरादेव तथा प्रतीतिनिर्वाह इति वाच्यम्। तथा सति प्राच्यां घटः प्रतीच्यां घट इत्यादेरिदानीं घटस्तदानीं घट इत्यादेश्च वैलक्षण्यानुपपत्तेरीश्वरस्यैकत्वादित्यत आह। तत्तन्निमित्तेति। तत्तत्कालोपाधितत्तद्दिगुपाध्यवच्छिन्नादित्यर्थः। तत्तत्कार्यविशेषाणामिति। प्राच्यां घट इत्यादिप्र-

---

(१) ईश्वरात् स्वात्वे।

र्थविशेषाणामुपपत्तेः[१] । परेषामेकैकस्माद्दिगादेरिव विलक्षणानां प्राच्यादिव्यवहाराणाम् ॥

शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव

तीतीनामित्यर्थः । परेषामिति । कालदिशोरतिरिक्तत्ववादिनामित्यर्थः । तथा च तेषां मते कालस्य दिशश्चैकत्वात् यथा तत्तदुपाध्यवच्छिन्नाभ्यां ताभ्यामेव प्राच्यां घटः प्रतीच्यां घट इत्यादेः इदानीं घटस्तदानीं घट इत्यादेश्च वैलक्षण्यनिर्वाहः तथा मन्मते ऽपि तत्तदुपाध्यवच्छिन्नादीश्वरादेव तादृशप्रतीतीनां वैलक्षण्यनिर्वाह इति भावः ॥

भावकार्यस्य समवायिकारणजन्यत्वनियमात् शब्दसमवायितयातिरिक्ताकाशसिद्धिः । ईश्वरस्यैव शब्दसमवायिकारणत्वं जीवस्य तथात्वमादाय विनिगमनाविरहेण निरस्तम् । न च जीवानामानन्त्यमेव विनिगमकमिति वाच्यम् । प्रत्येकं जीवमादाय विनिगमनाविरहसम्भवादिति सिद्धान्तिमतं दूषयति । शब्देति । तथा च जन्यमात्रं प्रति ईश्वरस्य कारणतायाः क्लृप्तत्वात् तत्र समवायित्वमात्रकल्पनमेव ईश्वरस्य शब्दसमवायित्वे विनिगमकं जीवानां तथात्वे कारणत्वसमवायित्वयोर्द्वयोः कल्पने गौरवादिति भावः । ननु जीवानां हेतुत्वमुभयवादिसिद्धमेव तथाहि शब्दो जीवजन्यो जीवादृष्टजन्यत्वात् सुखवदित्याद्यनुमानसम्भवात् । इत्थं च जीवानां तथात्वे समवायित्वमात्रं कल्प्यमित्यस्त्येव विनिगमनाविरह इत्यत

(१) बत्ते:-पा ॰ पु ॰

शब्दसमवायिकारणत्वम् । शब्दः तज्जन्यस्तद-
दृष्टजन्यत्वात् सुखादिवदिति पुनरप्रयोजकम् ।
अदृष्टस्य शब्दजनकत्वे ऽपि तदाश्रयस्य जन-
कत्वे[१] मानाभावात् अस्मदादेश्च शब्दसमवा-

आह । शब्द इत्यादि । ननु कारणत्वं हि कार्यतावच्छेदक-
भेदेन प्रत्यासत्तिभेदेन च नाना तथा च कालिकसम्बन्धेन[२]
जन्यत्वावच्छिन्नं प्रति हेतुत्वमीश्वरस्य क्लृप्तं न तु तादात्म्य-
प्रत्यासत्त्या शब्दत्वावच्छिन्नं प्रति तथात्वम् । इत्थं चेश्वरे
ऽपि शब्दत्वावच्छिन्नस्य तादात्म्यसम्बन्धावच्छिन्नकारणत्वं
समवायित्वं च द्वयं कल्प्यमित्यस्त्येव विनिगमनाविरह
इत्यत आह । अस्मदादेश्चेति । विजातीयमनःसंयोगा-
श्रयसमवायरूपकारणस्य शब्दे ऽपि सत्त्वात् तस्य ज्ञानादि-
वल्लौकिकमानसत्वापत्तिरित्यर्थः । न च तत्संस्कारादीना-
मिव शब्दस्यापि मनसोऽयोग्यतया न मानसापत्तिरिति
वाच्यम् । सामग्रीसत्त्वे कार्यावश्यम्भावात् संस्कारादीना-
मनायत्त्या तादात्म्यप्रत्यासत्त्या प्रत्यक्षं प्रति प्रतिबन्धक-
त्वाभ्युपगमात् तद्वच्छब्दस्य प्रतिबन्धकत्वाभ्युपगमे तु क-
ल्पनागौरवमेव विनिगमकमिति । अथ संस्कारादीनां प्रतिब-
न्धकत्वकल्पनापेक्षया लाघवाल्लुप्तलौकिकमानसत्वावच्छि
न्नं प्रति ज्ञानादियोग्यविशेषगुणवृत्तिजातिविशेषावच्छेदेन
हेतुत्वकल्पनाया एवोचितत्वात् शब्दस्य जातिविशेषाना-
क्रान्तत्वेन न तन्मानसापत्तिः । न चायोग्यसंस्कारादिष्वेव

---

(१) तदाश्रयत्वे पा० २ पु ।
(२) कालिकप्रत्यासत्त्या—पा २ पु ।

यिकारणत्वे ऽहं सुखादिमानितिवदहं शब्दवा-

जातिविशेषं कल्पयित्वा तदवच्छेदेन तादात्म्यप्रत्यासत्त्या प्रतिबन्धकत्वमादाय विनिगमनाविरहः। एतन्मते विजातीयगुणभेदत्वादिना हेतुतायां कारणतावच्छेदकगौरवे ऽपि विजातीयगुणत्वेन हेतुतायामपि गुणमानसत्वस्य विजातीयगुणमानसत्वस्यैव वा जन्यतावच्छेदकत्वस्य स्वीकरणीयत्वात् कार्यतावच्छेदकगौरवेण साम्यम् । मानसत्वमात्रस्य जन्यतावच्छेदकत्वे आत्मत्वादौ तादात्म्यप्रत्यासत्त्या *विजातीयगुणाभावात् तन्मानसे व्यभिचारापत्तेः*। प्रतिबन्धकतामते तु विजातीयसंस्कारादिगुणभेदस्य सर्वत्र मानसविषये सत्त्वेन व्यभिचाराभावात् मानसत्वमात्रस्यैव तादृशगुणभेदजन्यतावच्छेदकत्वादिति वाच्यम् । विनिगमनाविरहात् कारणत्वस्य प्रतिबन्धकत्वस्य वा स्वीकारे ऽपि शब्दस्य कारणतावच्छेदकवैजात्याभावेन प्रतिबन्धकतावच्छेदकवैजात्यसत्त्वेनैव वा मानसवारणादिति विनिगमनाविरहेणानन्तानां जीवानामीश्वरस्य च शब्दसमवायिकारणत्वकल्पनामपेक्ष्य शब्दसमवायिकारणत्वेनातिरिक्ताकाशकल्पनमेव ,समुचितमिति चेत् । मैवम् । विजातीयगुणत्वेन हेतुतायां तस्य कार्यतावच्छेदकं गुणमानसत्वं विजातीयगुणमानसत्वं चेति विनिगमनाविरहापत्तेः प्रतिबन्धकत्वकल्पनाया एव समुचितत्वात् । न च गुणत्वजातेर्दीधितिकृतैव निरसनीयत्वाभायं विनिगमनाविरह इति वाच्यम् । तथापि घटाकाशसंयोगादिचाक्षुषवारणाय सामानाधिकरण्यसम्बन्धेन चाक्षुषविषयत्वाभावस्य प्रतिबन्धकत्वकल्पने त्रुटिप्रत्यक्षे व्यभिचारवारणाय द्रव्यान्यसचाक्षुषत्वस्य जन्यतावच्छेदक-

स्वकल्पनापेक्षया द्रव्यव्यावृत्तजातिविशेषं कल्पयित्वा विजातीयसंचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकतायाः क्लृप्तत्वात् तादृशविजातीयसन्मानसत्वस्य विजातीयगुणमानसत्वस्य वा जन्यतावच्छेदकत्वमादाय विनिगमनाविरहापत्तेः। न च गुणत्वजातौ मानाभावेन साङ्कर्यानवकाशात् तादृशजातेर्ज्ञानादिसाधारण्ये मानाभावात् विजातीयसन्मानसत्वस्यावच्छेदकत्वासम्भवान्न विनिगमनाविरह इति वाच्यम्। एवमपि तस्य कार्यतावच्छेदकं विजातीयगुणमानसत्वं विजातीयगुणप्रत्यक्षत्वं वेति विनिगमनाविरहतादवस्थ्यात्। न च ज्ञातो घट इत्यादिमानसोपनीतभानमादाय घटादौ व्यभिचारवारणाय विजातीयगुणलौकिकत्वस्य जन्यतावच्छेदकत्वे मानसत्वस्यानिवेशात् न विनिगमनाविरह इति वाच्यम्। विजातीयगुणलौकिकत्वावच्छिन्नस्य विषयतासम्बन्धेनात्मन्यप्युत्पत्तेर्विजातीयगुणवृत्तिविषयताया विजातीयलौकिकविषयताया वा कार्यतावच्छेदकप्रत्यासत्तित्वे कार्यतावच्छेदकं मानसत्वं प्रत्यक्षत्वं वेति विनिगमनाविरहापत्तेर्दुर्वारत्वादिति। न च प्रत्यक्षत्वादिजातेरीश्वरज्ञानसाधारण्येन नित्यवृत्तितया अनवच्छेदकत्वेन न तस्या जन्यतावच्छेदकत्वमादाय विनिगमनाविरह इति वाच्यम्। विशेषणज्ञानजन्यतावच्छेदकतया सिद्धस्येश्वरज्ञानव्यावृत्तजातिविशेषस्यावच्छेदकत्वमादाय विनिगमनाविरहस्य तथाप्यनुद्धारात्। न च विजातीयगुणत्वेन प्रतिबन्धकतायामपि तस्य प्रतिबध्यतावच्छेदकं मानसत्वं प्रत्यक्षत्वं वेति विनिगमनाविरहोऽस्तीति वाच्यम्। आत्मसंयोगादीनामपि मानसापत्तेः प्रतिबन्धकतावच्छेदकजातेस्तत्रावश्यमभ्युपेयत्वात्

प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वे संयोगे विजातीयगुणभेदासत्त्वे तथाऽनुपादायैव व्यभिचारात् योग्यसंयोगादौ तादृशजात्यस्वीकारे संयोगत्वादिना सङ्करप्रसङ्गात् । वस्तुतस्तु प्रतिबन्धकत्वं मानसत्वादिप्रत्येकधर्मावच्छिन्नं प्रति कारणत्वं वा कल्प्यत इति विनिगमनाविरहाघकाशो नास्त्येव विजातीयगुणविषयकमानसत्वावच्छिन्नं प्रति विजातीयगुणत्वेन हेतुतायां विजातीयगुणान्यविषयकात्मत्वमानसस्यापि मनःसंयुक्तसमवायेन जननात् तादृशसामान्यसामग्रीबलात् संस्कारमानसस्योत्पत्तेर्वारणाय प्रतिबन्धकत्वकल्पनाया एव न्याय्यत्वात् । तत्राप्यात्मत्वादीनां हेतुत्वकल्पनान्नानुपपत्तिरिति चेत् एतत्कल्पनाया एवाधिक्यात् । न च संस्कारादीनां विजातीयगुणत्वेन प्रतिबन्धकत्वे ऽपि तादृशवैजात्यमेव शब्दसाधारणमस्तु तथा च शब्दस्य न मानसापत्तिरिति वाच्यम् । शब्दे तत्सम्बन्धकल्पनाया एवाधिक्यात् । न चेश्वरे शब्दसमवायस्वीकारे ऽपि मनःसंयुक्तेश्वरसमवायस्य सत्त्वात् तन्मानसापत्तिवारणाय शब्दे प्रतिबन्धकतावच्छेदकजातिकल्पनमावश्यकमिति वाच्यम् । ईश्वरे विजातीयमनःसंयोगानभ्युपगमात् परकीयज्ञानादिप्रत्यक्षवारणाय तत्पुरुषीयात्मसमवेतमानसं प्रति तत्पुरुषीयविजातीयमनःसंयोगाश्रयसमवायत्वादिनैव हेतुत्वाभ्युपगमादिति । परे तु भेर्यादीनामेव गुणः शब्दः त्वयापि भेर्यां शब्द इतिप्रतीतिबलात् तत्रावच्छेदकत्वाख्यस्वरूपसम्बन्धस्यावश्यं स्वीकरणीयत्वात् अवच्छेदकतासम्बन्धेन शब्दोत्पत्तौ भेरीदण्डसंयोगादीनां हेतुत्वस्य कल्पनीयत्वाच्च मन्मते समवायसम्बन्धेन शब्दोत्पत्तिं प्रत्येव तेषां हेतुत्वाभ्युपगमादिति । न चेश्वरे ऽ[illegible] वा शब्दसमवायित्वं स्वी-

क्रियते गौरवात्। न च भेर्यां शब्दसमवायित्वस्वीकारे भेरी-नाशं विनापि शब्दनाशात् भेरीसमवेतनाशं प्रति भेरी-नाशस्य हेतुतायां व्यभिचार इति वाच्यम्। तथापि भेर्यां पाकादिना तदीयरूपनाशात्तत्र व्यभिचारवारणाय भेरीनाशकालीनभेरीसमवेतनाशत्वस्यैव तज्जन्यतावच्छे-दकत्वाभ्युपगमेन व्यभिचारानवकाशात्। न च भेर्यां शब्द-समवायित्वस्वीकारे भेरीचक्षुःसंयोगदशायां चक्षुःसंयुक्त-समवायस्य तच्छब्दे सत्त्वात् रूपादिवत् तस्य चाक्षुषाप-त्तिः रसादीनामिव शब्दस्यापि प्रतिबन्धकत्वकल्पने च गौ-रवमिति वाच्यम्। रसादीनां प्रातिस्विकरसत्वादिरूपेण प्रतिबन्धकत्वकल्पनापेक्षया चक्षुरयोग्यगुणेषु जातिविशेषं कल्पयित्वा विजातीयगुणत्वेनैव चाक्षुषत्वावच्छिन्नं प्रति प्रतिबन्धकत्वकल्पनाया औचित्यात् तादृशवैजात्यस्य शब्दे स्वीकारेण तचाक्षुषादिवारणात् ईश्वरस्य शब्दसम-वायिकारणत्वकल्पनापेक्षया शब्दनिष्ठतादृशजातिस्वीका-रस्यैवोचितत्वात्। न च तुल्ययुक्त्या स्पार्शनप्रतिबन्धकता-वच्छेदकतया सिद्धजात्या परस्परसाङ्कर्यात् कथं तादृशजा-तिसिद्धिः तथाहि तादृशस्पार्शनप्रतिबन्धकतावच्छेदकजा-तिः स्पर्शव्यावृत्ता रूपवृत्तिरपरा च रूपव्यावृत्ता स्पर्शवृत्तिः रसादौ च तयोः समावेश इति वाच्यम्। रूपस्पर्शव्या-वृत्तजातिस्वीकारात्, तदवच्छिन्नप्रतिबध्यतावच्छेदकं चा-क्षुषत्वं स्पार्शनत्वं च एवं रूपत्वेन स्पार्शनं प्रति स्पर्शत्वेन चा-क्षुषं प्रत्यपि प्रतिबन्धकत्वकल्पनात् न तयोश्चाक्षुषस्पार्श-नापत्तिरित्यदोषः। अथास्तु विजातीयगुणत्वेनैव विजाती-यगुणचाक्षुषत्वावच्छिन्नं प्रति रूपादीनां हेतुना एवं स्प-र्शत्वेन चाक्षुषं प्रति रूपत्वेन स्पार्शनं प्रत्यपि प्रतिबन्धकत्व-

निनितिप्रतीत्यापत्तिः । श्रोत्रमपि च कर्णशष्कुली-

मिति विनिगमनाविरहः पूर्वमते कारणतावच्छेदकस्य गुरुतया साम्यादिति चेत् अस्त्वेवमपि शब्दे चाक्षुषादेरापादकाभावात् विजातीयगुणान्यविषयकचाक्षुषस्यापि प्रसिद्धा रसादौ तदापत्तेर्विजातीयगुणत्वेन हेतुत्वकल्पनया वारणासम्भवाच्चेति वदन्ति। अथातिरिक्ताकाशानभ्युपगमे किं श्रोत्रपदार्थः स्यात् तन्मते कर्णविवरावच्छिन्ननभोभागस्यैव श्रोत्रेन्द्रियत्वादत आह । **श्रोत्रमपीति** । तथा च तादृशेश्वरसमवाय एव शब्दग्रहे प्रत्यासत्तिः। वस्तुतस्तु शब्दग्रहे श्रोत्रसमवायस्य हेतुत्वे मानाभावः तद्ग्राहकान्वयव्यतिरेकाभावात् प्रत्यक्षस्येन्द्रियसन्निकर्षजन्यत्वनियमे मानाभावात् परं तु देशान्तरीयपुरुषस्य काशीस्थशब्दप्रत्यक्षवारणाय तत्पुरुषीयशब्दलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वावच्छेद्यत्वसम्बन्धेनैतत्कर्णत्वेन एतत्कर्णावच्छेद्यशब्दत्वेनैव वा तादात्म्येन(१) हेतुत्वं कल्प्यते । एवं शब्दत्वादिप्रत्यक्षे तत्कर्णस्य स्वावच्छेद्यसमवेतत्वसम्बन्धेन हेतुत्वं कल्प्यते न तु श्रोत्रसमवेतसमवायत्वेन। अथैवं शब्दोऽसमवेत एवास्तु तस्य समवेतत्वे मानाभावात् जन्यभावे समवेतत्वनियमस्याप्रयोजकत्वात् इति चेदस्तु किं तेन यदि न सिद्धान्तभङ्गभीतिः । अथवा कर्णशष्कुल्यां शब्दस्यावच्छेदकत्वं न स्वीक्रियते परं तु समवाय एवावच्छेदकतानियामकस्यैव समवायनियामकत्वाभ्युपगमात् । इत्थं च शब्दतत्समवेतप्रत्यक्षयोः कर्णसमवायतत्समवेतसमवाययोरेव हेतुत्वमभ्युपेयते काशीस्थशब्दस्य

(१) तादात्म्यसम्बन्धस्य–पा १ पु ।

विवरावच्छिन्न ईश्वर एव यथा परेषां तथावि-
धमाकाशम् ॥

मनोऽपि चासमवेतं भूतम्[१] । अदृष्ट-
विशेषोपग्रहस्य नियामकत्वाच्च नातिप्रसङ्ग इ-

समवायेनैतद्देशीयपुरुषकर्णे ऽनुत्पादान्नातिप्रसङ्ग इति कृतं
पल्लवितेन । परेषामतिरिक्ताकाशाभ्युपगन्तॄणाम् ॥

मनसोऽतिरिक्तत्वं खण्डयति । मनोऽपि चेत्यादि ।
तथा च यदसमवेतं भूतं प्राचीनमते परमाणुरूपं नवीनमते
त्रुटिस्वरूपं तदेव मनःपदवाच्यमित्यर्थः । अतिरिक्तमनः-
कल्पने गौरवमिति भावः । क्वचिदसमवेतं मूर्तमिति पाठः ।
तत्र च मूर्तपदं मूर्तविशेषपरं तथा च मनोऽसमवेतमूर्तविशेषो
भूतात्मकं मूर्तमिति यावदित्यर्थः । अत्र च मनसोऽसम-
वेतभूतपर्यन्तानुधावनं स्वमत्वसिद्धान्तरक्षार्थमिति ध्ये-
यम् । ननु मनसोतिरिक्तत्वानभ्युपगमे घटादौ चक्षुःसंयो-
गत्वक्संयोगादिसत्त्वे एकदा ज्ञानद्वययौगपद्यापत्तिः नवी-
नमते मनसः त्रसरेणुरूपतया तस्य च महत्त्वेन तेन सह
एकदा चक्षुर्मनोयोगादीनां सम्भवेन नानाज्ञानोत्पादकना-
नेन्द्रियमनोयोगरूपस्य कारणस्यापि तदानीं विद्यमानत्वा-
दित्यत आह । अदृष्टेति । तथा चातिरिक्तमनोभ्युपग-
न्तॄणामपि यदा मनसा सह चक्षुःसंयोगस्तदा त्वचा सह
संयोगस्तथा कथं नोत्पद्यत इति तत्रादृष्टविशेषस्य नियाम-
कत्वावश्यकत्वे ऽनुपपत्त्यभावात् मन्मते ऽपि तत्तज्ज्ञानादौ
तत्तददृष्टविशेषस्य नियामकत्वकल्पनेनैव एकदा ज्ञानद्वय-
यौगपद्यापत्तिवारणसम्भवादिति भावः । इदमत्र विचा-

(१) मूर्तम्-पा १ पु-१

त्वावयोः समानम् ॥

परमाणुद्व्यणुकयोश्च मानाभावः त्रुटावेव विश्रामात् । त्रुटिः समवेता चाक्षुषद्रव्यत्वात् घटवत् ते च समवायिनः समवेताः[१] चाक्षुषद्रव्यसमवायित्वादिति चाप्रयोजकम् । अन्यथा

रयामः । अतिरिक्तमनसोऽनभ्युपगमे विनिगमनाविरहेण मनसो नानापरमाणुरूपतया नानात्रुटिरूपतया वा एतत्पुरुषीयात्ममानसत्वावच्छिन्नं प्रति एतत्पुरुषीयमनःसंयोगादिहेतुतायां नानापदार्थेऽवच्छेदकत्वकल्पने गौरवं कुप्तत्विहरसेव मनसोऽतिरिक्तत्वकल्पने स्वेकन्न तदवच्छेदकत्वकल्पने लाघवस्यातिस्फुटत्वात् । न च तत्र मनःसंयोगस्य विजातीयसंयोगत्वेन हेतुत्वकल्पनान्नोपदर्शितगौरवावकाश इति वाच्यम् । तथापि विनिगमनाविरहेण संयोगसम्बन्धेन मनसोऽपि हेतुत्वेऽनन्तपरमाणुषु त्रुटिषु वा कारणत्वकल्पनप्रयुक्तगौरवस्य दुःसमाधेयत्वात् । अत्र केचित् । द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति इन्द्रियसंयोगस्य विजातीयसंयोगत्वेन हेतुत्वस्य सामान्यतः कल्पनात् तेनैवासन्निकृष्टात्मप्रत्यक्षवारणसम्भवे आत्ममानसत्वावच्छिन्नं प्रति मनःसंयोगत्वेन हेतुतायां मानाभाव इति नातिरिक्तमनसोऽनभ्युपगमे उपदर्शितगौरवप्रसङ्गः तथाविधसामान्यकार्यकारणभावावश्यकत्वं निरुक्तिप्रकाशे[२] ऽवस्थापितमिति ग्रन्थगौरवान्नेह प्रपञ्चितमिति दिक् ॥

ते चेति । चाक्षुषद्रव्यसमवायिनश्चेत्यर्थः । अन्यथा

---

(१) ते च समवेताः–पा २ पु ।
(२) ऽव्यव–पा १ पु ।

तादृशसमवायिसमवायित्वादिभिरनवस्थित-

अप्रयोजकादपि अनुमानात् पदार्थसिद्धौ। तादृशेत्यादि। परमाणुः समवेतः चाक्षुषद्रव्यसमवायिसमवायित्वात् कपालिकावदित्यनुमानेनेत्यर्थः। अथ परमाणुद्व्यणुकानङ्गीकारे द्रव्यचाक्षुषे चक्षुःसंयोगस्य द्रव्यसमवेतचाक्षुषे चक्षुःसंयुक्तसमवायस्य च हेतुत्वकल्पनया गौरवं तदभ्युपगमे समवेतचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायत्वेन हेतुत्वकल्पनात् त्रसरेणुतद्रूपादावपि चक्षुःसंयुक्तपरमाण्वादिसमवेतसमवायसत्त्वेनैव तच्चाक्षुषोपपत्तेस्तयोर्हेतुत्वाकल्पने लाघवमेव तत्सिद्धावनुकूलतर्क इति नाप्रयोजकत्वमिति। न चातीन्द्रियघटितसन्निकर्षाद् द्रव्यत्वादिचाक्षुषवारणाय द्रव्यान्यसमवेतचाक्षुषे चक्षुःसंयुक्तसमवेतचाक्षुषवन्निरूपितसमवायत्वेनैव हेतुत्वकल्पनात् तेन त्रुटिचाक्षुषासङ्ग्रहात् संयोगहेतुत्वमावश्यकमिति वाच्यम्। इत्थमपि द्रव्यान्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतो यश्चाक्षुषविषयः तन्निरूपितसमवायत्वेन द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतुत्वकल्पनादेवोपपत्तौ संयुक्तसमवायस्य हेतुत्वाकल्पनात् त्रसरेणौ द्रव्यत्वादिचाक्षुषानुरोधेन द्व्यणुकसिद्धेरावश्यकत्वादिति चेत्। न। द्व्यणुकाभ्युपगमे तद्घटितसन्निकर्षात् रूपत्वादिचाक्षुषवारणाय चक्षुःसंयुक्तसमवेतसमवायहेतुतायां समवेतांशे चाक्षुषविषयतया निवेशस्य आवश्यकतया कारणतावच्छेदकप्रविष्टयोः समवेतत्वचाक्षुषविषयत्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताद्वयकल्पनापरिरवच्छेदकगौरवं

चेति तदपेक्षया द्रव्यान्यस्मिन् वर्तते यस्तद्विषयकचाक्षुष-
त्वाद्यवच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायत्वेन द्रव्य-
समवेतचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयुक्तसमवाय-
त्वेन द्रव्यचाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुःसंयोगत्वेन हेतु-
त्वकल्पनं समुचितमेव । न च भवन्मते ऽपि वायुघटितस-
न्निकर्षात् संयोगत्वप्रत्यक्षवारणाय चाक्षुषविषयतानिवेश-
स्यावश्यकत्वमिति वाच्यम् । पाकादिना नीरूपघटघटित-
सन्निकर्षात् संयोगत्वसंख्यात्वादिप्रत्यक्षवारणाय चाक्षुष-
विषयतानिवेशे ऽपि संयुक्तांशे रूपनिवेशस्यावश्यकत्वात्
रूपवच्चक्षुःसंयुक्तसमवेतसमवायाभावादेव तद्वारणात् ।
न च चक्षुरिन्द्रियघटितसन्निकर्षाद् रूपत्वादिचाक्षुषवार-
णायानुद्भूतरूपाभावादिनिवेशापेक्षया चाक्षुषविषयता-
निवेश आवश्यक इति वाच्यम् । अनुद्भूतरूपस्य दीधिति-
कृतैवाग्रे निरसनीयत्वात् । अथावयविनि पाकानभ्युपगमे
रूपनिवेशस्यानावश्यकत्वात् चाक्षुषविषयतैव वाय्वादि-
घटितसन्निकर्षात् संयोगत्वादिचाक्षुषवारणाय निवेश्यते
तथा च संयुक्तसमवायस्य हेतुत्वाकल्पनप्रयुक्तलाघवम-
स्त्येवेति चेत् । न । विजातीयचक्षुःसंयोगाश्रयसमवेतस-
मवायत्वादिनैव हेतुत्वकल्पनाद्वाय्वादौ विजातीयचक्षुः-
संयोगानभ्युपगमसम्भवेनैव[१] तद्घटितसन्निकर्षात् संयो-
गत्वादिचाक्षुषवारणात् मन्मते ऽपि रूपाद्यनिवेशात् भव-
न्मते द्व्यणुकघटितसन्निकर्षात् रूपत्वादिचाक्षुषवारणाय
चाक्षुषविषयतानिवेशस्य महत्त्वनिवेशस्य चावश्यकत्वेन
पूर्वोक्तगौरवात् । न च वायुचक्षुःसंयोगादौ वैजात्यान-
भ्युपगमे तद्घटितसन्निकर्षात् रूपाभावादिचाक्षुषानुदय-

(१) भ्युपगमेनेति—पा० २ पु० ।

प्रसङ्गः अभावप्रत्यक्षे ऽपि विजातीयसंयोगाश्रयविशेषणताया एव हेतुत्वादिति वाच्यं अभावचाक्षुषजनकतावच्छेदकतया वैजात्यान्तरस्वीकारात् । न च मयापि द्व्यणुकचक्षुःसंयोगे वैजात्यानभ्युपगमान्न तद्घटितसन्निकर्षात् रूपत्वादीनां चाक्षुषापत्तिरिति वाच्यम् । त्रसरेणौ द्रव्यत्वचाक्षुषानुरोधेन त्वया द्व्यणुके विजातीयसंयोगस्यावश्याभ्युपेयत्वात् । न च चाक्षुषविषयत्वानिवेशे रूपस्य वैजात्यस्य वा जनकतावच्छेदककोटिप्रवेशे ऽपि घटचक्षुःसंयोगकाले तद्घटनीरूपघटान्तरद्वित्वादिघटितसन्निकर्षात् घटवायुद्वित्वादिसन्निकर्षाच्च द्वित्वत्वादिप्रत्यक्षापत्तिरिति चाक्षुषविषयतानिवेश आवश्यक इति वाच्यम् । द्वित्वत्वप्रकारकप्रत्यक्षस्य चाक्षुषाभावादिप्रतिबन्धकसत्त्वेनासम्भवात् केवलद्वित्वत्वनिर्विकल्पकस्वीकारे ऽपि क्षतिविरहात् निर्विकल्पकस्यातीन्द्रियतया तदुत्तरमनुव्यवसायाद्यापत्तिविरहात् । इत्थं च रूपमपि न निवेश्यते प्रयोजनाभावात् । वस्तुतस्तु यावदाश्रयसन्निकर्षविरहकाले द्वित्वादिप्रत्यक्षवारणाय विजातीयसचाक्षुषत्वावच्छिन्नं प्रति सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकचक्षुःसंयोगाभावाभावस्य हेतुत्वकल्पनवत् तदानीं तद्घटितसन्निकर्षात् द्वित्वत्वादिचाक्षुषवारणाय तत्र सामानाधिकरण्यसम्बन्धेन तादृशचक्षुःसंयोगाभावाभावस्य हेतुताया अवश्यं कल्पनीयत्वे विजातीयसत्समवेतचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वं स्वीक्रियत इति तादृशहेतुतयैव रूपादिसन्निकर्षविरहदशायां रूपत्वादिचाक्षुषवारणे संयुक्तसमवेतसमवायहेतुत्वं नाभ्युपेयते । न च तथापि चक्षुःसंयुक्तघटवायुद्वित्वघटपरमाणुद्वित्वसन्निकर्षात् द्वित्वत्वादिप्रत्य-

तत्समवायिपरम्परासिद्धिप्रसङ्गात् । अणुव्यवहारश्चापकृष्टपरिमाणनिबन्धनो महत्यपि महत्तमादणुव्यवहारात् ॥

ईश्वरस्य च परिमाणवत्त्वे मानाभावः

वारणाय चक्षुःसंयुक्तसमवेतचाक्षुषवत्समवायत्वेन हेतुत्वमावश्यकमिति वाच्यम् । तादृशाभावाभावस्यैव स्वाश्रयचाक्षुषविषयसमवायरूपसामानाधिकरण्यसम्बन्धेन हेतुत्वाभ्युपगमात् विजातीयचक्षुःसंयोगाद्यभावाभावस्यैव वा सामानाधिकरण्यसम्बन्धेन हेतुत्वाद् वायुघटसंयोगे च सामानाधिकरण्यसम्बन्धेन विजातीयचक्षुःसंयोगाद्यभावाभावस्यासत्त्वेन तद्वारणात् । इत्थं च द्रव्यत्वादिप्रत्यक्षानुरोधेन संयुक्तसमवायहेतुत्वं कल्प्यते द्व्यणुकस्वीकारे च द्व्यणुकघटितसन्निकर्षात् रूपत्वादिचाक्षुषवारणाय तत्र चाक्षुषविषयतानिवेशस्यावश्यकत्वेन तेन त्रुटिचाक्षुषासङ्ग्रहात् द्रव्यचाक्षुषे चक्षुःसंयोगस्य हेतुत्वमावश्यकमिति द्व्यणुकस्वीकारो निरर्थकः चाक्षुषविषयत्वप्रवेशप्रयुक्तगौरवसम्पादकश्चेति कृतं पल्लवितेन । अथ अणुव्यवहारस्य स्थूलद्रव्यालम्बनत्वाभावेन तद्भिन्नद्रव्यविषयकत्वमावश्यकमिति तत्सिद्धिरित्यत आह । अणुव्यवहार इत्यादि । अपकृष्टपरिमाणनिबन्धनोऽपकृष्टमहत्त्वाश्रयद्रव्यविषयक इत्यर्थः । महत्यपीति । यदपेक्षया ये ऽपकृष्टपरिमाणवन्तस्तदपेक्षया तत्राणुव्यवहारादित्यर्थः ॥

ईश्वरस्य चेति । जीवात्मनो महत्त्वं प्रत्यक्षसिद्धमित्याशयः । तदनभ्युपगमे तदपि तद्गतिकमेवेति बोध्यम् ।

केचित्तु परमाणुद्व्यणुकाङ्गीकारे आत्ममहत्त्वमावश्यकमन्यथा परमाण्वादिप्रत्यक्षवारकमहत्त्वत्वेन हेतुत्वे आत्ममानसे व्यभिचारः स्यात् आत्मान्यद्रव्यप्रत्यक्षत्वस्य तज्जन्यतावच्छेदकत्वे चाक्षुषस्पार्शनत्वयोर्मिथो विशिष्य तथात्वे च गौरवमित्याहुः। तन्न। त्रुटिस्पार्शनवारणाय द्रव्यस्पार्शनत्वावच्छिन्नं प्रति सामानाधिकरण्यसम्बन्धेन महत्त्वस्य समवायसम्बन्धेन विजातीयमहत्त्वस्य वा हेतुतायां द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव महत्त्वत्वेन हेतुत्वकल्पनात् त्रुटिस्पार्शनस्वीकारेऽपि मूर्तप्रत्यक्षत्वस्यैव तज्जन्यतावच्छेदकत्वस्वीकारेणात्ममानसे व्यभिचारानवकाशात्। अथ परमाणुघटसंयोगचाक्षुषवारणाय द्रव्यान्यसत्प्रत्यक्षत्वावच्छिन्नं प्रति सामानाधिकरण्यसम्बन्धेन महत्त्वाभावस्य प्रतिबन्धकत्वकल्पनात् जीवानामीश्वरस्य च महत्त्वानङ्गीकारे ज्ञानादौ शब्दे च सामानाधिकरण्यसम्बन्धेन महत्त्वाभावस्य सत्त्वात् प्रत्यक्षानुदयापत्तेस्तदावश्यकम्। चाक्षुषस्पार्शनत्वादीनां विशिष्य प्रतिबध्यतावच्छेदकत्वे च कार्यकारणभावबाहुल्यमिति चेत्। न। आवश्यकद्रव्यान्यसच्चाक्षुषत्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन चाक्षुषाभावस्य द्रव्यान्यसत्स्पार्शनत्वावच्छिन्नं प्रति स्पार्शनाभावस्य प्रतिबन्धकत्वकल्पनादेव परमाणुघटसंयोगप्रत्यक्षवारणे महत्त्वाभावस्य प्रतिबन्धकत्वाकल्पनात् तयोरावश्यकत्वं तु वायुघटसंयोगगगनघटसंयोगादीनां चाक्षुषस्पार्शनवारणाय। अथ तत्र रूपाभावस्पर्शाभावयोः प्रतिबन्धकत्वेनैव नानुपपत्तिरिति चेत्। न। रूपमहत्त्वस्पर्शाभावानां त्रयाणां प्रतिबन्धकत्वकल्पनापेक्षया चाक्षुषस्पार्शनाभावप्रतिबन्धकत्वकल्पनस्यैव लाघवात्। न च पाकादिना

नीरूपनिःस्पर्शघटघटितसन्निकर्षात् संयोगादिप्रत्यक्षवारणाय रूपाभावस्पर्शाभावयोः प्रतिबन्धकत्वमावश्यकम् तत्र चाक्षुषादिविषयतायाः सत्त्वे तदभावासत्त्वादिति वाच्यम् । एवं सति चक्षुर्घटसंयोगे प्रभाघटसंयोगे च चाक्षुषस्पार्शनवारणाय उद्भूतरूपाभावादीनां सामानाधिकरण्यसम्बन्धेनैव प्रतिबन्धकत्वकल्पनापेक्षया चाक्षुषस्पार्शनाभावयोः प्रतिबन्धकताया आवश्यकत्वात् अवयविनि पाकानभ्युपगमे रूपाभावादीनां प्रतिबन्धकताया अनावश्यकत्वात् । न चावयविनि पाकाभ्युपगन्तॄणां नैयायिकानां मते यद्यनुद्भूतरूपादिकं नाभ्युपेयते तदा रूपस्पर्शाभावयोः प्रतिबन्धकताया आवश्यकत्वात् चाक्षुषस्पार्शनाभावापेक्षया द्रव्यान्यसत्प्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वाभावस्यैव प्रतिबन्धकत्वकल्पने लाघवात् परममहत्त्वस्वीकार इति वाच्यम् । एवमपि त्रसरेणुघटसंयोगस्य स्पार्शनवारणाय द्रव्यान्यसत्स्पार्शनत्वावच्छिन्नं प्रति सामानाधिकरण्यसम्बन्धेन विजातीयमहत्त्वाभावस्य स्पार्शनाभावस्य वा प्रतिबन्धकताया आवश्यकत्वे द्रव्यान्यसच्चाक्षुषत्वस्यैव महत्त्वाभावाभावजन्यतावच्छेदकत्वाभ्युपगमेन ज्ञानादिमानसे व्यभिचारानवकाशात् । अस्तु वा मानसादिव्यावृत्तचाक्षुषस्पार्शनवृत्तिजातिविशेष एव महत्त्वाभावाभावजन्यतावच्छेदक इति आत्मादिमहत्त्वानभ्युपगमेऽपि न ज्ञानशब्दादिप्रत्यक्षे व्यभिचार इति । न च तादृशवैजात्ये मानाभाव इति वाच्यम् । अनन्तानामात्मनामनन्तमहत्त्वकल्पनापेक्षया तादृशजातिकल्पनाया एव समुचितत्वात् । इत्थं च चाक्षुषे स्पार्शने च रूपस्पर्शयोरपि हेतुत्वं न स्वीक्रियते । वाय्वादिचाक्षुषस्य प्रभादिस्पार्शनस्य च वा-

रणाय सत्ताचाक्षुषस्पार्शनयोरूपाभावस्पर्शाभावयोः वायुघट-संयोगप्रत्यक्षवारणाय प्रतिबन्धकतायाः सामानाधिकरण्यसम्बन्धेन कल्पनाद् वाय्वाद्यवयवपरम्पराया अपि नीरूपत्वात् तत्र सामानाधिकरण्यसम्बन्धेन रूपाभावादिसत्त्वादेव वारणात्। आत्मादिचाक्षुषस्पार्शनयोश्च महत्त्वस्य विजातीयप्रत्य ' प्रति हेतुत्वकल्पनेनैव वारणात् तन्मते आत्मादिचाक्षुषवारणाय तयोरनावश्यकत्वादित्यपि लाघवम्। इत्थं च त्रुटिसंयोगस्पार्शनाभ्युपगमः। अथवा अणुपरिमाणस्यैव सामानाधिकरण्यसम्बन्धेन द्रव्यान्यसत्प्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं तत एव परमाणुघटसंयोगप्रत्यक्षवारणे महत्त्वाभावस्य प्रतिबन्धकत्वाभावान्नात्मादिमहत्त्वसिद्धिः। आत्मादेः परमाणुपरिमाणाभावेन सामानाधिकरण्यसम्बन्धेन तस्याभावो ज्ञानशब्दादावपि वर्तत इति व्यभिचारानवकाशात्। न चाणव एव निःपरिमाणाः किं न स्युरिति वाच्यम्। विभूनां महत्त्वाभ्युपगमे महत्त्वाभावाभावत्वेन हेतुत्वकल्पनायां कारणतावच्छेदके गौरवात् अणूनां परिमाणाभ्युपगमे तादृशविजातीयपरिमाणाभावत्वेन हेतुत्वे लाघवात्। इत्थं च द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति अणुपरिमाणस्यैव समवायसम्बन्धेनाभावो हेतुरभ्युपेयते। वस्तुतस्तु मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य हेतुत्वकल्पनान्नानुपपत्तिः। मूर्तत्वजात्यनभ्युपगमे ऽपि द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य हेतुताबलान्नात्ममहत्त्वसिद्धिः। गुरुत्वादेः प्रत्यक्षतावारणाय लौकिकप्रत्यक्षत्वावच्छिन्नं प्रति लौकिकविषयताया हेतुत्वकल्पनस्यावश्यकतया तेनैव परमाण्वादिप्रत्यक्षवारणसम्भवे महत्त्वहेतुताकल्पनस्य निर्युक्तिक-

द्रव्यत्वस्य त्रुटित्वादेरिव परिमाणस्यासाधकत्वात् । तस्य चापरिमितावृत्तित्वमसिद्धम् ।

त्वात् । न चैवं सति उपदर्शितस्पार्शनादिविषयत्वाभावाभावादिहेतुताकल्पनं निर्युक्तिकमिति वाच्यम् । तावताप्यभावात् । न चान्योन्याश्रयान्नोपदर्शितकार्यकारणभावकल्पनं सम्भवदुक्तिकमिति वाच्यम् । विषयताया नित्यत्वेनोत्पत्तावन्योन्याश्रयाभावात् । परमाणुद्व्यणुकानङ्गीकर्तॄणां नव्यानां मते तु महत्त्वकल्पनैव नास्ति आपत्त्यभावात् । तथा च जीवात्मन्यपि महत्त्वाङ्गीकारो निर्युक्तिक एवेति निपुणतरमालोचयामः । ननु द्रव्यत्वेन हेतुना परिमाणवत्त्वं साध्यमित्यत आह । **द्रव्यत्वस्येति** । अप्रयोजकत्वादित्यादिः । प्राचीनाः पृथिव्यादीनां रूपादिमत्त्वनियमात् घ्राणेन्द्रियादावपि अतीन्द्रियरूपादिकं स्वीकुर्वन्ति तन्मते च घ्राणेन्द्रियादीनामपि रूपवत्त्वान्महत्त्ववत्त्वाच्चाक्षुषापत्तिरिति तद्वारणायानायत्या उद्भूतरूपस्यैव हेतुत्वमभ्युपेयते । अथ तस्य हेतुता नोद्भूतरूपत्वेन उद्भूतत्वानिर्वचनात् । न चोद्भूतरूपत्वं जातिः नीलत्वादिना साङ्कर्यात् । तथाहि नीलत्वजातिः उद्भूतत्वाभाववत्घ्राणेन्द्रियनीलवृत्तिः इयं तु घटादिपीतवृत्तिः घ्राणेन्द्रियनीलव्यावृत्ता घटादिवृत्तिनीलादौ तयोः सङ्कर इति । न चोद्भूतत्वं नानैव नीलत्वशुक्लत्वादिव्याप्यभेदादिति वाच्यम् । व्यभिचारात् तादृशधर्मावच्छेदेन कारणत्वकल्पनासम्भवात् । न च नीलप्रत्यक्षं प्रति नीलत्वव्याप्योद्भूतत्वेन शुक्लप्रत्यक्षं प्रति शुक्लत्वव्याप्योद्भूतत्वादिना हेतुत्वकल्पनान्न व्यभिचार इति वाच्यम् । आविनीलादिविषयकपीतघटप्रत्यक्षस्य विषयतासम्बन्धे-

नेदृशघटेप्युत्पत्तेस्तत्र चोद्भूतनीलाभावेन व्यभिचारात्। न च नीलशुक्लादिविषयकचाक्षुषत्वादेर्जन्यतावच्छेदकत्वान्न दोष इति वाच्यम्। अन्यदीयनीलादिविषकपीतघटप्रत्यक्षस्य विषयतासम्बन्धेन तादृशघटेप्युत्पत्तेस्तत्र चोद्भूतनीलाभावेन व्यभिचारात्। न च नीललौकिकविषयतायाः कार्यतावच्छेदकत्वाददोष इति वाच्यम्। अनुभूयमाननीलाद्यारोपे व्यभिचारात्। न च स्वविषयीभूतनीलवद्वृत्तिविषयतायाः प्रत्यासत्तित्वात् पीतघटनिष्ठविषयतायाश्च स्वविषयनीलासमानाधिकरणत्वान्न दोष इति वाच्यम्। तदीयरूपादिग्रहप्रतिबन्धकसमवधानकालीनरूपान्तरविषयकभ्रमस्यासंग्रहप्रसङ्गात्। वैशेषिकमते एकस्मिन्नवयविनि नानारूपाभावात् नीलवत्प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वसम्भवे ऽपि तादृशोद्भूतनीलवत्प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वमादाय विनिगमनाविरह इति। न चोद्भूतत्वव्याप्यं नीलत्वमेकमस्तु तद्विरुद्धमपरमिति नीलत्वादिकं नानैवेति वाच्यम्। तथा सति विजातीयोद्भूतनीलत्वावच्छिन्नं प्रति उद्भूतनीलत्वादिनैवासमवायिकारणस्य हेतुता स्यादिति उद्भूतनीलेनानुद्भूतनीलानारम्भापत्तेः। तद्विरुद्धवैजात्याच्छिन्नं प्रत्यपि अनुद्भूतनीलत्वादिना हेतुत्वकल्पने कार्यकारणभावबाहुल्यापत्तेरिति। मैवम् अनुद्भूतनीलेष्वेव नीलत्वादिव्याप्यजातीः कल्पयित्वा तदवच्छिन्नाभावादीनामेव चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वकल्पनात्। तथा च नीलादिजन्यतावच्छेदकजातिव्याप्याः षट् जातयः। पाकजन्यतावच्छेदकव्याप्याश्च षट् जातय इति तदवच्छिन्नाभावकूट एव प्रत्यक्षे हेतुः। नीलादिजन्यतावच्छेदिकाः षट् पाकादिजन्यतावच्छेदिकाश्च षडिति चतुर्विंशतिः नीलत्वादयश्च षट्। न चानुद्भूतत्वं नीलजन्यपाकजन्यनील-

साधारणमेवैकम् नीलादिजन्यतावच्छेदकजातिस्तु नानैवेत्येवं किं न स्यादिति वाच्यम् । तथा सति नीलजन्यतावच्छेदिका द्वादश पाकजन्यतावच्छेदिकाश्च द्वादश नीलत्वादयोऽनुद्भूतत्वानि चेति द्वादशेति जातिकल्पनाया आधिक्यात् । वस्तुतस्तु घ्राणेन्द्रियादौ पाकानभ्युपगमात् नीलादिजन्यतावच्छेदकजातिव्याप्याः षट् एवानुद्भूतत्वजातयः शुक्लत्वादिव्याप्यैव वा अनुद्भूतत्वजातिः घ्राणेन्द्रियादौ शुक्लरूपस्यैवाभ्युपगमात् । न च नीलत्वादिप्रत्येकव्याप्यत्वमादाय विनिगमनाविरह इति वाच्यम् । रसनादौ शुक्लरूपस्यैव सत्त्वेन तत्र पृथिवीत्वासम्भवात् । न च घ्राणेन्द्रियादावपि पाकादिना नीलाद्युत्पत्तौ बाधकाभाव इति वाच्यम् । तत्र तथापाकानभ्युपगमात् । एवं च शुक्लरूपदशायामेव परमाणुर्घ्राणारम्भक इति नानुपपत्तिगन्धोपि । अथवा घ्राणादिरूपादिषु अनुद्भूतत्वजातिरेव नाभ्युपेयते । स्पार्शनचाक्षुषसाधारणप्रत्यक्षत्वावच्छिन्नं प्रति अनुद्भूतानुष्णाशीतस्पर्शत्वेन प्रतिबन्धकत्वकल्पनादेव तच्चाक्षुषादिवारणात् । एवमनुद्भूतशीतोष्णस्पर्शयोरपि स्पार्शनं प्रति प्रतिबन्धकत्वात् न रसनेन्द्रियप्रभास्पार्शनापत्तिः । अनुद्भूतशुक्लस्य चाक्षुषाप्रतिबन्धकत्वाच्च चक्षुरिन्द्रियादीनां न चाक्षुषमिति चत्वार एव कार्यकारणभावाः । अथ नियतारम्भकत्वे प्रत्यक्षं प्रति घ्राणनीलादेः प्रतिबन्धकत्वे नीलपीतादिसाधारणमनुद्भूतत्वमेकमेव नीलत्वादिकं तु नानास्तु अनुद्भूतत्वस्य नानात्वे प्रत्यक्षस्थलीयकारणताबाहुल्यापत्तेः । नीलत्वादेर्नानात्वे ऽसमवायिकारणतायाबाहुल्ये ऽपि प्रत्यक्षकार्यकारणभावे कारणतावच्छेदकगौरवेण तादृशकारणताया आधिक्ये ऽतिगौरवादिति चेत् न एतन्मते जातिक-

ल्पनाया आधिक्यात् कारणताकल्पनाया आधिक्याच । तथाहि अनुद्भूतत्वमेकं नीलत्वादयो नीलादिजन्यतावच्छेदकजातयश्च तद्व्याप्यविरुद्धमेवेन द्वादश पाकजन्यतावच्छेदिका अपि व्याप्यविरुद्धभेदेन द्वादशेति सप्तत्रिंशज्जातयः। प्रत्यक्षानुद्भूतरूपाभावयोरेकः कार्यकारणभावः नीलादीनां द्वादश पाकस्य द्वादशेति पञ्चविंशतिकार्यकारणभावाः। अनुद्भूतत्वजातेर्नानात्वकल्पने ऽपि नीलत्वादयः षट् जातयः नीलजन्यतावच्छेदकजातयश्च षट् पाकजन्यतावच्छेदकजातयश्च षट् अनुद्भूतत्वानि द्वादश पाकजन्यतावच्छेदकजातिव्याप्यविरुद्धभेदेनेति त्रिंशज्जातयः। रूपपाकयोर्द्वादश अनुद्भूतरूपाभावस्य प्रत्यक्षं प्रति द्वादशकार्यकारणभावा इति चतुर्विंशतिरेव। न चैवमेतत्कल्पे घ्राणादौ पाकानभ्युपगमे क्षतिविरहेण पाकजन्यतावच्छेदकजातयस्तत्कार्यकारणभावाश्च षडेवेति वाच्यम्। घ्राणारम्भकपरमाणुनीलानां पाकजन्यत्वस्यावश्यकत्वात् तत्र चानुद्भूतत्वजातेरस्वीकारे ततोऽनुद्भूतरूपानारम्भापत्तेः तत्स्वीकारस्यावश्यकतया घटादिनीलपरमाणुनीलादिसाधारणैकजन्यतावच्छेदकजात्यभ्युपगमे ऽनुद्भूतत्वजात्या साङ्कर्यं स्यादिति। तत्र पाकजन्यतावच्छेदकजात्यन्तराणां तदवच्छिन्नं प्रति पाकस्य कारणत्वान्तरकल्पनायाश्चावश्यकत्वात्। अत एव नियतारम्भकल्पे उद्भूतत्वजातिरेका नीलत्वं तु तद्व्याप्यविरुद्धभेदेन नानेत्यपि परास्तम्। केचित्तु घ्राणादिरूपादौ नीलत्वादिजातिसत्त्वे मानाभावात् नीलत्वादिविरुद्धमेवानुद्भूतत्वमेकं तदवच्छिन्नाभावस्यैकमेव हेतुत्वम्। वस्तुतस्तु तद्व्यापकमुद्भूतत्वमेव जातिः अनुद्भूतत्वस्य तथात्वे तदवच्छिन्नाभावरूपयोर्हेतुताद्वयकल्पनापेक्षया उद्भूतत्वेनैव हेतुत्वकल्पनाया उचितत्वादिति।

रूपादीनां च नेन्द्रियग्रहणायोग्यत्वम् । वाय्वादौ रूपं[१] नास्तीति सार्वलौकिकप्रत्ययात्[२] । अन्यथातीन्द्रियप्रतियोगिकत्वेन पिशाचात्यन्ताभावस्येव[३] तत्सामान्याभावस्याप्रत्यक्षताप-

---

अथवानुष्णाशीतत्वव्याप्यपृथिवीस्पर्शमात्रवृत्तिजातिविशेषं कल्पयित्वा तादृशविजातीयस्पर्शत्वेन पृथिवीप्रत्यक्षं प्रति चाक्षुषस्पार्शनसाधारण एकः कार्यकारणभावः कल्प्यते एवं जलतेजोवृत्तिजातिविशेषं कल्पयित्वा तादृशवैजात्यावच्छिन्नचाक्षुषं प्रति शुक्लत्वव्याप्योद्भूतत्वेन हेतुता । एवं जलस्पार्शनं प्रति उद्भूतशीतत्वेन एवं तेजःस्पार्शनं प्रति उद्भूतोष्णस्पर्शत्वेन हेतुता कल्प्यते । उपदर्शितप्रत्यक्षत्वावच्छिन्नं प्रति अनुद्भूतोष्णस्पर्शादिना प्रतिबन्धकत्वकल्पनेऽपि चक्षुर्द्वयकार्यकारणभावसाम्येऽपि रूपस्य हेतुत्वकल्पनाया आधिक्येन गौरवादिति वदन्ति इति । प्राचीनमतं दूषयति । **रूपादीनामित्यादिना । ग्रहणायोग्यत्वम्** लौकिकसाक्षात्कारस्वरूपायोग्यत्वम् । तथा च रूपादिकं जन्यसाक्षात्कारयोग्यं न वेति विप्रतिपत्तिः । अत्र च विधौ पक्षतावच्छेदकरूपत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् नांशतः सिद्धसाधनं दोषः । निषेधे सामानाधिकरण्येन सिद्धेरुद्देश्यत्वान्नांशतो बाधो दोषः । साक्षात्कारे जन्यत्ववि-

---

(१) रूपादिकं-पा० ३ पु० ।

(२) प्रत्यक्षात्-पा० ३ पु० ।

(३) पिशाचप्रतियोगिकस्यात्यन्ताभावस्येव-पा० १ पु० ।

शेषणात् नेश्वरप्रत्यक्षमादाय बाधः योग्यत्वप्रवेशेन जन्यप्रत्यक्षागोचरतृतीयक्षणादिविनष्टरूपादिव्यक्तिविशेषे न बाधः । योग्यत्वं च द्रव्यत्वव्याप्यव्याप्ययोग्यजातिसामानाधिकरण्यम् अयोग्यजात्यसामानाधिकरण्यं वा । प्राचीनमते रूपादीनामयोग्यचक्षुष्ट्वादिजातिसामानाधिकरण्याभ्युपगमेन सिद्धिसाधनानवकाशात् । रूपत्वादिकमिन्द्रियाग्राह्यवृत्ति न वेत्यादयोऽपि बोध्याः । अथावयवरूपादिना चक्षुरादौ रूपादिजनने बाधकाभाव इति चेत् । न रूपत्वाद्यवच्छिन्नं प्रति चक्षुष्ट्वादिना प्रतिबन्धकत्वकल्पनात् । न च तदेव गौरवमिति वाच्यम् । भवन्मतेऽप्यनुद्भूतरूपादीनां घटादावुत्पत्तिवारणाय तत्र चक्षुरादीनां हेतुत्वकल्पनाया आवश्यकत्वात् । न च रूपादिकं प्रति चक्षुर्भिन्नत्वादिना कारणत्वे ऽवच्छेदकगौरवादिति तदपेक्षया लाघवात् अनुद्भूतरूपं प्रति चक्षुष्ट्वादिना(१) हेतुत्वं कल्पयितुमुचितमिति वाच्यम् । भर्जनकपालस्थवह्न्यादौ अनुद्भूतरूपोत्पत्त्या व्यभिचारात् चक्षुःसमवेतानुद्भूतरूपत्वादीनामेव भवन्मते चक्षुरादिजन्यतावच्छेदकत्वस्वीकारेण गौरवात् । न चानुद्भूतरूपानङ्गीकारमते रूपत्वस्य नित्यसाधारणतया जन्यतानवच्छेदकत्वेन जन्यरूपत्वादिकमेव जन्यतावच्छेदकं वाच्यम् । तत्र च जन्यत्वं प्रागभावप्रतियोगित्वं कालिकसम्बन्धेन घटत्वादिमत्त्वं वेति विनिगमनाविरहेणातीव गौरवमिति वाच्यम् । पृथिवीरूपवृत्तिवैजात्यस्य शुक्लत्वव्याप्यजातेश्चेन्द्रियादिप्रतिबध्यतावच्छेदकत्वात् । प्रत्यक्षं प्रत्युनुद्भूताभावहेतुत्वस्यानुद्भूतरूपादिनियामककारणत्वकल्पनापेक्षया अनन्तरूपादीनां च क-

(१) रूपादिकं प्रति चक्षुर्व्यभिचारात् चक्षुःसमवेतानुद्भूतरूपत्वादीनामेव चक्षुष्ट्वादीनां हेतुत्व-पा० ३ पु० ।

त्तिः । अतीन्द्रियानन्तस्पर्शकोटिकल्पनामपेक्ष्य लाघवात्[1] मूर्तत्वेनैव द्रव्यसमवायिकारणत्वम् ॥

मूर्तत्वं तु स्पन्दसमवायिकारणतावच्छेदको

पनापेक्षया एतत्कल्पनाया एवोचितत्वात् । अथ तत्तज्जातिविशेषावच्छेदेन रूपस्य नित्यस्पर्शव्यावृत्तजातिविशेषावच्छेदेन स्पर्शस्य च पृथक्पृथक्कार्यत्वाभ्युपगमे कार्यकारणभावबाहुल्यापेक्षया चाक्षुषस्पार्शनसाधारणप्रत्यक्षत्वावच्छिन्नं प्रति चक्षुरादीनां प्रतिबन्धकत्वं समुचितम् । तथा चावयवरूपादिना चक्षुरादौ रूपादिकं जन्यत एव तेषां च चाक्षुषाभावादिना प्रतिबन्धकत्वान्न चाक्षुषापत्तिः। अनुद्भूतत्वादिजात्यनभ्युपगमाच्च न तदवच्छिन्ननियामककारणत्वादिकल्पनागौरवम् । अनुद्भूतत्वव्यवहारश्चायोग्यत्वनिबन्धन इति चेत् । न चक्षुराद्यारम्भकपरमाणूनां नीरूपत्वा[2]द्यभ्युपगमे क्षतिविरहात् तादृशपरमाणुभिश्च रूपवद्द्रव्यान्तरानारम्भादिति सङ्क्षेपः । ननु जन्यद्रव्यत्वावच्छिन्नं प्रति स्पर्शवत्त्वेन समवायिकारणत्वात् चक्षुराद्यवयवानामनुद्भूतस्पर्श आवश्यकः तादृशहेतुत्वाकल्पने गगनादिना द्रव्यारम्भापत्तेरत आह । **अतीन्द्रियेति** । अतिरिक्तमनसोऽनभ्युपगमेनेदम् ॥

ननु तादृशजातिरप्रामाणिकीत्यत आह । **मूर्तत्वं त्विति** । स्पन्दत्वावच्छिन्नं प्रति मूर्तत्वेन हेतुत्वाकल्पने

(१) अनन्तस्पर्शमपेक्ष्य लाघवात्–पा० १ पु । (२) नानारूपत्वा–पा ३ पु० ।

जातिविशेषः । भूतत्वमपि तदेव । समवेतेन्द्रियग्राह्यगुणवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं

गगनात्मादिष्वपि स्पन्दापत्तेरिति भावः । वस्तुतस्तु तादृशयुक्तिरकिञ्चित्करी । गगनादौ स्पन्दासमवायिकारणविजातीयाभिघातादीनामनभ्युपगमादेव तत्र तदापत्त्यभावात् । न च क्रियाविशेषं प्रति प्रयत्नवदात्मसंयोगादीनां हेतुत्वकल्पनात् तादृशसंयोगस्य च आत्मन्यपि सत्त्वात् तत्र स्पन्दवारणाय आत्मभेदविशिष्टसंयोगहेतुत्वकल्पनायां विनिगमनाविरहेण तादृशकारणताद्वयकल्पनादवच्छेदकगौरवाच्च तदपेक्षया मूर्तत्वेन हेतुताकल्पनस्यैवोचितत्वात्(१) तादृशजातिसिद्धिरिति वाच्यम् । तत्र विजातीयसंयोगसम्बन्धेनात्मन एव हेतुत्वकल्पनात् तेन सम्बन्धेन स्वस्मिन् स्वासत्त्वादेवापत्त्यभावादिति बोध्यम् । परं तु वायुप्रत्यक्षानङ्गीकारकल्पे रूपस्यात्मभिन्नद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वकल्पने ऽवच्छेदकगौरवात् मूर्तप्रत्यक्षत्वस्यैव तज्जन्यतावच्छेदकत्वौचित्यात् तादृशजातिसिद्धिः । न च मानसव्यावृत्तप्रत्यक्षनिष्ठजातिविशेष एव सिद्ध्यति तज्जन्यतावच्छेदकतयेति किं मूर्तत्वजात्येति वाच्यम् । विनिगमनाविरहेणैव तत्सिद्धेरिति । ननु भूतत्वेन सह तुल्यव्यक्तिवृत्तितया कथं मूर्तत्वं जातिरित्यत आह । **भूतत्वमपि तदेवेति** । मनसो गगनस्य चानभ्युपगमादिति भावः । **समवेतेति**। आत्मत्वजातिमादायात्मन्यतिव्याप्तिवारणाय वृत्त्यन्तम् तत्रैवातिव्याप्तिवारणाय समवेतेतीन्द्रियविशेषणम् । सत्तादिजातिमादायाति-

(१) हेतुत्वकल्पनाया एव समुचितत्वात्-पा. २ पु. ।

तदित्यपि केचित् । अन्त्यावयविनिरासस्त्वा-
वयोः समानः ॥

व्याप्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यवृत्त्यन्योन्याभावप्र-
तियोगितावच्छेदकत्वार्थकम्। घटात्मसंयोगादिकमादाया-
तिप्रसङ्गवारणाय जातीति नित्यत्वार्थकम्। तद्वत्त्वं च सम-
वायेन बोध्यमिति। **तत् मूर्तत्वम्**। केचिदित्यनेनास्वरसः
सूचितः। स च तादृशोपाध्यपेक्षया लाघवादावश्यकक्लृप्त-
जातिविशेषस्यैव भूतपदशक्यतावच्छेदकत्वमुचितमिति।
ननु मूर्तत्वजातेर्द्रव्यसमवायिकारणतावच्छेदकत्वे ऽन्त्या-
वयविनापि द्रव्यारम्भापत्तिरित्यत आह। **अन्त्यावय-
वीति। समान इति**। स्पर्शवत्त्वेन कारणताया अपि
सहकार्यन्तरविरहेणान्त्यावयविनि न द्रव्योत्पत्तिरित्य-
वश्यं वाच्यत्वात्। सहकार्यन्तरं चान्त्यावयविभेदादि।
अथान्त्यावयवित्वस्यैकस्याभावात् कथं तदवच्छिन्नभेद-
त्वेन हेतुता। न च द्रव्यसमवाय्यन्यत्वं तत्। इतरकार-
णसत्त्वे द्रव्यसमवाय्यन्यत्वस्य प्रयोजकत्वाभावात्। यद्धि-
रहप्रयुक्तं तस्य द्रव्यवदन्यत्वं तादृशकारणस्यावश्यं वाच्य-
त्वात्। अन्यथा चाक्षुषादिकं प्रति चाक्षुषविषयान्यत्वा-
दिना प्रतिबन्धकत्वादेव नीरूपादीनां चाक्षुषवारणोपपत्तौ
रूपादिमहत्त्वादिहेतुताविलयप्रसङ्गात्। अन्यत्र च बहुतर-
कारणताविलयप्रसङ्गादिति चेत्। न अनायत्याघटत्वा-
दिना विशिष्य प्रतिबन्धकतायाः स्वीकारात्[1]। अथवा

(१) प्रतिबन्धकत्वस्वीकारात्–पा॰ २ पु॰।

पृथक्त्वमपि न गुणान्तरम् । अन्योन्याभावादेव पृथक्त्वव्यवहारोपपत्तेः । पृथक्त्वप्रतीतिस्तु

जन्यद्रव्यत्वावच्छिन्नं प्रति विजातीयैकत्ववत्त्वेनैव हेतुत्वमभ्युपेयते । अन्त्यावयविनामेकत्वे तादृशवैजात्यानभ्युपगमादेव न तत्र द्रव्योत्पादापत्तिरिति । प्रागभावविरहेण न द्रव्योत्पाद इत्यन्ये । वस्तुतस्तु विजातीयसंयोगरूपासमवायिकारणविरहादेव न तत्र द्रव्योत्पाद इति समीचीनम् ॥

पृथक्त्वस्य गुणत्वं निराकरोति । **पृथक्त्वमपीत्यादि ।** घटात्पटः पृथगिति प्रतीतिप्रकारोपि गुणपदवाच्यो नेत्यर्थः । प्रमाणाभावादिति भावः । यत्तु न गुणान्तरमित्यस्य गुणत्वजात्यभाववदित्यर्थ इति । तन्न गुणत्वे जातित्वस्याग्रे निराकर्तव्यतया(१) तथा व्याख्यातुमशक्यत्वात् । ननु पृथग्व्यवहारविषयस्यान्यत्र कुत्राप्यन्तर्भावासम्भवेनान्यथानुपपत्त्या गुणपदवाच्यताभ्युपगम आवश्यक इत्यत आह । **अन्योन्येति ।** ननु पृथक्त्वं नाभावः सावधिकत्वादित्यनुमानेन तत्राभावत्वाभावनिर्णयेन नाभावपदार्थान्तर्गततेत्यत आह । **पृथक्त्वप्रतीतिस्त्वति । न सावधित्वावलम्बनेति ।** न सावधित्वविशिष्टधर्मविषयिणीत्यर्थः । तथा चोपदर्शितानुमानेहेत्वसिद्धिरिति भावः । ननु पृथक्त्वस्य सावधित्वानङ्गीकारे घटात् पटः पृथगित्यत्र पञ्चम्यर्थावधित्वान्वयानुपपत्तिस्तथा च पृथक्पद-

(१) गुणत्वप्रातेरवे निराकर्तव्यत्वेन-पा० ३ पु० ।

विनापि व्यावर्तकं धर्मं परेषां विशेषाणामिव
नित्यानां द्रव्याणामपि स्वत एव व्यावर्तकत्वा-
त्[1] । योगिनोऽतिरिक्तं विशेषमीक्षन्ते[2] । एवं
तर्हि त एव सशपथं पृच्छन्तां किमेते ऽतिरिक्तं

त्तादिकमादाय सिद्धसाधनवारणाय परस्परासमवेतेति ।
एकत्वादिकमादाय सिद्धसाधनवारणाय समवेतशून्येति ।
प्रमेयत्वादिकमादाय तद्वारणाय समवायीति । अभावे
व्यभिचारवारणाय हेतौ समवायित्वे सतीति । घटपट-
समवायित्वविशिष्टाया अभावव्यावृत्तेः कपालतन्त्वादौ
सत्त्वेन हेतुसत्त्वात् साध्यासत्त्वेन व्यभिचारः स्यादतो
हेतौ समवायीति । तथा च तादृशव्याप्तिबलात् सजा-
तीयनित्यद्रव्ययोः परस्परासमवेतसमवेतशून्यधर्मसिद्धौ
अर्थादतिरिक्तविशेषसिद्धिरत आह । विनापीति ।
व्यावर्तकं धर्ममिति । समवायेन व्यावर्तकं धर्ममि-
त्यर्थः । परेषाम् । अतिरिक्तविशेषस्वीकर्तॄणाम् । स्वत
एवेति । तादात्म्येनैवेत्यर्थः । व्यावर्तकत्वादिति ।
परस्परव्यावृत्तिबुद्धिजननादित्यर्थः । तथा चोपदर्शितव्या-
प्तेरप्रयोजकतया शशविषाणतुल्यैव तर्करसिकानामिति
भावः । नन्वतिरिक्तविशेषसिद्धिर्योगिनां प्रत्यक्षबलादि-
त्याशङ्कते । योगिन इति । काका समाधानं क्रियते ।
एवं तर्हीति । तथा च तेषां तद्विषयकप्रत्यक्षे मानाभा-

(१) व्यावृत्तत्वात्-पा॰ १ । २ । ३ पु॰ ।
(२) प्रत्यक्षत पश्यन्ति चेत्-इत्यधिकम् ३ पु॰ ।

तथाविधव्यवहारोपपत्तेः । अत्राद्ये तृतीयमपेक्षते । अन्त्ये तु परस्पराश्रयमिति विवेकः ।

विशेषोऽपि च न पदार्थान्तरं मानाभावात् ।

संयोगाभ्यामित्यर्थः । तथा च विप्रकृष्टत्वसन्निकृष्टत्वयोः परापरबुद्धिप्रकारतया दैशिकपरत्वापरत्वे संयोगातिरिक्तगुणरूपे न सिद्ध्यत इति भावः । **ज्येष्ठत्वकनिष्ठत्वाभ्याम्** तत्प्रागभावाधिकरणक्षणवृत्तित्वरूपज्येष्ठत्व-तदुत्पत्तिक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वरूपकनिष्ठत्वाभ्याम् । तथा च ज्येष्ठत्वकनिष्ठत्वयोः परापरबुद्धिप्रकारतया न कालिकपरत्वापरत्वे गुणरूपे सिद्ध्यत इति भावः । **तथाविधव्यवहारोपपत्तेः** । उपदर्शितस्थलेषु परापरव्यवहारोपपत्तेरित्यर्थः । **आद्ये** दर्शितविप्रकृष्टत्वसन्निकृष्टत्वे । **तृतीयम्** । तृतीयदेशम् । **अपेक्षत इति** । प्रयागतः काशीविप्रकृष्टा मथुरा मथुरातः काशीसन्निकृष्टः प्रयाग इति व्यवहारादिति भावः । **अन्त्ये** ज्येष्ठत्वकनिष्ठत्वे । **परस्पराश्रयमिति** । अपेक्षते इत्यनुषङ्गः । तथा च ज्येष्ठत्वव्यवहारेण कनिष्ठत्वाश्रयो विषयीक्रियते । कनिष्ठत्वव्यवहारेण ज्येष्ठत्वाश्रयो विषयीक्रियते । लक्ष्मणात् रामो ज्येष्ठः रामात्कनिष्ठो लक्ष्मण इति व्यवहारादिति भावः ।

विशेषोऽपि न पदार्थान्तरमिति । न द्रव्यादिपञ्चभिन्नो भाव इत्यर्थः । ननु समवायित्वे सति समवायि यद्व्यक्तेर्यद्व्यावृत्तं तत्परस्परासमवेतसमवेतशून्यधर्मसमवायीतिव्याप्तिर्घटपटादाववधारिता । अत्र च स

विनापि व्यावर्तकं धर्मं परेषां विशेषाणामिव नित्यानां द्रव्याणामपि स्वत एव व्यावर्तकत्वा-त्[1]। योगिनोऽतिरिक्तं विशेषमीक्षन्ते[2]। एवं तर्हि त एव सशपथं पृच्छ्यन्तां किमेते ऽतिरिक्तं

त्वादिकमादाय सिद्धसाधनवारणाय परस्परासमवेतेति। एकत्वादिकमादाय सिद्धसाधनवारणाय समवेतशून्येति। प्रमेयत्वादिकमादाय तद्वारणाय समवायीति । अभावे व्यभिचारवारणाय हेतौ समवायित्वे सतीति । घटपट-समवायित्वविशिष्टाया अभावव्यावृत्तेः कपालतन्त्वादौ सत्त्वेन हेतुसत्त्वात् साध्यासत्त्वेन व्यभिचारः स्यादतो हेतौ समवायीति । तथा च तादृशव्याप्तिबलात् सजातीयनित्यद्रव्ययोः परस्परासमवेतसमवेतशून्यधर्मसिद्धौ अर्थादतिरिक्तविशेषसिद्धिरत आह । विनापीति । **व्यावर्तकं धर्ममिति** । समवायेन व्यावर्तकं धर्ममि-त्यर्थः। **परेषाम्** । अतिरिक्तविशेषस्वीकर्तॄणाम् । **स्वत एवेति** । तादात्म्येनैवेत्यर्थः । **व्यावर्तकत्वादिति** । परस्परव्यावृत्तिबुद्धिजननादित्यर्थः । तथा चोपदर्शितव्या-प्तेरप्रयोजकतया शशविषाणतुल्यैव तर्करसिकानामिति भावः । नन्वतिरिक्तविशेषसिद्धिर्योगिनां प्रत्यक्षबलादि-त्याशङ्कते । **योगिन इति** । काका समाधानं क्रियते । **एवं तर्हीति** । तथा च तेषां तद्विषयकप्रत्यक्षे मानाभा-

---

(१) व्यावृत्तत्वात्-पा० १।२।३ पु० ।
(२) प्रत्यक्षत यदीति चेत्-प्रत्यधिकम् ३ पु० ।

विशेषमीक्षन्ते न वेति ॥

रूपादिकं चाव्याप्यवृत्त्यपि सविषयावृत्ते-र्व्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तिताविरोध-स्तु निष्प्रामाणिकः। पक्के च घटे रक्तप्रतीतिर्ना-प्रमा बाधकाभावात्। उपलभ्यते च भग्ने तस्मि-न्नन्तःश्यामत्वम्। स्मृतिरपि।
लोहितो यस्तु वर्णेन मुखे पुच्छे तु पाण्डुरः।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥ इति

भावादिति भावः।

रूपादेरव्याप्यवृत्तित्वं व्यवस्थापयति। **रूपादिक-मिति**। ननु रूपादेरव्याप्यवृत्तित्वाङ्गीकारे सविषयावृ-त्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वाभावनियम-भङ्गप्रसङ्ग इत्यत आह। **सविषयावृत्तेरित्यादि**। तथा च प्रमाणाभावेन तादृशव्याप्तेरभावात् न कोपि दोष इति भावः। ननु तथापि रूपादेरव्याप्यवृत्तित्वे प्रमाणाभाव इत्यत आह। **पक्के ऽपीत्यादि**। **श्यामत्वं** नीलरूपम्। तथा चैकस्मिन्नधिकरणे उपलभ्यमानयोरेककालावच्छेदेन विरुद्धयोः रक्तनीलयोरवच्छेदकभेदं विना अनुपपन्नतया अवच्छेदककल्पनस्यावश्यकतया किमवशिष्टमव्याप्यवृ-त्तित्वे इति भावः।

रूपादेरव्याप्यवृत्तितायां लौकिकप्रमाणमुक्त्वा स्मृति-रूपशब्दप्रमाणमप्याह। **लोहित इत्यादि**।

चित्रमपि नातिरिक्तं रूपं समानाधिकरणविजातीयरूपसमुदायादेव तथाविधव्यवहारोपपत्तेः नीलादेर्नीलाद्यतिरिक्तरूपाजनकत्वाच्च ॥

नानाजातीयरूपवदवयवारब्धघटादौ अतिरिक्तचित्ररूपवादिनां प्राचां मतं दूषयति । **चित्रमपीति** । ननु अतिरिक्तचित्ररूपानङ्गीकारे चित्रं रूपमिति प्रतीतेः का गतिरित्यत आह । **समानाधिकरणेत्यादि** । विजातीयरूपसमुदायात् अव्याप्यवृत्तिनीलपीतादिसमूहादित्यर्थः । **तथाविधव्यवहारोपपत्तेः** । चित्रमिति प्रतीत्युपपत्तेरित्यर्थः । ननु चित्रमिति प्रतीतीनां सर्वत्र नानारूपविषयकत्वकल्पने गौरवात् तदपहाय लाघवादतिरिक्तैकचित्रविषयकत्वकल्पनाया एवोचितत्वादिति तादृशप्रतीतिविषयतयातिरिक्तचित्ररूपसिद्धिरप्रत्यूहैवेत्यत आह । **नीलादेरित्यादि** । नीलादेर्नीलाद्यतिरिक्तरूपाजनकत्वनियमाच्चेत्यर्थः । तथा चातिरिक्तचित्ररूपस्वीकारे तादृशनियमभङ्ग इति नानाजातीयरूपवदवयवारब्धे घटादौ अव्याप्यवृत्तिनानारूपस्वीकार एवोचित इति भावः ।

अत्र प्राचीनमतानुयायिनः । दर्शितनियमस्याप्रयोजकतया नातिरिक्तचित्रे किञ्चिद्बाधकम् । न च चित्ररूपाङ्गीकारे नीलघटादौ चित्रापत्तिवारणाय चित्रत्वावच्छिन्नं प्रति नीलादिषड्भावानां स्वाश्रयसमवेतत्वप्रत्यासत्त्या अनेकहेतुत्वकल्पने गौरवमिति वाच्यम् । तत्राव्याप्यवृत्तिनानाजातीयरूपाङ्गीकर्तृमतेऽपि नीलाद्यवयवावच्छेदेन पीताद्यापत्तिवारणाय अवच्छेदकतासम्बन्धेन नीलादिकं

प्रति समवायसम्बन्धेन नीलत्वादेर्हेतुत्वकल्पनायाः सा-म्यात् । ननु तथापि कारणतावच्छेदकसम्बन्धादिगौरवा-शङ्काकलङ्कितं चित्ररूपवादिमतमिति चेद्भ्रान्तोसि । न हि वयमुपदर्शितप्रत्यासत्त्या नीलाभावत्वादिना हेतुत्वं चित्रत्वावच्छिन्नं प्रति कल्पयामः येन गौरवावकाशः किं तु स्ववृत्तिप्रागभावप्रतियोगित्वस्वाश्रयसमवेतसमवेतत्व-कालिकविशेषणतैतत्त्रितयसम्बन्धेन रूपविशिष्टचित्ररूपं प्रति स्वसामानाधिकरण्यविशिष्टस्वनिष्ठभेदप्रतियोगिता-वच्छेदकजातिचित्रत्वान्यतराश्रयसमवायिसमवेतत्वस-म्बन्धेन रूपत्वेन हेतुत्वं तत्र नाव्याप्यवृत्तिनानारूपमता-पेक्षया गौरवावकाशः । तन्मते उपदर्शितरीत्या नीलादीनां षट्कार्यकारणभावकल्पनाधिक्यात् । यदि चात्रापि स्वप-दार्थपर्यालोचनक्रमेण किञ्चिद्दोषमुद्भावयसि तथापि चित्ररूपवादिमतमेव समीचीनम् । यथाहि विजातीय-नानारूपवदवयवारब्धे घटादौ अव्याप्यवृत्तिनानाजाती-यरूपाङ्गीकारे नीलावयवावच्छेदेन पीतादिवारणायावच्छे-दकतासम्बन्धेन पीतादिकं प्रति समवायादिना पीतादीनां षट्कार्यकारणभावकल्पने गौरवम् । चित्र-रूपवादिमते तु सर्वनीलादिस्थले चित्रापत्तिवारणाय चित्रत्वावच्छिन्नं प्रति कार्यकालवृत्तितया चित्रेतर-रूपाभावत्वेनैकहेतुत्वकल्पने स्फुटमेव लाघवम् । तथा च लाघवतर्कोपोद्बलकप्रमाणसिद्धचित्ररूपनिराकरणं गीर्वा-णगुरुणाप्यशक्यमित्यवेहि । न च चित्ररूपवादिमते चित्र-घटे नीलाद्यापत्तिवारणाय विजातीयनीलादिकं प्रति नी-लाभावादेः स्वाश्रयसमवेतत्वप्रत्यासत्त्या प्रतिबन्धकत्व-कल्पने गौरवमिति वाच्यम् । तस्योत्तरकालिकत्वेन,

**स्पर्शोऽपि चाव्याप्यवृत्तिः। अन्यथा सुकुमा-
रकठिणाभ्यामवयवाभ्यामारब्धे ऽवयविनि सुकु-
मारावच्छेदेन[१] त्वक्संयोगे काठिन्यस्याप्युपल-
म्भप्रसङ्गः[२] । न च सुकुमारत्वकठिनत्वे संयोग-
विशेषौ चाक्षुषत्वप्रसङ्गात् ॥**

फलमुखतयाऽदोषत्वात्। एवमेतादृशरीत्या चित्रस्पर्शा-
दिकमपि आत्मलाभपदवीं विदधातीत्युक्तमधिकं चित्र-
रूपविचारे ऽनुसन्धेयमिति सङ्क्षेपः ॥

स्पर्शोऽपि चेति। सुकुमारकठिणस्पर्शवदवयवारब्धे
ऽवयविनीत्यादिः। ननु व्याप्यवृत्तय एव स्पर्शास्तत्र
किमिति नाङ्गीक्रियन्ते इत्यत आह । **अन्यथेति ।**
तत्र व्याप्यवृत्तिनानास्पर्शाङ्गीकारे इत्यर्थः। **सुकुमारा-
वच्छेदेनेत्यादि ।** न चाव्याप्यवृत्तिस्पर्शाङ्गीकारेऽप्येष
दोष इति वाच्यम्। सामान्यतोऽव्याप्यवृत्तिस्पार्शनत्वा-
वच्छिन्नं प्रति स्वावच्छेदकावच्छेद्यत्वसम्बन्धेन त्वक्सं-
योगस्य हेतुत्वकल्पनात्। न च व्याप्यवृत्तित्ववादिनापि
कठिनस्पर्शादिस्पार्शनत्वावच्छिन्नं प्रति कठिनस्पर्शादिमद-
वयवावच्छेदेन त्वक्संयुक्तसमवायत्वेन हेतुत्वकल्पनात्
नानुपपत्तिरिति वाच्यम् । तथा सति गौरवप्रसङ्गा-
दिति भावः । ननु सर्वमिदं सुकुमारकठिणभेदेन
पृथिव्याः स्पर्शद्वैविध्ये तदेव तु दुर्लभं सुकुमारत्वक-
ठिनत्वादेः संयोगवृत्तिजातित्वादित्याशङ्क्य निषेधति ।

(१) सुकुमारावयवावच्छेदेन–पा० २ पु० ।
(२) उपलब्धिप्रसङ्गः–पा० ३ पु० ।

रसोऽपि चाव्याप्यवृत्तिः। अन्यथा तिक्तमधुराभ्या[१]मारब्धे ऽवयविनि तिक्तावयवावच्छेदेन रसनायोगे[२] माधुर्यापलम्भप्रसङ्गः। नीरस एव वा तत्रावयवी॥

नचेति। संयोगविशेषाविति। आरम्भकसंयोगवृत्तिजातिविशेषावित्यर्थः।

रसोपि चेति। तिक्तमधुरादिनानारसवदवयवारब्धे घटादावित्यादिः। तत्र व्याप्यवृत्तिरसाङ्गीकारे बाधकमाह। अन्यथेति। अर्थस्तु पूर्ववत्। ननु नानाजातीयरसवदवयवारब्धे ऽव्याप्यवृत्तिनानारसाङ्गीकारो निरर्थकः न च तत्र तथानभ्युपगमे रससाक्षात्कारानुपपत्तिः। चित्ररसमादाय तदुपपत्तेः। न च यत्र द्व्यणुकपर्यन्तं चित्ररसादिस्वीकारस्य गौरवदोषग्रासेन नीरसत्व एव पर्यवसानादिति वाच्यम् तत्रावयवगतरसमादाय तदुपपत्तेः। न च यत्र द्व्यणुकपर्यन्तं नीरसस्तत्र कागतिरिति वाच्यम्। तत्र रसांशे उपनीतभानात्मकपरमाणुगतरसविषयकप्रत्यक्षस्यैवाङ्गीकारादिति मनसि कृत्वाह। नीरस एवेति। तत्रेति। नानारसवदवयवारब्धे ऽवयविनीत्यर्थः। ननु तत्र रसोत्पत्तौ बाधकाभावोऽवयवरसरूपकारणसत्त्वादिति चेन्न। रसत्वावच्छिन्नं प्रति स्वसामानाधिकरण्यविशिष्टस्वविजातीयरससामानाधिकरण्यसम्बन्धेन रसत्वेन प्रतिबन्धकत्वकल्पनादिति भावः। इदं त्वापाततः।

(१) मधुराभ्याम्-इत्यधिकं क्वचित्।

(२) रसनसंयोगे-पा॰ २ पु॰।

एतेन गन्धो व्याख्यातः ॥

कर्मापि चाव्याप्यवृत्ति । चलन्तीषु सर्वासु शाखासु निश्चलमूले वृक्षे[१] चलतीतिप्रत्ययात् । शाखा एव परं चलन्ति न पुनर्वृक्ष इत्यपि प्रत्ययोऽस्तीति चेत् तस्य सर्वावयवावच्छेदेन चलनाभावो विषयो न पुनः सर्वथैव चलनाभावः उक्तप्रत्य-

---

तत्र चित्ररसस्वीकारयुक्तेरुक्तत्वादिति ध्येयम् ॥

एतेनेति । दर्शितक्रमेणेत्यर्थः । गन्धो व्याख्यात इति । नानाजातीयगन्धवदवयवारब्धे ऽवयविनि अव्याप्यवृत्तित्वेन गन्धो व्याख्यात इत्यर्थः । इदमुपलक्षणम् । तत्रावयवी निर्गन्धो वेत्यपि द्रष्टव्यम् ॥

चलतीतिप्रत्ययादिति । तथा च कर्मणोऽव्याप्यवृत्तित्वाङ्गीकारे तत्र तथाविधप्रतीत्यनुपपत्त्या तदव्याप्यवृत्तित्वाङ्गीकार आवश्यक इति भावः । ननु तत्र शाखा एव चलन्ति न वृक्ष इतिबाधकप्रतीतिसत्त्वाच्चलतीति प्रत्ययो भ्रम एवेत्यभिप्रेत्याशङ्कते । शाखा एवेति । इत्यपीति बाधक इति शेषः । तस्य चेति । शाखा एवेत्यादिना दर्शितप्रत्ययस्येत्यर्थः । सर्वावच्छेदेनेति । सर्वावयवावच्छेदेनेत्यर्थः । सर्वथैवेति । सर्वावयवानामवच्छेदकत्वावगाहनं विनेत्यर्थः । उक्तप्र-

---

(१) महीरुहे-पा० च पु० ।

यविरोधात् । अत एव सदा सकम्पोऽश्वत्थ इति प्रसिद्धिरपि । सर्वैश्च नीलैरारब्धे ऽवयविनि नीलान्नीलं स्वस्वावच्छेदेनोत्पद्यमानमविरोधान्नापकमेवोत्पद्यते सजातीयविजातीयेषु नानापदार्थेषु जायमानं समूहालम्बनरूपमिवैकं ज्ञानम् ॥

एकत्वं च न सासमवायिकारणकम् अस[1]-

त्ययविरोधादिति । तथाविधवृक्षे चलतीति प्रत्ययरूपप्रतिबन्धकसत्त्वादित्यर्थः । तथा च तयोः परस्परविरोधेनाप्रामाण्यापत्त्या विषयव्यवस्थया प्रामाण्याभ्युपगम एवोचित इति भावः । अत एव कर्मणो ऽव्याप्यवृत्तित्वादेवेत्यर्थः । ननु भवत्प्रदर्शितरीत्या कर्मणोऽव्याप्यवृत्तित्वं रूपादेरव्याप्यवृत्तित्वं तु प्रतिकूलतर्कग्रस्तत्वाद्धेयमेव । तथाहि नानारूपवदवयवारब्धे घटे ऽव्याप्यवृत्तिनानारूपवत्सर्वनीलावयवारब्धे ऽपि घटे स्वस्वावच्छेदेन नानानीलोत्पादप्रसङ्गोवच्छेदकतासम्बन्धेन नीलजनकस्य नीलस्य तत्र सर्वावयवावच्छेदेन सत्त्वादित्यत आह । सर्वैश्चेत्यादि । स्वस्वावच्छेदेनेत्यनेन व्याप्यवृत्तेरप्यवच्छेदकत्वमङ्गीक्रियत एवेति ध्वनितम् । तथा च तत्र लाघवादेकमेव नीलमङ्गीक्रियत इति भावः ।

अवयव्येकत्वं प्रति अवयवैकत्वहेतुतां खण्डयति । एकत्वं चेति । एकत्वमित्युपलक्षणम् द्वित्वादिकमपि न

(१) स्वासमवायिकारणकम स्याम—पा क्वचित् ।

मवायिकारणत्वेन कारणत्वाभावात् भावकार्य-मात्रस्यासमवायिकारणजन्यत्वे मानाभावात् । द्रव्यनाशे च सर्वत्रासमवायिकारणनाश एव कारणम् नित्यसमवेतद्रव्यनाशे क्लृप्तत्वात् ॥

सासमवायिकारणकमित्यपि बोध्यम् । न च द्वित्वादिकं प्रति एकत्वद्वित्वादेरसमवायिकारणत्वाभावे घटद्वय एव द्वित्वमुत्पद्यते न त्रिष्वित्यत्र नियामकाभाव इति वाच्यम् । तत्र समवायिकारणद्वयस्यैव विशेषतो नियामकत्वसम्भवात् । न च तत्र समवायिकारणद्वयस्य विशेषतो हेतुत्वकल्पने तत्रैकत्वद्वयहेतुताकल्पनमादाय विनिगमनाविरह इति वाच्यम् । तत्तत्समवायिकारणसमवेतरूपादीनां व्यक्तिस्थानीयापत्तिवारणाय तत्तद्व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेन हेतुत्वकल्पनाया आवश्यकत्वस्यैव विनिगमकत्वादिति भावः । **असमवायिकारणत्वेनेति** । आत्माश्रयदोषेणेति शेषः । ननु मास्त्वसमवायिकारणत्वेन कारणत्वं तथापि भावकार्यस्य सासमवायिकारणत्वनियमेनावयवैकत्वं प्रति स्वाश्रयसमवेतत्वसम्बन्धेनावयवैकत्वादिना ऽसमवायिकारणत्वमावश्यकमित्यत आह । **भावकार्यस्येति** । तथा चाप्रयोजकत्वात् उपदर्शितनियम उपेक्षणीय इति भावः । द्रव्यनाशं प्रति असमवायिकारणनाश एव सर्वत्र कारणं न तु समवायिकारणनाश इति व्युत्पादयति । **द्रव्यनाशेति** । असमवायिकारणनाश एवेत्येवकारेण समवायिकारणनाशस्य हेतुत्वव्यवच्छेदः । ननु विनिगमनाविरहेण समवायिकारणनाश-

स्यापि तत्र हेतुत्वमावश्यकमित्यत आह। **नित्यसमवेतेत्यादि**। तथा च द्व्यणुकनाशानुरोधेन द्रव्यनाशं प्रति असमवायिकारणनाशस्य हेतुताया आवश्यकत्वस्यैव विनिगमकत्वादिति भावः॥

अत्र प्राचीनानुयायिनः। स्वातन्त्र्येण चेद्द्रव्यनाशं प्रति समवायिकारणनाशस्य हेतुता कल्प्यते तदैव प्राचीनमते गौरवावकाशः। तदेव न किं तु कपालादिसमवेतरूपादिनाशानुरोधेनावश्यकतया कपालादिसमवेतनाशं प्रति कपालादिनाशहेतुतयैवोपपत्तेः। तथाहि कपालादिनाशस्य कार्यतावच्छेदकं न तत्तद्रूपनाशत्वादिकं गौरवात् किं तु कपालसमवेतनाशत्वं तच्च घटनाशसाधारणमिति कपालादिनाशात् घटनाशोत्पत्तौ बाधकाभावः। अथ कपालादिनाशस्य कार्यतावच्छेदकं न कपालादिसमवेतनाशत्वम् अग्निसंयोगनाश्यकपालादि[१] समवेतरूपनाशे व्यभिचारात्। नाप्यग्निसंयोगजन्यकपालादिसमवेतनाशत्वं तथा उत्तरसंयोगजन्यकपालादिक्रियानाशे व्यभिचारात्। उत्तरत्वस्य दुर्वचतया तद्भेदस्य तत्र निवेशासम्भवात्। संयोगत्वेनानुगतीकृतयोरुत्तरसंयोगाग्निसंयोगयोरजन्यत्वनिवेशस्तु सुदूरपराहतः। कालोपाधिविधया संयोगादिजन्यस्य कपालादिनाशजन्यकपालादिसमवेतनाशस्यासंग्रहप्रसङ्गात्। तथा चानायत्या तत्तद्रूपविनाशं प्रति कपालादिनाशत्वेनैव हेतुता कल्पनीया। तथा च न समवायिकारणनाशाद् द्रव्यनाशसम्भव इति तदनुरोधेनातिरिक्तकार्यकारणभाव आवश्यक इति चेत् न स्वप्रतियोगिसमवेतत्वका-

(१) अग्निसंयोगजन्यकपालादि–पा २ पु०।

द्रव्यस्पार्शनप्रत्यक्षे स्पर्शवत्त्वमेव प्रयोजकम् ।

लिकविशेषणतोभयसम्बन्धेन नाशवान् यस्तद्वृत्तिप्रतियो-
गितासम्बन्धेन नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसम-
वेतत्वसम्बन्धेन कपालादिनाशत्वेन हेतुतायाः क्लृप्तत्वात्
तत्र च नोपदर्शितानुपपत्तिः । पाकादिजन्यरूपादिना-
शस्य तथाविधप्रतियोगितासम्बन्धेनानुत्पत्तेः । केचित्तु
द्रव्यनाशं प्रति समवायिकारणनाशस्य हेतुत्वमते
ऽसमवायिकारणनाशजन्यद्रव्यनाशे व्यभिचारवारणा-
य समवायिकरणनाशाजन्यत्वस्य समवायिकारणनाश-
जन्यतावच्छेदककोटौ निवेशेन गौरवात् सर्वत्रास-
मवायिकारणनाशादेव द्रव्यनाश उचित इत्याहुः ।
तदसत् कपालनाशजन्यारम्भकसंयोगनाशोत्पत्तिकाले
घटादावुपदर्शितकारणसत्त्वेन तथाविधप्रतियोगितासम्ब-
न्धेन नाशत्वावच्छिन्नस्यापत्तिवारणाय तथाविधप्रति-
योगितासम्बन्धेन द्रव्यान्यनाशत्वावच्छिन्नं प्रति द्रव्य-
भेदत्वेनापि हेतुत्वस्याधिकस्य कल्पनीयतया तत्र तत्सह-
कारित्वस्य कल्पनीयतया च तुल्यत्वात् । तस्माद् द्रव्य-
नाशं प्रति समवायिकारणनाशस्यापि हेतुतावश्यकीति
हृदयम् ।

चक्षुःसंयोगादिरूपकारणबलात् गगनादेः प्रत्यक्ष-
तावारणाय बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरू-
पत्वेन हेतुतां कल्पयित्वा प्राञ्चो वायोरप्रत्यक्षत्वमङ्गी-
कुर्वन्ति तन्मतं दूषयति । द्रव्यास्पार्शनप्रत्यक्ष
इति । स्पर्शवत्त्वमेवेत्येवकारेण रूपव्यवच्छेदः । प्रयोजकं
जनकम् । अत एव द्रव्यस्पार्शने स्पर्शस्य हेतुत्वा-

अत एव शीतो वायुरित्यादिप्रत्ययोऽपि[१] स्पार्शनः साधु सङ्गच्छते। त्रुटेरस्पार्शनत्वे तु प्रकृष्टतमं परिमाणमपि तथा गौरवान्मानाभावात्। त्वग्व्यापारानन्तरं वायुर्वातीति सार्वलौकिकप्रत्ययस्यान्यथानुपपत्त्या च रूपं तत्र न निवेशनीयम्। फूत्कारादौ च स्फुटतरप्रत्यक्षाः सङ्ख्यादयः चाक्षुषद्रव्यप्रत्यक्षे रूपं तथा गौरवान्मानाभावाच्च। निःस्पर्शायामपि प्रभायां चलनादिप्रत्ययाश्च

देवेत्यर्थः। ननु द्रव्यस्पार्शनं प्रति स्पर्शस्य हेतुत्वे त्रुटेः स्पार्शनापत्तिरित्यत आह। त्रुटेरस्पार्शनत्वे त्विति। तुकारेण त्रुटेः स्पार्शनाभ्युपगमे दत्यभावः सूचितः। प्रकृष्टतमं परिमाणमिति। त्रसरेणुमहत्त्वव्यावृत्तयावन्महत्त्वसाधारणजात्यवच्छिन्नमित्यर्थः। तादृशजातिसिद्धिस्तु स्पार्शनजनकतावच्छेदकतयेति भावः। स्पार्शनजनकतावच्छेदककोटौ रूपनिवेशे बाधकमाह। गौरवादित्यादिना। प्रामाणिकं गौरवं न दोषायेत्यत आह। मानाभावादिति। तत्रेति स्पार्शनजनकतावच्छेदककोटावित्यर्थः। द्रव्यस्पार्शनं प्रति स्पर्शस्य हेतुत्वं व्यवस्थाप्य द्रव्यचाक्षुषं प्रति रूपस्य हेतुतां व्यवस्थापयति। चाक्षुषद्रव्यप्रत्यक्षे त्वित्यादिना। तथेति कारणमित्यर्थः द्रव्यचाक्षुषजनकतावच्छेदककोटौ स्पर्शनिवेशे बा-

(१) स्पार्शनोऽपि-पा० १ पु०।

स्पर्शोऽपि न तथा द्रव्यस्य समवेतेन्द्रियजन्य-
षकमाह। गौरवादित्यादिना । न तथेति । न कार-
णमित्यर्थः । अयमाशयः । बहिर्द्रव्यप्रत्यक्षत्वावच्छिन्नं
प्रति रूपस्य हेतुत्वं न सम्भवति। बहिष्ट्वस्य दुर्वचत्वात्।
न चात्मभिन्नत्वमेव बहिष्ट्वं तथापि मानसान्यद्रव्य-
प्रत्यक्षत्वमादाय कार्यतावच्छेदके विनिगमनाविरहस-
म्भवात् । न च लाघवान्मूर्तप्रत्यक्षत्वमेव रूपजन्यता-
वच्छेदकमस्तु वायोः प्रत्यक्षतासन्देहेन मूर्तप्रत्यक्षत्वस्य
सन्दिग्धव्यभिचारकतया रूपकार्यतावच्छेदकत्वासम्भ-
वात् । अपि च मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपस्य हेतु-
तामभ्युपेत्य वायोः प्रत्यक्षत्वानङ्गीकारे वायोः स्प-
र्शस्य स्पार्शनानुपपत्तिः । घटगगनसंयोगस्पार्शनवारणाय
क्लृप्तस्य विजातीयसत्स्पार्शनत्वावच्छिन्नं प्रति स्वाश्रयसम-
वेतत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्पार्शनविषयत्वा-
भावाभावरूपहेतोरभावात् । न च स्पार्शनविषयत्वाभा-
वाभावकार्यतावच्छेदककोटौ विजातीयसदंशे स्पर्शान्य-
त्वमपि निवेश्यत इति वाच्यम् । विनिगमनाविरहेण कार्य-
कारणभावानन्त्यात् कार्यतावच्छेदकगौरवाच्च । स्पार्शन-
विषयत्वाभावाभावासहकृततत्सामान्यसामग्र्याः स्पर्श-
स्पार्शनस्थले प्रसिद्धायाः गगनघटसंयोगादिप्रत्यक्षापत्ते-
र्दुर्वारत्वाच्च । न च चरमदोषवारणाय स्पार्शस्पर्शनत्वाव-
च्छिन्नं प्रति स्पर्शत्वेनापि हेतुत्वं कल्पनीयमिति वाच्यम् ।
तादृशकार्यकारणभावकल्पनस्यापि नैयायिकमते ऽधिक-
गौरवसम्पादकत्वादित्यादिकं बहुतरमूहनीयं वायुप्रत्य-
क्षतावाद इति । नन्वेवं सति बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष-
त्वावच्छिन्नं प्रति अनात्मसमवेतरसगन्धशब्दजातीतरयो-
ग्यधर्मसमवायित्वं कारणमिति समुदायार्थः । अत्रात्मनि

प्रत्यक्षे तु अनात्मसमवेतशब्दरसगन्धजातीतरयोग्यधर्मसमवायित्वम् । तथा सुखादिसमवायिकारणतावच्छेदकत्वेन सिद्धमात्मत्वं जातिर्न-

---

रसादीतरज्ञानादिरूपयोग्यधर्मसमवायित्वात् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नापत्तिवारणायानात्मसमवेतत्वं धर्मविशेषणम् । आकाशादौ शब्दरूपतादृशधर्मसत्त्वात् तद्धर्मावच्छिन्नापत्तिवारणाय शब्देतरत्वस्य निवेशः । वाय्वानीतजलीयभागचम्पकभागयोः रसगन्धरूपतादृशयोग्यधर्मसत्त्वात् तत्रोपदर्शितधर्मावच्छिन्नापत्तिवारणाय रसगन्धेतरेति । द्रव्यत्वादिजातिरूपतादृशधर्मसमवायित्वमादाय गगनादौ तादृशधर्मावच्छिन्नापत्तिवारणाय जातीतरेति । एतानि सर्वाणि विशेषणानि नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भाव इति व्याप्त्यङ्गीकारे सार्थकानि तदनङ्गीकारे तु तत्तद्विशेषसामग्र्यभावादेवात्मादौ बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नस्यापत्तिवारणसम्भवात् तादृशविशेषणान्यनुपादेयानीति हृदयम् । अत्र कारणतावच्छेदककोटौ योग्यत्वविशेषणस्य व्यावृत्तिमाह । सुखादीति । तथा चात्मत्वजात्यवच्छिन्नभिन्नसमवेतत्वार्थकानात्मसमवेतत्वरूपविशेषणघटितोपदर्शितकारणतावच्छेदकस्य ज्ञानादिकमादायेश्वरात्मनि सत्त्वात् तत्र तादृशधर्मावच्छिन्नापत्तिवारणाय धर्मे योग्यत्वं विशेषणमिति भावः । अनात्मसमवेतेत्यत्र विषयिधर्मासमानाधिकरणविवक्षायां तु योग्यत्वस्य दर्शितव्यावृत्तिर्न सङ्-

**ध्वर इति[1] तदीयज्ञानादिपिशाचादिसंयोगवा-
रणाय योग्येति । विषयिधर्मासमानाधिकरणे[2]-
त्यभिधाने तु शब्दो नोपादेयः । अस्मदादिनय-**
चक्षल इत्यतो व्यावृत्त्यन्तरमाह । **पिशाचादिसंयोगेति ।**
तथा च पिशाचादिसंयोगादिरूपतादृशधर्मसमवायित्वब-
लात् पिशाचादौ तद्धर्मावच्छिन्नापत्तिवारणाय योग्यत्वेन
धर्मो विशेषित इति भावः । **विषयिधर्मासमानाधि-
करणेति ।** विषयिधर्मसमानाधिकरणत्वावच्छिन्नप्रति-
योगिताकभेदस्य तद्व्यक्तित्वेन निवेशिते त्वित्यर्थः । नातो
ज्ञानादिसमानाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदमा-
दाय विनिगमनाविरहः । तथाविधभेदस्यैतादृशभेदसमनि-
यततया ऐक्येन तद्व्यक्तित्वेनैकनिवेशनेनैव सर्वनिवेशस-
म्भवादिति ध्येयम् । **शब्दो नोपादेय इति ।** आकाश-
स्येश्वरादनतिरिक्ततया शब्दस्य विषयिज्ञानादिसमा-
नाधिकरणतया शब्दे तद्भिन्नत्वाभावेन गगने तथा-
विधधर्मसमवायित्वाभावान्नोक्तापत्तिः सम्भवतीति
भावः । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति
अनात्मसमवेतत्वादिविशेषणविशिष्टधर्मसमवायित्वस्य
हेतुत्वे गौरवात् तदपहाय तत्र लघुकारणान्तरमाह ।
अस्मदादीत्यादि । अस्मदादेर्जीवात्मनः न नयनसंसृ-
ष्टद्रव्यस्य चेत्यर्थः । **परिमाणशून्येत्यादि ।** इदं तु य-
थानिर्देशक्रममन्वेति । तथा च जीवस्य परिमाणशून्यत्वमते

(१) निरवमात्मन्य मेश्वरे-पा २ पु० । निरात्मत्वजातिस्तु मेश्वरे-पा ३ पु०
(२) विषयिधर्माधिकरणे-पा० १ । ३ पु० ।

नसंसृष्टपित्तद्रव्यस्य परिमाणशून्यत्वम् । परिमाणवत्त्वमते तु तादृशप्रत्यक्षे परिमाणवत्त्वमेव तथा । यद्वा नयनसंसृष्टपित्तद्रव्यं नीरूपमेव । अन्यथा पुरुषान्तरेण तत्पीतिमोपलम्भापत्तिः । स्मर्यमाणस्तु पीतिमा दोषवशाच्छङ्खादावारो-

---

नयनसंसृष्टपित्तद्रव्यस्य परिमाणवत्त्वमते त्विति समुदायार्थः । इदमुपलक्षणम् । वाय्वानीतत्रसरेण्वेकभागादेरपि परिमाणानङ्गीकारे इत्यपि बोध्यम् । **तादृशप्रत्यक्षे** । बहिरिन्द्रियजन्यप्रत्यक्षे । **तथा** । कारणम् । ननु नयनगतपित्त द्रव्ये परिमाणवत्त्वे प्रमाणाभावस्तदनुपलम्भादनुमानस्याप्रयोजकत्वात् प्रमाणान्तरस्याभावात् । तथा चोपदर्शितप्रत्यक्षे परिमाणस्य हेतुत्वे नयनसंसृष्टपित्तद्रव्यप्रत्यक्षानुपपत्तिरित्यत इष्टापत्त्या कल्पान्तरमाह । **यद्वेति । नीरूपमेवेति** । तथा च तत्र परिमाणानङ्गीकारेऽपि न क्षतिः । रूपस्वरूपविशेषकारणाभावात् तस्याप्रत्यक्षत्वेन उपदर्शितकार्यकारणभावे व्यभिचाराभावादिति भावः । अन्यथा तथाविधपित्तद्रव्यस्य रूपस्वीकारे इत्यर्थः । ननु नयनसंसृष्टपित्तद्रव्ये रूपानङ्गीकारे कथं शङ्खः पीत इत्यारोपः । तत्र नयनसंसृष्टपित्तद्रव्यरूपस्यैवानुभूयमानस्य शङ्खादावारोप्यमाणस्त्विति स्मर्यमाणनयनसंसृष्टद्रव्यनिष्ठपीतमिवारोपादित्यत आह । **स्मर्यमाणस्त्विति । शङ्खादावारोप्यत इति** । तथा च नयनगतपित्तद्रव्यरूपस्यानुभूयमानस्य शङ्खादावारोपानभ्युपगमाददोष इति

प्यत इति । द्रव्यप्रत्यक्षे च शब्दरसगन्धजातीतर-
योग्यधर्मसमवायित्वम् । तथा रसनगतं च
पित्तद्रव्यं न रूपवत् न वा स्पर्शवत् रसना च
न द्रव्यग्राहिकेति न तत्प्रत्यक्षम् ॥

एतेन वायूपनीतसुरभिचम्पकभागोपि[१]
व्याख्यातः ॥

भावः । द्रव्यप्रत्यक्षत्वावच्छिन्नेऽनुगतनियामकमाह । द्र-
व्यप्रत्यक्षे चेत्यादि । तथा कारणम् । ननु रसेतरत्व-
स्योपदर्शितकारणतावच्छेदके निवेशे रसनगतपित्तद्रव्यप्र-
त्यक्षे व्यभिचारः । तत्र तथाविधयोग्यधर्मसमवायित्वा-
भावादत आह । रसनगतं चेत्यादि । रूपवदित्यनेन
चाक्षुषप्रत्यक्षनिरासः न स्पर्शवदित्यनेन स्पार्शनप्रत्यक्ष-
निरासः । रसना च न द्रव्यग्राहिकेत्यनेन रासनप्रत्यक्ष-
निरासः । तथा च रसनगतपित्तद्रव्यस्य प्रत्यक्षाभावान्नोप-
दर्शितकार्यकारणभावे व्यभिचार इति भावः ।

एतेनेति । वाय्वानीतचम्पकभागादौ रूपादिसत्त्वे
मानाभावेन प्रत्यक्षतानभ्युपगम एवेत्यर्थः। वाय्वानीतचम्प-
कभागोऽपीति वाय्वानीतचम्पकभागे व्यभिचारोपीत्यर्थः ।
व्याख्यातः प्रत्युक्त इत्यर्थः । बहिरिन्द्रियजन्यद्रव्यप्रत्य-
क्षादौ कारणकथनं तु प्रौढ्या । वस्तुतस्तस्याभावेपि न क्षतिः।
गगनादेः प्रत्यक्षवारणं तु लाघवादवश्यक्लृप्तेन द्रव्यलौकि-
कस्पार्शनत्वावच्छिन्नं प्रति स्पर्शहेतुत्वेन द्रव्यचाक्षुषं प्रति

---

(१) चन्दनभागोऽपि-पा० च । ३ पु० ।

घटत्वादेश्चाभावो न घटत्वत्वादिना रूपेण प्रत्यक्षः तस्यातीन्द्रियत्वात्। एवं न जातित्वादिना रूपेणापीति सर्वथैवाप्रत्यक्षः ॥

सत्ता च न द्रव्यगुणकर्मवृत्तिरेका प्रत्यक्षसिद्धा जातिः। धर्मादीनामतीन्द्रियत्वेन तत्र प्रत्यक्षायोगात् जात्यादावपि सद्व्यवहाराच्च।

रूपहेतुत्वेन सम्पादनीयमिति ध्येयम् ॥

घटत्वाभावस्य लौकिकप्रत्यक्षाभावमुपपादयति। घटत्वादेरभाव इत्यादिना तस्य घटत्वस्य। अतीन्द्रियत्वादिति। घटेतरावृत्तित्वे सति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपतया तस्यातीन्द्रियत्वादिति। घटेतरावृत्तित्वस्य कालादिघटितत्वादित्यर्थः। तथा चातीन्द्रियधर्मावच्छिन्नप्रतियोगिताकाभावस्य लौकिकप्रत्यक्षासम्भवे तत्तद्घटत्वत्वावच्छिन्नप्रतियोगिताकाभावस्य लौकिकप्रत्यक्षमिति भावः। एवमिति। अतीन्द्रियधर्मावच्छिन्नप्रतियोगिताकाभावस्य लौकिकप्रत्यक्षाभावेनेत्यर्थः। जातित्वरूपेणेति। जातित्वस्य नित्यानेकसमवेतत्वरूपतया ध्वंसातीन्द्रियध्वंसादिघटितनित्यत्वघटितत्वेनातीन्द्रियत्वादिति भावः। अत्र तत्तद्व्यक्तित्वेन घटत्वाद्यभावलौकिकप्रत्यक्षवारणं तु सुधीभिश्चिन्त्यम्। तद्व्यक्तित्वं च अतिरिक्तं घटत्वादितादात्म्यस्वरूपं वेत्यन्यदेतत् ॥

सत्तायाः जातित्वं निराकरोति। सत्ता चेति। ननु यावद्द्रव्यगुणकर्मसु प्रत्यक्षसिद्धा सा जातिः कथमपलापनीयेत्यत आह। द्रव्यगुणेत्यादि। धर्मादीनामिति।

घटादौ सद्व्यवहारश्च वर्तमानत्वनिबन्धनः ।
किं तु भावत्वं तत् । तच्चाभावान्यत्वम् । अभाव-
त्वमेव वानुगतप्रत्ययसिद्धोऽखण्डोपाधिः भा-
वत्वं वाखण्डोपाधिः । तच्च ज्ञेयत्वादिवत्

भादिना गगनादिपरमाणुक्रियापरिग्रहः । ननु सन्नि-
त्यादिव्यवहारबलादेव सा जातिरायास्यतीत्यत आह ।
जात्यादावपीति । तथा च सत्त्वव्यवहारस्य सत्ता-
जातिविषयत्वे जातावपि सद्व्यवहारो न स्यात् अतो भाव-
त्वादिकमेव तद्व्यवहारविषय इति न तादृशव्यवहारेण स-
त्ताजातिसिद्धिरिति भावः । ननु घटः सन्नित्यादिव्यवहा-
रस्यान्यथानुपपत्तिसिद्धायां सत्ताजातौ सत्त्वव्यवहार-
स्यैकार्थसमवायसम्बन्धेन सत्ताजातिरेव विषयो न भाव-
त्वादिकमित्यत आह । **घटादाविति** । तथा च घटः
सन्नित्यादिव्यवहारस्यापि वर्तमानत्वादिविषयकत्वेनैवो-
पपत्तौ न तदन्यथानुपपत्त्या सत्ताजातिसिद्धिरिति भावः ।
न च वर्तमानत्वादेरननुगततया अनुगतसद्व्यवहारो विना
सत्ताजातिं न निर्वहतीति वाच्यम् । अनुगततया व्यव-
हारानभ्युपगमादिति । ननु सच्छब्दशक्यतावच्छेदकतया
सत्ताजातिरायास्यतीत्यत उपसंहारव्याजेन तामाशङ्कां
निराकरोति । **किं त्विति** । **तदिति** । सत्तास्वरूपमि-
त्यर्थः । तथा च सच्छब्दशक्यतावच्छेदकमपि भावत्वमेव न
तु सत्ताया अतिरिक्तस्वरूपत्वमिति भावः । अत्र वर्तमान-
त्वादिकमननुगतत्वादुपेक्षितमिति ध्येयम् । ननु भावत्व-
स्यापि सर्वसाधारणानुगतस्याभावात् कथं तदपि सच्छब्द-

शक्यतावच्छेदकमित्यत आह। तच्चेति। भावत्वं चेत्यर्थः। ननु भावत्वमेवाखण्डोपाधिस्तद्भिन्नत्वमेवाभावत्वमित्येव किं न स्यादित्यत आह। अभावत्वमेवेति। एवकारोऽप्यर्थे। तथा च विनिगमनाविरहादुभयोरेवाखण्डोपाधित्वमिति भावः। नन्वेवं सति भावत्वं भावो न स्यादित्यत आह। तच्चेति। भावत्वं चेत्यर्थः। इदमत्र तत्त्वम्। जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतया द्रव्यजन्यतावच्छेदककोटिप्रविष्टतया सत्ताजातिसिद्धि। न च तादृशकार्यकारणभावे मानाभाव इति वाच्यम्। नीलादौ स्वाश्रयसमवेतत्वसम्बन्धेन नीलरूपकारणसत्त्वात् समवायेन नीलापत्तिवारणाय तादृशकार्यकारणभावस्यावश्यकत्वात्। न च समवायसम्बन्धेन नीलादिकं प्रति स्वआयसमवेतत्वविशिष्टद्रव्यत्वसम्बन्धेन नीलादेर्हेतुत्वकल्पनात् त्रिविधकार्य(१) कारणभावान्तरकल्पनमिति वाच्यम्। स्वाश्रयसमवेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्येन कारणतावच्छेदकसम्बन्धगौरवेण चातिरिक्तोपदर्शितकार्यकारणभावकल्पनस्यैवोचितत्वात् उपदर्शितकार्यतावच्छेदककोटौ जन्यत्वनिवेशाद्वैरथ्यम् जन्यत्वस्य कालिकसम्बन्धेन घटत्वादिमत्त्वरूपस्यापि वक्तुं शक्यत्वादिति तु नाशङ्कनीयम्। यतोऽत्र कालिकसम्बन्धेन घटादिमत्त्वरूपजन्यत्वनिवेशे तस्य महाकालसाधारण्येन प्रकृते कार्यतावच्छेदकस्य नित्यसाधारण्यं न सङ्गच्छत इति ध्वंसप्रतियोगित्वरूपं प्रागभावप्रतियोगित्वरूपं वा जन्यत्वमत्र निवेशनीयम्।

(१) कल्पनाच तथाविधकार्य–ख० ३ पु०।

घटाभावादिवच्च स्ववृत्त्यपि ॥

एवं गुणत्वमपि न रूपादिचतुर्विंशता-
वैका प्रत्यक्षसिद्धा जातिः । अतीन्द्रियेषु प्रत्यक्षा-
योगात् । तुरगादेरुत्कृष्टगतिमत्त्वे ब्राह्मणादेश्च

वस्तुतस्तु नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वाङ्गीका-
रेण सत्त्वमात्रस्यैव द्रव्यकार्यतावच्छेदकतया जन्यत्वस्य
तत्र निवेश एव नास्ति क्व विनिगमनाविरहेण तस्य नाना-
विधतया गौरववार्ता । अत एव समवायसम्बन्धेन जन्य-
त्वमेव कार्यतावच्छेदकमस्तु किं तत्र सत्ताया निवेशने-
नेति नोपदर्शितयुक्तिः सत्ताजातिसाधिकेत्यपि निर-
स्तम् । जन्यत्वस्य गुरुतया तदपहाय सत्ताया एव तत्र
निवेशनौचित्यात् । यदि च जन्यत्वमखण्डोपाधिः तथापि
जन्यमात्रवृत्तिभेदव्यक्तेस्तद्व्यक्तित्वेन तथात्वमादाय वि-
निगमनाविरहेण सत्ताया एव तथात्वौचित्यात् । न च
सत्तायास्तथात्वे ऽपि तथाविधभेदादिकमादाय विनिगम-
नाविरह इति वाच्यम् । सत्ताया धर्मिग्राहकमानसिद्ध-
त्वादित्यधिकं सत्ताजातिविचारे ऽनुसन्धेयमिति ॥

गुणत्वजातिं खण्डयति । **एवमिति** । वक्ष्यमाणयु-
क्त्येत्यर्थः । वक्ष्यमाणयुक्तिमेव स्फोटयति । **अतीन्द्रि-
येष्विति** । अतीन्द्रियरूपादिष्वित्यर्थः । **प्रत्यक्षायो-
गादिति** । इदमुपलक्षणम् । अनुमानस्याप्रयोजकत्वादि-
त्यपि द्रष्टव्यम् । ननु रूपादिष्वनुगतगुणव्यवहारबलादेव
गुणत्वजातिः सेत्स्यतीत्यत आह । **तुरगादेरित्यादि** ।

दोषाद्यभावे ऽपि गुणव्यवहाराच्च। एकस्य कार्यतावच्छेदकस्य विरहे ऽपि येन केनापि रूपेण कारणत्वाद्यनुगमय्य जातिकल्पने चातिप्रसङ्गो जातिसङ्करप्रसङ्गश्चेति दिक् । शाब्दादिज्ञाने

तथा च यथा तुरगादौ गत्यादिनिष्ठोत्कर्षमादाय गुणव्यवहारस्तथा रूपादिष्वपि उत्कर्षादिकमादाय गुणव्यवहारोपपत्तौ चतुर्विंशतिगुणसाधारणानुगतगुणत्वजातौ प्रमाणाभावादिति भावः । द्रव्यकर्मान्यसामान्यवद्वृत्तिकारणतात्वेनानुगतीकृतानां रूपादिकारणतानामवच्छेदकतया गुणत्वजातिरायास्यतीत्याचार्या अनुमन्यन्त इति तन्मतं दूषयति । **एकस्येति** । अनुगतस्येत्यर्थः । **येन केनापि रूपेणेति** । द्रव्यकर्मान्यसामान्यवद्वृत्तित्वेनेत्यर्थः । **अनुगमय्येति** । तदवच्छेदकत्वेनेति शेषः । **अतिप्रसङ्ग इति** । रूपद्रव्यकर्मेतरसामान्यवद्वृत्तित्वेनानुगतीकृतानां कारणतानामवच्छेदकत्वेन रूपव्यावृत्तत्रयोविंशतिगुणवृत्तिजातेरपि सिद्धिप्रसङ्ग(१) इत्यर्थः। अत्रेष्टापत्तौ दूषणान्तरमाह । **जातिसङ्करेति** । तुल्ययुक्तया रूपद्रव्येतरसामान्यवद्वृत्तिकारणतावच्छेदकत्वेन रसादित्रयोविंशतिगुणकर्मसाधारणजातिसिद्धा तयोः सङ्करप्रसङ्ग इत्यर्थः। इदमत्र बोध्यम्। असति बाधके गुणपदशक्यतावच्छेदकत्वेन गुणत्वजातेः सिद्धौ बाधकाभावः। न च तथा सति विभुपदशक्यतावच्छेदकत्वेन विभुचतुष्टयमात्रवृत्तिजातिसिद्धिप्रसङ्ग इति शिरोमण्युक्तं

(१) गुणत्वजातिसिद्धिः समायातीति–पा ३ पु० ।

ऽनुभवव्यवहारश्च स्मृत्यन्यज्ञानत्वनिबन्धनः ।
जातिस्त्वनुभवत्वं साक्षात्कारित्वमेव । साक्षा-
त्कारिणि ज्ञान एव तत्प्रत्ययात् । सत्यपि चानु-

दूषणं युक्तम् । इदानीमीश्वरजीवातिरिक्तस्य विभुत्वे मा-
नाभावेन विभुत्वस्यात्मत्वतुल्यवृत्तितया आत्मत्वाति-
रिक्तजातित्वे तुल्यव्यक्तिवृत्तित्वरूपबाधकसत्त्वे तथा दो-
पानवकाशात् आकाशादीनामतिरिक्तत्वपक्षे ऽपि तथा
स्वीकारे बाधकाभावाचेति । इदं पूर्णाय परमात्मने इत्यग्रे-
श्वरे आत्मपदव्यपदेशं कुर्वता दीधितिकृतापि सम्मतम् ।
अन्यथा आत्मपदशक्यतावच्छेदकत्वं विना ईश्वरसाधार-
णात्मत्वजातौ युक्त्यन्तराभावेन तथा व्यपदेशो ऽसङ्गत
एव स्यादिति । अनुभवचतुष्टयसाधारणीमनुभवत्वजातिं
प्रचीनसम्मतां दूषयितुमाह । शाब्दादिज्ञाने चेति ।
स्मृत्यन्यज्ञानत्वनिबन्धन इति । एतेनानुभवव्यव-
हारबलादनुभवत्वं जातिरित्यपास्तम् । ननु तथाप्यनुभवा-
मीत्यनुव्यवसायबलादनुभवत्वजातिरायास्यतीत्यत आह ।
जातिस्त्विति । साक्षात्कारित्वमेवेति । प्रत्यक्षत्वमेवेत्य-
र्थः । तथा च प्रत्यक्षत्वातिरिक्तानुभवत्वजातौ मानाभाव
इति भावः । प्रत्यक्षत्वातिरिक्तानुभवचतुष्टयवृत्त्यनुभवत्व-
जातिस्वीकारे बाधकमप्याह । सत्यपि चेति । तथा च
तादृशजातिविशेषस्वीकारे सुखाद्यनुमित्यनन्तरमपि तथा-
नुव्यवसायापत्तिरिति भावः । केचित्तु विशेषणज्ञानादि-
जन्यतावच्छेदककोटिप्रविष्टतयाऽनुभवत्वजातिसिद्धिः ।
अन्यथा विशिष्टबुद्धित्वादेस्तथात्वे स्मृतौ व्यभिचारप्रसङ्ग

मानिकादिसुखादिनिश्चये सुखादिकमनुभवामीति प्रत्ययाभावादिति ॥

इत्याहुः। तदप्यसत्। प्रत्यक्षत्व एव तज्जन्यतावच्छेदकत्वोपपत्तौ अतिरिक्तानुभवत्वस्य तत्र निवेशे प्रयोजनाभावात्। न च विशिष्टप्रत्यक्षत्वावच्छिन्नं प्रति विशेषणज्ञानादेर्हेतुत्वे विशेषणज्ञानादिकं विना अनुमित्याद्यात्मकविशिष्टबुद्ध्यापत्तिरिति वाच्यम्। अनुमित्यादिपूर्वं परामर्शादेरावश्यकत्वेन तथा वक्तुमशक्यत्वात्। न चैवं सति साध्यविशेष्यकानुमितिविलोपप्रसङ्गः इतरभेदज्ञानाभावदशायामपि इतरव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकव्यतिरेकव्याप्त्यवगाहिपरामर्शसम्भवेन तस्मात् तदानीमपि साध्यविशेषणकानुमितेरपि सम्भवादिति वाच्यम्। तावता क्षत्यभावात्। भवतु वा विशिष्टानुमितित्वावच्छिन्नं प्रत्यपि विशेषणज्ञानादेर्हेतुत्वम्। न चैवं गौरवावकाशः नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन शुद्धानुभवत्वेन तथा सम्भवेन जन्यत्वनिवेशे कालिकसम्बन्धेन घटत्वादिमत्त्वमादाय विनिगमनाविरहेणानन्तकार्यकारणभावद्वया तदपेक्षया तथाविधकार्यकारणभावद्वयस्यैव सम्यक्त्वात्। न च प्रत्यक्षत्वस्य जन्यतावच्छेदकत्वेऽपि स दोषस्तदवस्थ इति वाच्यम्। ईश्वरप्रत्यक्षव्यावृत्तास्मदादिप्रत्यक्षसाधारणजातिविशेषमभ्युपेत्य तस्यैव तथात्वोपगमात्। अनुभवत्वमपि तथा सम्भवतीति तु न मन्तव्यम्। तथा सति प्रत्यक्षत्वेन सङ्करप्रसङ्गात्। न चैवमनुभवं प्रत्येव वेति दीधितिविरोधः। युक्तया पदार्थतत्त्वविवेकस्य ग्रन्थविरोधेनानिवारणीयत्वादित्यादि निपुणतरमत्रानुसन्धेयमिति संक्षेपः ॥

एवं घटाद्यभावस्याप्यभावोऽतिरिक्त एव ।
घटादिमति तदभावो नास्तीत्यबाधिताभावत्व-
प्रत्ययात् । न चैवमनवस्था एकस्यैव घटाभा-
वस्य स्वाभावाभावरूपत्वे[1] विरोधाभावात् ।
[2]अन्योन्याभावस्यान्योन्याभावो भावत्वंसंसर्गा-

तदत्यन्ताभावाभावस्य तत्स्वरूपत्वमभ्युपगच्छतां
प्राचां मतं दूषयितुमाह। एवमिति। वक्ष्यमाणयुक्त्येत्य-
र्थः। अतिरिक्त एवेति । घटाद्यतिरिक्त एवेत्यर्थः ।
तदभावो नास्तीति। घटाद्यभावो नास्तीत्यर्थः। अभा-
वत्वप्रत्ययादिति । घटाद्यभावाभावस्य घटादिभाव-
स्वरूपत्वेऽभावत्वेन प्रत्ययानुपपत्तिः। भावेऽभावत्वाभा-
वादिति भावः । न च भावाभावसाधारणमभावत्वमख-
ण्डोपाधिरित्युक्तौ नायं दोष इति वाच्यम्। एवं सति ला-
घवादेव घटाभावाभावस्यातिरिक्तत्वसिद्धेः लाघवानादरे
ऽभावमात्रस्यानतिरिक्तत्वसिद्धिप्रसङ्गादित्यादिकमवधेय-
म्। ननु घटाद्यभावाभावस्यातिरिक्तत्वे तुल्ययुक्त्या तद-
भावस्याप्यतिरिक्तत्वमभ्युपगन्तव्यम् एवं तदभावस्यापी-
त्यनवस्थेत्याशङ्कां निराकरोति। न चैवमिति। अभावा-
भाववत् तदभावादेरप्यतिरिक्तत्वे इत्यर्थः। एकस्यैवेति।
घटाद्यभावस्यैवेत्यर्थः। स्वाभावाभावरूपत्वइति। घ-

(१) घटतदभावाभावरूपत्वे —पा० ३ पु ।
(२) अन्योन्याभावस्य भावत्वं संसर्गाभावत्वं चान्योन्याभावः । इत्यधिकं ३ पु.

भावत्वं च अतिरिक्तान्योन्याभावाङ्गीकारे ऽनवस्थाप्रसङ्गात् । ध्वंसप्रागभावयोश्चातिरिक्तावेव प्रागभावध्वंसौ घटादेः सत्त्वकाले तस्य प्रागभा-

टाभावस्य घटाभावाभावाभावस्वरूपत्वे इत्यर्थः । तथा च घटाभावाभावस्याप्यभावो घटाभाव एव न त्वतिरिक्त इति नानवस्थेति भावः । भावत्वं संसर्गाभावत्वं चेति । इदं चान्योन्याभावत्वावच्छिन्नस्यान्योन्याभावमवलम्ब्योक्तम् । घटान्योन्याभावस्य त्वन्योन्याभावोभावत्वं संसर्गाभावत्वं पटाद्यन्योन्याभावत्वं चेत्यपि बोध्यम् । केचित्तु अन्योन्याभावस्याप्यन्योन्याभावोऽतिरिक्त एव । न चैवमनवस्था । तस्याप्रामाणिकत्वेनादोषत्वात् । अन्यथा अन्योन्याभावमात्रस्यैवातिरिक्तत्वविलोपप्रसङ्गात् । सर्वत्र तदधिकरणमात्रवृत्तिधर्म एव तत्स्वरूपत्वकल्पनसम्भवादिति वदन्ति । ध्वंसप्रागभावयोः प्रागभावध्वंसौ प्रतियोगिस्वरूपौ इत्युपगच्छतां प्राचां मतं दूषयितुमाह । ध्वंसप्रागभावयोश्चेति । तस्येति । घटादेरित्यर्थः । ध्वंसप्रागभावौ न स्त इति । ध्वंसो नास्ति प्रागभावो नास्तीत्यर्थः । यदि च तयोरत्यन्ताभावविषयकत्वेनैवोपपत्तेर्न ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वे साधकमिति विभाव्यते । तदा घटध्वंसो भविष्यति घटप्रागभावो नष्ट इत्यादिप्रतीतिर्ध्वंसप्रागभावप्रागभावध्वंसयोरतिरिक्तत्वसाधिकेत्यवधेयम् । न चैवं सति अभावत्वप्रत्ययादित्युत्तरग्रन्थविरोधः तयोः प्रागभावध्वंसत्वावलम्बनादिति वाच्यम् । अभावत्वप्रत्ययादित्यस्य प्रागभावध्वंसत्वावगा-

वध्वंसौ न स्त इत्यबाधिताभावत्वप्रत्ययात् ।
प्रागभाव एव न पारमार्थिक इत्यन्ये ॥

प्रत्यभिज्ञायाश्च तत्तागोचरसंस्कार एव
हेतुरिति प्राञ्चः। न च तस्याः संस्कारजन्यज्ञानत्वे
स्मृतित्वापत्तिः तज्जन्यज्ञानत्वस्य तत्र प्रयोजक-
त्वादिति वाच्यम् । किमिदं प्रयोजकत्वं नाम ।
न व्यापकत्वमविरोधात् न व्याप्यत्वं प्रमाणाभा-

हिप्रत्ययादित्यर्थकत्वात् तयोर्भावाभावसाधारणातिरि-
क्ताखण्डोपाधित्वाभ्युपगमे तु ध्वंसप्रागभावप्रागभावध्वं-
सयोरतिरिक्तत्वे लाघवस्यैव शरणीकरणीयत्वादित्यव-
धेयम् । प्रागभावाभ्युपगम एव ध्वंसप्रागभावप्रागभावध्वं-
सयोरतिरिक्तत्वानतिरिक्तत्वचिन्ता स एव नास्ति प्रमा-
णाभावादित्यभिप्रेत्याह । **प्रागभाव एवेति** । अपर-
इत्यनेनास्वरसः सूचितः तद्बीजं तु प्रागभावविचारे प्राग-
भावस्यातिरिक्तत्वव्यवस्थापनावसरे ऽनुसन्धेयम् इह तु
विस्तरभिया न लिखितमिति ॥

संस्कार एव हेतुरिति । इदमत्राकूतम् । तद्वि-
ष्लौकिकान्यविषयताशालिप्रत्यक्षं प्रति तद्विषयकत्वेनैव
ज्ञानलक्षणायाः कारणत्वं कल्प्यते न तु ज्ञानत्वान्तर्भावेन
तत् गौरवात् । एवं सति कृत्यादिसाक्षात्कारात् पूर्वमपि
नियमतो विषयस्मृतिकल्पनमपि नास्ति । कृत्यादित एव
कृत्यादिसाक्षात्कारे विषयभानोपपत्तेरिति। अविरोधा-
दिति । प्रत्यभिज्ञायाः संस्कारजन्यत्वेऽपि तथाविधव्या-

वात् । परं त्वनुद्भूते ऽभिभूते वा तत्तासंस्कारे प्रत्यभिज्ञाया अनुत्पादेन तत्तास्मृतिरेव तद्धेतुरिति मन्तव्यम् ॥

क्षणश्च क्षणिकोऽतिरिक्तः कालोपाधिः । वि-

पक्षताया अक्षतेरित्यर्थः । **प्रमाणाभावादिति** । तादृशव्याप्तिग्रहानुकूलतर्काभावादित्यर्थः । तथा च प्रकृते प्रयोजकत्वस्य दुर्वचत्वेन तथा वक्तुमशक्यतया प्रत्यभिज्ञायाः संस्कारजन्यत्वे न किञ्चिद्बाधकमिति भावः । प्राचीनमतं दूषयति । **परं त्विति** । **अनुद्भूते** । उद्बोधकासमवहिते । **अभिभूते** । स्मृतिप्रतिबन्धकसमवहिते । **तत्तास्मृतिरेवेति** । एवकारेण संस्कारस्य प्रत्यभिज्ञाहेतुत्वव्यवच्छेदः । अयमाशयः । तन्निष्ठलौकिकान्यविषयताशालिप्रत्यक्षं प्रति तद्विषयकत्वेन ज्ञानलक्षणाप्रत्यासत्तेर्हेतुत्वे घटपटादिगोचरानुद्बुद्धसंस्कारदशायां घटपटाद्युपनीतभानप्रसङ्गः । अनुद्बुद्धभिन्नतद्विषयकत्वेन तत्र हेतुत्वे तु प्रथमतोऽनुद्बुद्धसंस्कारस्य पश्चादुद्बोधकसमवधानदशायां घटाद्युपनीतभानाजनकत्वप्रसङ्गः । अन्योन्याभावस्य व्याप्यवृत्तित्वनियमात् तस्याव्याप्यवृत्तित्वाभ्युपगमे ऽप्युद्बोधकानामननुगततया तावद्भेदकूटविशिष्टतद्विषयकत्वेन तत्र हेतुत्वे महागौरवप्रसङ्गः । अतो लाघवात्तद्विषयकज्ञानत्वेनैव तत्र हेतुत्वं कल्प्यते । तथा हेतुत्वकल्पने च नियमतः प्रत्यभिज्ञा कृतिसाक्षात्कारपूर्वं तत्ताविषयकस्मृतिकल्पनस्य फलमुखत्वेन गौरवासम्पादकत्वादित्यादिकमन्यदूहनीयम् ॥

भागप्रागभावविशिष्टं कर्मैव तथेति चेत् । न उदीच्यकर्मजन्यविभागप्रागभावविशिष्टस्य कर्मणः क्षणचतुष्टयावस्थायित्वात् । स्वजन्यविभागप्रागभावविशिष्टं तत् तथेति चेत् तर्हि स्वत्वाननुगमादननुगमः जाते च विभागे कुतः

क्षणस्यातिरिक्तत्वं व्यवस्थापयति । **क्षणश्चेति** । क्षणपदार्थ इत्यर्थः । **अतिरिक्त इति** । क्लृप्तभावाभावेभ्योऽतिरिक्त इत्यर्थः । शङ्कते । **विभागेति** । तथा च क्लृप्तेन निर्वाहे व्यर्थमतिरिक्तपदार्थकल्पनमिति भावः । **उदीच्येत्यादि** । तथा च क्षणचतुष्टयान्तर्भावेन तत्र क्षणव्यवहारापत्तिः । न चैवमिष्टापत्तिः । तथा सति घटप्रागभावक्षणेपि घटवान् क्षण इति व्यवहारापत्तेरिति भावः । शङ्कते । **स्वजन्येत्यादि** । स्वपदं तत्तत्क्रियापरम् । उदीच्यकर्मणः स्वजन्यविभागप्रागभावविशिष्टत्वेन पूर्वक्षणचतुष्टयानवस्थायित्वात् नोपदर्शितानुपपत्तिरिति भावः । तत्तत्कर्मणस्तत्क्षण इत्यर्थः । **स्वत्वाननुगमादिति** । स्वत्वस्य तत्तद्व्यक्तिविश्रान्ततयेत्यर्थः । **अननुगम इति** । क्षणत्वस्याननुगम इत्यर्थः । अनुगतक्षणव्यवहारानुपपत्तिस्तया तथाविधक्रियैव क्षण इति लक्षणं प्रश्नव्याजेनाव्याप्तिमप्याह । **जाते विभाग इत्यादि** । जायमाने विभाग इत्यर्थः । तथा चोक्तलक्षणे द्वितीयक्षणेऽव्याप्तिरिति भावः । इदं च प्रतिक्षणं क्रियाया उत्पत्तौ मानाभाव इत्यभिप्रेत्यो-

क्षणव्यवहारः विभागपूर्वसंयोगविशिष्टात् कर्मण एवेति चेत् तर्हि सुतरामननुगमः । एवं पूर्वसंयोगनाशकाले उत्तरसंयोगकाले ऽपि कर्मसत्त्वे क्षणत्वं वक्तव्यमिति । अदृष्टदशरथादीनां

क्रम् । तथात्वे तु नायं दोष इति ध्येयम् । उक्तलक्षणस्य अलक्ष्यं द्वितीयक्षणमभ्युपेत्योक्ताव्याप्तिं वारयितुमुत्तरव्याजेनाशङ्कते । विभागपूर्वसंयोगविशिष्टात् कर्मण इति । स्वजन्यविभागपूर्वसंयोगोभयविशिष्टात् कर्मण इत्यर्थः । तथा च लक्ष्यभेदेन लक्षणस्य नानात्वान्नोक्ताव्याप्तिरिति भावः । अव्याप्तिदोषस्यैवंक्रमेण परिहारे ऽप्यननुगमदोषस्यानुद्धारादित्यभिप्रेत्य दूषयति । तर्हीत्यादि । प्रकारान्तरेणाप्यननुगमं दर्शयति । एवमिति । स्वजन्यविभागप्रागभावविशिष्टकर्मणः स्वजन्यविभागपूर्वसंयोगोभयविशिष्टकर्मणश्च क्षणत्वमिवेत्यर्थः । एवंशब्दस्याव्ययत्वेन नानार्थत्वात् प्रकृते दृष्टान्तपरता । वक्तव्यमिति । पूर्वसंयोगनाशोत्पत्तिविशिष्टक्रियाया उत्तरसंयोगोत्पत्तिविशिष्टक्रियायाश्च क्षणत्वं वक्तव्यमित्यर्थः । इदमुपलक्षणम् । पूर्वसंयोगनाशोत्तरसंयोगप्रागभावोभयविशिष्टक्रियाया अपि क्षणत्वमवसेयम् । तथा चाव्याप्तिरूपदोषस्य परिहारेऽपि क्षणपदार्थाननुगमरूपदोषो दुरुद्धर इति भावः । न चैवं क्षणत्वमेवातिरिक्तमभ्युपेयम् तेनैवानुगतक्षणव्यवहारनिर्वाहात् किं क्षणपदार्थस्यातिरिक्तत्वाभ्युपगमेनेति वाच्यम् । विनिगमनाविरहेणैककालोत्पन्ननानातथाविधक्रियासु क्षणत्वसम्बन्धकल्पनामपेक्ष्यातिरिक्तक्षणम-

चेदानीन्तनानां दशरथपदात् अन्येषामपि पिशाचादिपदात् केन रूपेण पदार्थोपस्थितिरित्यवहितैः परिभावनीयं सूरिभिरिति कृतं पल्लवितेन ॥

भ्युपेत्य तत्रैव तत्सम्बन्धकल्पनाया लघीयस्त्वात् । ननु इदानीन्तनानां दशरथादिपदात् कथं शाब्दबोधः । इदानीन्तनदशरथत्वादिप्रकारकग्रहाभावेन विशेषणग्रहाभावात् दशरथत्वविशिष्टादौ शक्तिग्रहासम्भवेन दशरथपदजन्यदशरथत्वादिविशिष्टपदार्थोपस्थितेरभावात् । एवं कथं वा पुंसां पिशाचादिपदात् पिशाचत्वादिविशिष्टस्य शाब्दबोधः पूर्वदर्शितरीत्या पदजन्यपदार्थोपस्थित्यभावादित्याशङ्कामपनेतुमाह । अदृष्टदशरथेत्यादि । परिभावनीयमिति । भावनया निर्वाह्यमित्यर्थः । तथा चायं पूर्वपक्षो न दुःसमाधेयः । किं तु भावनासमाधानक इति भावः । भावनासाध्यसमाधानत्वे तादृक् यत्र प्रमेयवानयमित्यनुभवजन्यः प्रमेयवानयमिति संस्कारो जातस्तदनन्तरं तस्मात्प्रमेयत्वांशे दोषवशाद्दशरथत्वमात्रप्रकारकस्मृतिजनकोद्बोधकवशाद्दशरथत्वप्रकारकस्मरणं तत्र दशरथत्वविशिष्टे शक्तिग्रहसम्भवेन तज्जन्यदशरथत्वादिविशिष्टोपस्थितेः सुलभतया दशरथत्वादिप्रकारकशाब्दबोधे बाधकाभावः । एवं पिशाचादिपदस्थलेऽपि द्रष्टव्यम् । यदि च तदंशे ऽन्याप्रकारकस्मृतिं प्रति तदंशे ऽन्याप्रकारकतत्प्रकारकसंस्कारस्य हेतुत्वमावश्यकम् अन्यथा जातित्वरूपेण घटत्वप्रकारकसंस्कारादपि जातित्वांशे मोचदशायां

एवं स्वत्वमपि पदार्थान्तरम्। यथेष्टविनियोगयोग्यत्वं तदिति चेत् कोऽसौ विनियोगः। भक्षणादिकमिति चेत्। न परकीयेऽप्यन्नादौ तत्सम्भवात्। शास्त्रनिषिद्धं तथेति चेत् किं

घट इति स्मरणापत्तेः तथा च कथमुपदर्शितरीत्या दशरथादिपदात् दशरथत्वादिविशिष्टे शक्तिग्रहस्योपपादनं तज्जन्यशाब्दबोधोपपादनं चेति विभाव्यते। तथापि यत्र दशरथत्वादिसम्बन्धेन घटादेः भ्रमो जातः तत्र तथाविधशक्तिग्रहाद्युपपादनं भवत्येव। न च तस्य सम्बन्धतायां मानाभावः संयोगादौ सम्बन्धतायुक्तेरत्रापि तौल्यादित्यलमधिकेन॥

एवं स्वत्वमपीति। चैत्रस्येदं धनमित्यादिप्रतीतिविषयो धनवृत्तिचैत्रनिरूपितसम्बन्धोपोत्यर्थः। **पदार्थान्तरमिति।** नैयायिकानां स्वत्वत्वेन व्यवह्रियमाणं यत्तदपेक्षया अतिरिक्तमित्यर्थः। ननु क्लृप्तेन निर्वाहे किं तत्रातिरिक्तत्वकल्पनेनेत्याशयेन शङ्कते। **यथेष्टेत्यादि।** **तत्।** स्वत्वम्। **तत्सम्भवादिति।** भक्षणसम्भवादित्यर्थः। तथा च तथाविधभक्षणे कृते पुरुषान्तरीयान्नादौ स्वत्वापत्तिरिति भावः। **तत्।** भक्षणम्। तथा विनियोगः परकीयान्नादिभक्षणस्य शास्त्रनिषिद्धत्वान्न तद्योग्यतामादाय पुरुषान्तरस्यान्नादौ पुरुषान्तरस्य स्वत्वापत्तिरिति भावः। तथाविधशास्त्रज्ञाने तद्घटितस्वत्वलक्षणस्य दुर्ज्ञे-

तच्छास्त्रम् । परस्वं नाददीतेत्यादिकमिति चेत् स्वत्वाप्रतीतौ कथं तत्प्रवृत्तिः । तस्मात् स्वत्वमतिरिक्तमेव । प्रमाणं च तत्र परस्वं नाददीतेत्यादिकं शास्त्रमेव । तच्च प्रतिग्रहोपादानक्रय-

यत्वमित्याशयेन पृच्छति । किं तदिति । परकीयान्नादिभक्षणनिषेधबोधकमित्यर्थः । तस्य उपदर्शितशास्त्रस्य । प्रवृत्तिः परकीयस्वत्वाश्रयादाननिषेधबोधकत्वम् । तथा च स्वत्वज्ञाने सति तथाविधशास्त्रादुपदर्शितनिषेधबोधः । शास्त्रात् तथाविधनिषेधबोधे सति शास्त्रबोधिततथाविधनिषेधप्रतियोगित्वरूपेणोपदर्शितनिषिद्धत्वादिघटितोपदर्शितस्वत्वज्ञानमित्यन्योन्याश्रय इति भावः । इदमुपलक्षणम् । योग्यस्वस्य निर्वचनाशक्यतयापि तद्घटितलक्षणमनुपपन्नमित्यादि द्रष्टव्यम् । उपसंहरति । तस्मादिति । क्लृप्तमध्ये निवेशासम्भवादित्यर्थः । न च यथेष्टविनियोगोपायक्रयादिविषयत्वमेव तदस्तु किं तदतिरिक्तस्वत्वकल्पनेनेति वाच्यम् । तादृशविषयताया धनस्वरूपत्वे क्रयपूर्वकालेपि तदीयस्वत्वव्यवहारप्रसङ्गात् । क्रयस्वरूपत्वे तु क्रयनाशक्षणे तदीयस्वत्वनाशप्रसङ्गात् अतिरिक्तत्वे तु अस्माकं समीहितस्य सिद्धत्वादिति । ननु सर्वमिदं सम्भवति स्वत्वे प्रमाणसद्भावे तत्तु न पश्याम इत्यत आह । प्रमाणं चेत्यादि । परस्वं नाददीतेत्यादि । शास्त्रस्य निषेधप्रतियोगितावच्छेदकघटकत्वेन स्वत्वस्य प्रमितिजनकत्वात् स्वत्वप्रमाणत्वमित्यर्थः । तच्चेति । अतिरिक्तस्वत्वं चेत्यर्थः । प्रतिग्रहः दानजन्यपरस्वत्वनाशानन्तरोत्पन्नस्व-

यापित्रादिमरणैर्जन्यते[१] दानादिभिश्च नाश्यते। कारणानामेकशक्तिमत्त्वात् कार्याणां वैजात्याद्वा कार्यकारणभावनिर्वाह इति दिक् ॥

स्वत्वसम्पादकं ग्रहणमुपादानम् अस्वामिकारण्यस्थस्य काशकुशादेरानयनम्। **दानादिभिरिति**। आदिपदग्राह्यो विक्रयादिः। ननु स्वत्वोत्पत्तिं प्रति प्रतिग्रहादीनां समुदितानां न हेतुत्वम्। तथाविधसमुदितघटकैकसत्त्वे स्वत्वोत्पत्त्या व्यभिचारात्। नापि प्रत्येकं तेषां तत्र हेतुत्वम्। परस्परं विना परस्परकारणात् स्वत्वोत्पत्त्या तद्दोषतादवस्थ्यात। एवं स्वत्वनाशं प्रति दानादीनां हेतुत्वेपि विभावनीयमित्यत आह। **कारणानामेकशक्तिमत्त्वादिति**। स्वत्वादिकं प्रत्येकशक्तिमत्त्वेन तत्र तेषां हेतुत्वाभ्युपगमादित्यर्थः। शक्त्यनङ्गीकारे त्वाह। **कार्याणामित्यादि**। तत्तद्विजातीयस्वत्वरूपकार्यं प्रति प्रत्येकं प्रतिग्रहादीनां हेतुत्वाभ्युपगमादित्यर्थः। कार्यकारणभावनिर्वाहः स्वत्वादीनांप्रतिग्रहादीनां निर्दुष्टः कार्यकारणभावः। केचित्तु स्वत्वं नातिरिक्तं किं तु क्वचिद्विक्रयप्रागभावविशिष्टक्रयविनाशः क्वचिद्दानादिप्रागभावविशिष्टप्रतिग्रहादिध्वंसः क्वचिद्विक्रयप्रागभावविशिष्टपित्रादिध्वंसः स्वत्वम्। न चैवं सति स्वत्वमित्याकारकानुगतव्यवहारानुपपत्तिः। तत्रेष्टापत्तौ क्षतिविरहात्।

---

(१) स्वत्वं प्रतिग्रहोपादानपित्रादिमरणजन्य—पा॰ ३ पु॰।

एवं शक्तिरप्यतिरिच्यते । तृणारणिमण्यादिस्थले जातित्रयकल्पनामपेक्ष्य तत्तत्स्वन्यानामेकशक्तिमत्त्वेन कारणत्वकल्पनाया एव लघु-

अतिरिक्तस्वत्ववादिनामपि तथाविधव्यवहारोपपत्तये अतिरिक्तस्वत्वत्वाङ्गीकारस्यावश्यकतया मन्मतेऽप्यतिरिक्ततन्मात्राभ्युपगमेनानुगतव्यवहारसम्भवाच्च । अतिरिक्तस्वत्ववादिमते स्वत्वत्वं नातिरिच्यते इति तु नाशङ्कनीयम् अधिकरणभेदेन स्वत्वभेदाङ्गीकारस्यावश्यकत्वात् । अन्यथा एकद्रव्यविक्रयादिना सर्वत्र स्वत्वनाशप्रसङ्गादिति वदन्ति । तद्धेयम् प्रागभावे मानाभावेन तथा वक्तुमशक्यत्वात् ॥

वह्नित्वावच्छिन्नं प्रति तृणारणिमण्यादीनां न तृणत्वादिना हेतुत्वं व्यभिचारात्[१] किं तु तत्सम्बन्धेनैकामतिरिक्तशक्तिमभ्युपेत्य एकशक्तिमत्त्वेनैव तत्र तेषां सम्बन्धानां हेतुत्वमिति मीमांसकमतमवलम्ब्याह । **एवमिति । शक्तिरपीति ।** वह्निजनकतावच्छेदकत्वेन तृणादिसम्बन्धेऽप्यतिरिक्तशक्तिरभ्युपेयते इत्यर्थः । ननु तृणादिजन्यतावच्छेदकत्वेन वह्निनिष्ठजातित्रयं स्वीकृत्य तथाविधजातित्रयावच्छिन्नं प्रति तृणादीनां तृणत्वादिना हेतुतात्रयकल्पनेनैवोपपत्तौ किमतिरिक्तशक्तिकल्पनेनेत्याशङ्कां निरसितुमाह । **तृणादिस्थल इत्यादि ।** तथा च तादृशजातित्रयमभ्युपेत्य कार्यकारणभावत्रयाभ्युपगमे गौरवात् तदपेक्ष्यैकामतिरिक्तामभ्युपेत्यैकशक्तिमत्त्वेन तत्रैककार्य-

(१) गौरवात्-पा० ७ पु० ।

त्वेन न्याय्यत्वात्। सम्बन्धत्रितयनिष्ठैकजात्यङ्गीकारे च नोदनत्वादिना जातिसङ्करप्रसङ्गः। यदि चान्वयव्यतिरेकाभ्यां तृणादेरपि कारणत्वमिष्यते तदा तेषामप्येकशक्तिमत्त्वेन तदस्तु तथापि जातित्रयकल्पनामपेक्ष्य शक्तिद्वयकल्पनैव लाघवेन ज्यायसीति। तेष्वपि चैकजात्यङ्गीकारे मणित्वादिना सङ्करप्रसङ्गः॥

कारणभावकल्पने लाघवस्यातिस्फुटत्वादिति भावः। ननु यादृशसम्बन्धत्रयेष्वेकां शक्तिं कल्पयित्वा तत्र तादृशजाति मत्त्वेनैकहेतुताकल्पनोपपत्तौ लाघवाभावाच्चातिरिक्तशक्तिकल्पनमनर्थकमित्यत आह। **सम्बन्धत्रितयेत्यादि। जातिसङ्करप्रसङ्ग इति।** नोदनत्वाभाववति तादृशी जातिरभिघाताख्यतादृशसंयोगे तादृशवैजात्याभाववति रथादिनोदनाख्यसंयोगे नोदनत्वजातिः। एकत्र तादृशनोदनाख्यसंयोगे च तादृशजातिद्वयसमावेश इति साङ्कर्यमिति तेषु जात्यङ्गीकारोऽशक्य इति भावः। **यदि चेति।** वस्तुतस्तथाविधान्वयव्यतिरेकानुविधाने मानाभाव इति भावः। **तेषामपीति।** तृणादीनामपीत्यर्थः। **मणित्वादिनेति।** आदिना तेजस्त्वादिपरिग्रहः। सङ्करस्तु स्पष्टतया नोपपादित इति। अत्रेदमवधेयम्। तृणादिसम्बन्धानामेकशक्तिमत्त्वेन तत्र हेतुत्वे फूत्काराभावदशायां वह्नित्वावच्छिन्नापत्तिः। न च फूत्कारादीनामपि

पदजन्यधर्मिककोटिद्वयतदुभयविरोधि-

सहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यम् । तथाप्यरणि-सम्बन्धसत्त्वे फूत्कारसत्त्वे मन्थनाद्यसत्त्वे वह्नित्वावच्छि-न्नोत्पत्त्यापत्तेः । तादृशजातित्रयमभ्युपेत्य प्रत्येकं तादृश-जातित्रयावच्छिन्नं प्रति प्रत्येकतृणादीनां तृणत्वादिना हेतुतात्रयकल्पने तु नैवानुपपत्तिः । तृणत्वावच्छिन्नेन फल-जनने एव फूत्कारस्य सहकारित्वाभ्युपगमात् । न च फूत्कारादिसम्बन्धानामप्येकशक्तिमत्त्वेनैव तत्र हेतुत्वे अ-रणिसम्बन्धकालीनफूत्कारादिसम्बन्धे तादृशशक्त्यनभ्युप-गमेन न तदवच्छिन्नस्य सहकारित्वाभ्युपगमे उपदर्शिता-पत्तिरिति वाच्यम् । तथा सति तृणादिसम्बन्धानामेकश-क्तिमत्त्वेन हेतुत्वे मानाभावः । तृणादिसम्बन्धाभावका-लीनफूत्कारादिसम्बन्धेन तादृशशक्त्यनभ्युपगमात् तेनैवा-पत्तिवारणसम्भवात् । यदि च विनिगमनाविरहेण तादृ-शोभयरूपेण हेतुत्वमिति विभाव्यते तदा तृणादिसम्ब-न्धकालीनवायुसंयोगादीनामप्येकशक्तिमत्त्वे नहेतुतामा-दाय विनिगमनाविरहो दुर्वार इति । तस्माज्जातित्रयम-भ्युपेत्य तथाविधकार्यकारणभावकल्पनमेव निराबाधस-रणिमादधातीति सारम् ॥

शब्दो नित्यो नवेत्यादिविप्रतिपत्तिवाक्येभ्यः शब्दा-दिधर्मिणि उपस्थितिः नित्यत्वनित्यत्वाभावकोटिद्वयोप-स्थितिश्च तदनन्तरं विरोधभासकसामग्रीसहकृतेभ्यस्तदु-पनायकज्ञानेभ्यः शब्दो नित्यो न वेत्यादिमानससंशयः न तु तत्र शाब्दात्मकः संशयो जायते परोक्षज्ञानं निश्चय एवेति सिद्धान्तविरोधात् । एवं च संशयप्रयोजकं वाक्य-विप्रतिपत्तिरिति प्राञ्चः । तन्मतं दूषयति । **पद-जन्येत्यादि** । तथाविधविप्रतिपत्तिवाक्यस्यात् शब्दादि

पदाच्छब्दादिरूपधर्म्युपस्थितिस्तद्धटकीभूतनित्यादिपदनञ्पदाभ्यां नित्यत्वनित्यत्वाभावादिरूपकोटिद्वयोपस्थितिस्तद्धटकीभूतवाकाराद्विरोधोपस्थितिस्तदनन्तरं संशयात्मकयोग्यताज्ञानसहिताच्छब्दो नित्यो न वेत्यादिवाक्यात् प्रथमत एव शब्दो नित्यो न वेति शाब्दसंशय इति पदजन्येत्यारभ्य संशय इत्यन्तग्रन्थस्यार्थः। ननु संशये तदधिकरणावृत्तित्वरूपविरोधो न प्रकारस्तथासति तदभावव्याप्यवत्ताज्ञानरूपसंशयप्रतिबन्धकस्य कार्यकाले सत्त्वात् संशयस्य दुर्घटत्वापतेः किं तु संशये विरोधः संसर्गविधया भासते तस्य तु पूर्वमुपस्थितिर्नापेक्षितेति विरोधज्ञानस्य संशयहेतुत्वोत्कीर्तनमसङ्गतमेवेति चेन्न। तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वमेकं तदभावव्याप्तिप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिनिर्णयविशिष्टतद्धर्मावच्छिन्नकारताशालिनिर्णयत्वेन पुरुषत्वव्याप्यकरादिमांश्चायमितिज्ञानद्वयादपि पुरुषत्वसन्देहनिवृत्तेः। अपरं च तदभावव्याप्त्यतिरिक्तनिष्ठप्रकारत्वानिरूपितप्रकारताशालिनिर्णयत्वेन पुरुषत्वव्याप्यवानयमिति ज्ञानादपि पुरुषत्वसन्देहनिवृत्तेः। एवं च संशये कोट्यंशे विरोधकोटितावच्छेदकयोरेकत्र द्वयमितिरीत्या भानोपगमात्। तयोपदर्शितप्रतिबन्धकतावच्छेदकद्वयान्यतरानाक्रान्तत्वेनोक्तानुपपत्तेरभावादिति दिक्। तथा च परोक्षज्ञानं निश्चयात्मकमेवेति जीर्णसिद्धान्तो युक्त्यभावादश्रद्धेयः। अन्यथोभयकोटिविषयकशाब्दसामग्रीकाले संशयाकारशाब्दबोधवारणायैककोटिविषयक-

ज्ञानसंशयात्मकयोग्यताज्ञानसहितात् शाब्दा-
दाहत्यैव संशयः। समानानेकेत्यादिसूत्रं प्रमाण-

शाब्दबुद्धिं प्रति अपरकोटिविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवापत्तिरिति भावः। वस्तुगत्या तथाविधसिद्धान्तोपि नास्तीत्येतदर्थं संशयात्मकशाब्दबोधे महर्षेः संवादमाह(१)। **समानानेकेत्यादि**। समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति सूत्रे संशयहेतुत्वेन विप्रतिपत्तिवाक्यस्योल्लेखं कुर्वतो महर्षेरपि संशयात्मकं शाब्दज्ञानमभिमतमिति समुदित(सूत्रे संशयहेतु) ग्रन्थार्थः(२)। सूत्रार्थस्तु समानोऽनेकेषां तत्कोटितदभावकोटिमतां यो धर्मस्तदुपपत्तेर्धर्मिणि तद्वत्ताज्ञानाद्विप्रतिपत्तेर्विरुद्धकोटिद्वयप्रतिपादकाच्छब्दो नित्यो नवेत्यादिवाक्यादुपलब्धिरनुपलब्धिश्च तत्कोटेः तथा च या तत्कोटेरुपलब्धिर्या च नञ्व्यत्यासेन तदभावकोटेरुपलब्धिस्तयोर्याऽव्यवस्थाऽव्यवस्थापकोऽनिश्चायक इति यावत् तस्मात् सपक्षविपक्षव्यावृत्तधर्मवत्ताज्ञानरूपासाधारणधर्मवद्धर्मिज्ञानादित्यर्थः। विशिष्यते व्यावर्त्यते विशेषदर्शनविषयो यस्मात् स विशेषो विशेषादर्शनं तत्सापेक्ष इत्यर्थः। एतावता कारणमुक्त्वा लक्षणमाह। **विमर्श इति**। एकधर्मिकविरुद्धोभयप्रकारकज्ञानमित्यर्थः। भाष्यकारस्तु समानानेकधर्मेत्यादौ समानः कोटिद्वयसहचरितधर्मः अनेकधर्मोऽसाधारणधर्मः उपलब्ध्यनुपलब्ध्यव्यवस्था तत्कोटिज्ञानस्य तदभावकोटिज्ञानस्य वा सविषयकत्वानवधारणं प्रामाण्यसंशय इति यावत्। विशेषापेक्षार्थस्तु पूर्वोक्त एव।

(१) सम्मतिमाह-पा० २ पु०।
(२) ( ) एतन्मध्यस्था नास्ति २ पु०।

यतो महर्षेरपि सम्मतमिदम् । एकधर्मिकनानाविरुद्धधर्मप्रकारकज्ञानत्वरूपं कोटिद्वयविरोधिज्ञानसामग्रीसमाजाधीनं च संशयत्वं नीलघटत्ववन्न कार्यतावच्छेदकम् । एवं संशयत्वशून्यज्ञानत्वरूपनिश्चयत्वमपि नीलत्वशून्य-

एतावता कारणमुखेन संशयविशेपलक्षणमुक्तं विमर्ष इत्यनेन एकधर्मिकविरुद्धोभयप्रकारकज्ञानत्वरूपं संशयसामान्यलक्षण मुक्तमित्याहुः । यथा नीलत्वावच्छिन्नसामग्रीघटत्वावच्छिन्नसामग्रीभ्यां तदुभयधर्मावच्छिन्ने जायमाने ऽर्थवशसम्पन्ना नीलघटत्वाछच्छिन्नोत्पत्तिरतो नीलघटत्वं न कार्यतावच्छेदकं तथा एकधर्मिकविरुद्धतत्तदभावज्ञानसामग्री(१)भ्यां तद्धर्मिकविरुद्धतत्प्रकारकज्ञानत्वतद्धर्मिकविरुद्धतदभावप्रकारकज्ञानत्वोभयावच्छिन्ने जायमाने एकैकधर्मिकविरुद्धतत्तदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वावच्छिन्नोत्पत्तिरपि अर्थवशसम्पन्ना भविष्यतीति तथाविधसंशयत्वमपि न कस्यचित्कार्यतावच्छेदकं मानाभावादित्याह **एकधर्मिकेत्यादि** । समानं मिलनम् । तथा च संशयत्वावच्छिन्नं प्रति धर्मिज्ञानादीनां हेतुत्वमभ्युपगच्छतां प्राचीनानां मतमनुपादेयमिति भावः । **एवमिति** । संशयत्ववदित्यर्थः । **संशयत्वशून्यज्ञानत्वरूपेति** । तद्धर्मिविशेष्यतानिरूपिततदभावप्रकारताशून्यत्वे सति तद्धर्मिविशेष्यतानिरूपिततत्प्रकारताशालिज्ञानत्व-

(१) विरुद्धोभयज्ञानसामग्री-पा० २ पु ।

घटत्ववत्तथेति ॥

कारणत्वं च पदार्थान्तरम् । तच्च कार्यभेदा-

रूपमित्यर्थः । नीलत्वशून्यघटत्ववदिति । यथा नीलोत्पादकसामग्र्यभावदशायां घटोत्पादकसामग्रीबलात् घटत्वावच्छिन्ने जायमाने नीलत्वशून्यघटत्वावच्छिन्नस्योत्पत्तिरर्थसिद्धेति तन्न कार्यतावच्छेदकं प्रमाणाभावात् । तथा तदभावप्रकारकज्ञानोत्पादकसामग्र्यभावदशायां तत्प्रकारकज्ञानत्वावच्छिन्ने जायमाने तथाविधनिश्चयत्वावच्छिन्नोत्पत्तेरप्यर्थतो निर्वाहे तथाविधनिश्चयत्वमपि न कार्यतावच्छेदकं प्रमाणाभावादिति भावः । नन्वेवं सति स्वसामानाधिकरण्यकालिकविशेषणतोभयसम्बन्धावच्छिन्नदुरितनिष्ठप्रतियोगितावच्छेदकताकभेदवद्दुरितध्वंसत्वमपि तत्त्वज्ञानकार्यतावच्छेदकं मास्तु आर्थसमाजग्रस्तत्वादिति चेन्न । आर्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वे प्रमाणाभाव एव बीजम् । प्रकृते तु तथाविधकार्यकारणभावग्राहकतमेवेत्यादिवेदराशेर्जागरूकतया तथा वक्तुमशक्यत्वादिति ॥

ननु कारणत्वं नानन्यथासिद्धत्वे सति कार्यनियतत्वपूर्वकालवृत्तित्वम् एतद्घटत्वावच्छिन्नं प्रति देशान्तरीयरासभादेरपि हेतुत्वापत्तेः[१] । नापि कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणवृत्तित्वविशिष्टस्याभावस्य प्रतियोगितानवच्छेदकीभूतो यो धर्मस्तद्वत्त्वं कारणत्वं विषयतासम्बन्धेनेच्छां प्रति विषयतासम्बन्धेन ज्ञानस्य हेतुत्वानुपपत्तेः । अवच्छेद्याधिकरणासम्बद्धक्षणस्याव-

(१) कारणत्वापत्तेः-पा० २ पु० ।

च्छेदकत्वाभावेन इच्छाव्यवहितपूर्वक्षणावच्छिन्नस्य विषयतासम्बन्धेनेच्छाधिकरणीभूतो योऽनागतपाकस्तद्वृत्तित्वस्याभावेऽप्रसिद्धा तथाविधकारणत्वस्य तत्रासम्भवात्। अथ कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्यसमानाधिकरणवृत्तित्वविशिष्टस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितानवच्छेदकीभूतो योऽन्यथासिद्धानिरूपकीभूतो धर्मस्तद्वत्त्वम्। अन्यथासिद्धनिरूपकत्वं च यद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नव्यापकतावच्छेदकीभूतयद्धर्मावच्छिन्ने (व्यापकतावच्छेदकीभूतयद्धर्मावच्छिन्नेन) प्राणिकानां कारणत्वव्यवहारस्तत्तद्व्यक्तिभेदकूटवत्त्वं न तु प्रसिद्धान्यथासिद्धिपञ्चकानिरूपकत्वं तत्र तथा सति उत्तरसंयोगं प्रति विभागस्य हेतुत्वापत्तेः। अन्यथासिद्धिपञ्चकं तु यथा। अन्यं प्रति पूर्ववर्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववर्त्तिताग्रहस्तस्य तं प्रति अन्यथासिद्धत्वम् यथा ज्ञानं प्रति शब्दसमवायिकारणत्वेन आकाश अन्यथा सिद्धः। एवं कारणान्तरेण सह यस्य यं प्रति पूर्ववर्तिताग्रहस्तस्य तं प्रति अन्यथासिद्धत्वम्। यथा घटं प्रति दण्डविशिष्टचक्रमन्यथासिद्धम्। एवमन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्कार्यं प्रति तत्कारणसहभूतमन्यथासिद्धम्। यथा पाकजरूपं प्रति गन्धप्रागभावः अन्यथासिद्धः एवमगुरुव्याप्यधर्मेण यस्य यं प्रति कारणत्वं सम्भवति तस्य तं प्रति गुरुव्यापकधर्मेण अन्यथासिद्धत्वम् यथा घटं प्रति द्रव्यत्वेन दण्डो ऽन्यथासिद्धः। एवं यद्धर्मावच्छिन्नजनकतावच्छेदकीभूतो यो धर्मः सोऽपि तत्रान्यथासिद्धः। यथा घटत्वावच्छिन्नं प्रति दण्डत्वमन्यथासिद्धमिति। विभागत्वावच्छिन्ने निरुक्तान्यथासिद्धिमध्ये कस्याप्यसत्त्वात्। एवं प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तेश्च। तत्तद्व्यक्तित्वविशि-

दवच्छेदकभेदान्न भिद्यते कारणत्वत्वेनाखण्डो-

पृ प्रसिद्धान्यथासिद्धिपञ्चकाभावात् । अत एव कारणे ऽन्यथासिद्धभिन्नत्वविशेषणं त्यक्त्वा निरुक्तधर्मे तदनिरूपकत्वविशेषणदानम् । अन्यथा प्रतिबन्धकाभावस्यापि प्रतिबन्धकतावच्छेदकीभूतधर्मावच्छिन्नाभावत्वेन हेतुत्वस्य सर्वसंमतस्याभावापत्तेरिति चेन्न तावद्भेदकूटविशिष्टज्ञानस्यावश्यकतया ईदृशकारणत्वस्यासर्वज्ञापरिच्छेद्यत्वापत्तेः। न च स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वाधिकरणवृत्तित्वविशिष्टाभावप्रतियोगितानवच्छेदकत्वविशिष्टतद्व्यक्तिभेदकूटवत्त्वसम्बन्धेन कार्यविशिष्टो यो धर्मस्तद्वत्त्वं कारणत्वं तत्र च नोक्तदोषः सम्बन्धस्य ज्ञातस्यैव विशिष्टबुद्धिविषयत्वादिति वाच्यम् । तस्य सम्बन्धत्वसन्देहेन तथा वक्तुमशक्यत्वादित्यत आह' कारणत्वं चेति । पदार्थान्तरमिति । तथाविधनियतपूर्ववर्तित्वाद्यतिरिक्तमित्यर्थः। तस्य सर्वत्रैकत्वे दण्डनिष्ठकारणता न पटनिरूपिता दण्डत्वावच्छिन्नकारणता न चक्रत्वावच्छिन्नेत्याद्याकारकप्रतीत्यनुपपत्तिरित्यत आह । तच्चेति । कारणत्वं चेत्यर्थः। अवच्छेदकभेदादिति। कारणतावच्छेदकभेदादित्यर्थः। नन्वेवं सति कारणं कारणमित्याकारकानुगतप्रतीत्यनुपपत्तिरेवमनुगतकारणपदशक्यतावच्छेदकानुपपत्तिश्चेत्यत आह। कारणत्वत्वेनेति। तत्कारणत्वम् । तथा च कारणत्वत्वरूपानुगतधर्ममादाय तथाविधानुगतप्रातीत्याद्युपपत्तिरिति भावः। अत्रेदं तत्त्वम्। कारणत्वं नातिरिक्तं किन्तुकारणतावच्छेदकस्वरूपम्। न चैवं सत्यभेदे अवच्छेद्यावच्छेदकभावानुपपत्तिरिति वा-

पाधिनानुगतं च तत्तत्कारणपदशक्यतावच्छेद-
कम्। ग्राहकं च तस्य क्वचिदन्वयव्यतिरेकदर्श-
नसहकृतं प्रत्यक्षम् क्वचिदनुमानं क्वचिदागमा-
दिकम् ॥

एतेन कार्यत्वं व्याख्यातम् ॥

कारणत्वप्रतियोगिकत्वमेव कार्यत्वमिति
चेत् । कार्यत्वप्रतियोगित्वमेव कारणत्वमिति
किं न रोचये । तस्मात् कार्यत्वं कारणत्वं
चोभयमेवातिरिक्तं भिन्नं चेति कृतं पल्लवि-
तेनेति ॥

च्यम्। एकरूपेण तदनभ्युपपगमात्। अत्र तु कारणतात्वे-
नावच्छेद्यायाः कारणताया अवच्छेदकत्वस्य स्वरूपतो
दण्डत्वेऽभ्युपगमे क्षतिविरहादतिरिक्तकारणत्वत्वस्य
सर्वैरङ्गीकारादिति । तस्येति । कारणत्वस्येत्यर्थः ।
आगमादिकमिति । वेदादिकमित्यर्थः ॥

एतेनेति । क्लृप्तान्तर्भावेनानिर्वाहेणेत्यर्थः[1] । व्या-
ख्यातम् । अतिरिक्तत्वेन व्याख्यातम् ॥

शङ्कते। कारणत्वेत्यादि। किं न रोचय इति।
तस्मादिति । विनिगमनाविरहादित्यर्थः । भिन्न-
मिति । परस्परं भिन्नमित्यर्थः ॥

---

(१) क्लृप्तान्तर्भावानिर्वाहेणेत्यर्थः–पा० ३ पु० ।

संख्या च पदार्थान्तरं न तु गुणः गुणादिष्वपि तद्वत्त्वप्रत्ययात्[१]। न चासौ भ्रमः बाधकाभावात् । एकार्थसमवायप्रत्यासत्त्या तथाप्रत्यय इति चेत् । न विलक्षणाभ्यां समवायैकार्थसमवायाभ्यामविलक्षणायास्तद्वत्ताप्रतीतेरयोगात् । घटत्वादौ चैकार्थसमवायादेकत्वप्रत्ययवत् द्वित्वाद्येकार्थसमवायाद्द्वित्वादिप्रत्ययप्रसङ्गः रूपत्वादौ च न तत्सम्भवः ॥

तद्वत्त्वप्रत्ययात् । एकं रूपं द्वे रूपे इत्याकारकसंख्यावत्त्वप्रत्ययात् । तथा च संख्याया गुणत्वे रूपादिगुणे तथाप्रत्ययानुपपत्तेः । गुणे गुणानङ्गीकारादिति भावः । **असाविति** । रूपादौ संख्यावत्त्वप्रत्यय इत्यर्थः । **बाधकाभावादिति** । तथा च बाधकाभावे ऽपि भ्रमत्वाङ्गीकारे प्रतीतिबलात् पदार्थमात्रसिद्धिविलोपप्रसङ्गः । सर्वत्र प्रतीतेस्तथावक्तुमशक्यत्वादिति भावः । **एकार्थेति** । स्वाश्रयसमवेतत्वप्रत्यासत्त्येत्यर्थः । **अविलक्षणायास्तद्वत्त्वप्रतीतेरित्यादि** । अविलक्षणसम्बन्धविषयकत्वेनानुभवसिद्धायाः संख्यावत्त्वप्रतीतेरसम्भवादित्यर्थः । ननु तथाविधानुभवे मानाभाव इत्यत आह । **घटत्वादौ चेति** । **द्वित्वादीति** । घटत्वद्वयमितिप्रत्ययप्रसङ्गादित्यर्थः । तथा चैकार्थसमवायो न विशिष्टबु-

---

(१) तद्वत्ताप्रत्ययात्–पा॰ २ पु॰ ।

समवायोऽपि च नैको जलादेर्गन्धादिमत्त्वप्रसङ्गात् परं तु नानैव समवायत्वं तु पुनरनुगतमखण्डोपाधिरिति ॥

वैशिष्ट्यमपि पदार्थान्तरम् । रूपादिप्रतीतिनिमित्ततया समवायस्येवाभाववत्ताप्रतीतिनिमित्ततया तस्यापि सिद्धेः । स्वरूपसम्बन्धवि-

---

द्धिनियामक इति भावः । **तत्सम्भव इति** । तथा च स्वाश्रयसमवेतत्वसम्बन्धेनैकत्वादिप्रत्यय सम्भव इत्यर्थः । रूपादौ एकत्वादिसंख्याया अभावेन तथाऽसम्भवादिति भावः ॥

समवायस्यैकत्वे बाधकमाह । **जलादावित्यादि** । पृथिव्यां गन्धसमवायस्य जलनिष्ठस्नेहसमवायस्याभिन्नतया जलादावपि गन्धसमवायसत्त्वात् तत्र गन्धवत्ताप्रतीतिर्दुर्वारैवेति भावः । न च जले गन्धनिरूपितत्वविशिष्टसमवायाभावान्न गन्धवत्ताप्रतीतिरिति वाच्यम् । विशिष्टस्यातिरिक्तत्वाभावेन जलेऽपि तत्सत्त्वात् तथाविधविशिष्टनिरूपिताधिकरणतायाः अतिरिक्तत्वे किमपराद्धं विभिन्नसमवायैरिति ॥

वैशिष्ट्यमपीति । विशेषणताविशेषोऽपीत्यर्थः । **निमित्ततया** । विषयतया । **तस्यापि** । अतिरिक्तविशेषणत्वस्यापि । ननु तादृशप्रतीतेः स्वरूपसम्बन्ध एव विषय इत्याशङ्कते । **स्वरूपसम्बन्धेत्यादि** । तत्तदधि-

शेष एव तथाप्रतीतिनिमित्तमिति चेन्न समवायोच्छेदप्रसङ्गात् । तत्रापि स्वरूपसम्बन्धविशेषस्य निमित्ततायाः सुवचत्वात् ॥

करणादिस्वरूपसम्बन्ध इत्यर्थः । **तथाप्रतीतिनिमित्तमिति** । अभाववत्ताप्रतीतिविषय इत्यर्थः । **तत्रापि** रूपवत्ताप्रतीतावपि । **स्वरूपसम्बन्धविशेषस्य** तत्तदधिकरणस्वरूपसम्बन्धविशेषस्य । **निमित्ततायाः** । विषयतायाः । तथा च समवायमनङ्गीकृत्य यदि घटपटादिरूपस्वरूपसम्बन्धस्य संयोगादिसम्बन्धत्वाभ्युपगमस्तदा घटपटौ मिथः संयुक्तावित्यादिप्रतीतेस्तत्तदधिकरणे सांसर्गिकविषयताभ्युपगमे गौरवम् । यदि च संयोगस्य स्वरूपसम्बन्धः संयोग एव तदा संयोगेन संयोगो वर्तते इत्यपि प्रत्ययः स्यादिति अतिरिक्तसमवाय आवश्यकः । न चातिरिक्तसमवायस्वीकारे तुल्ययुक्त्या तद्वैशिष्ट्यस्याप्यतिरिक्तस्य स्वीकारादुभयकल्पने गौरवात् तदपेक्षयातिरिक्तवैशिष्ट्याख्यस्वरूपसम्बन्ध एव संयोगादिसम्बन्धत्वाभ्युपगम उचित इति वाच्यम् । उपदर्शितयुक्त्या विनिगमनाविरहेणैकसमवायसिद्धौ पश्चात्तद्वैशिष्ट्याख्यसम्बन्धविशेषकल्पनस्य फलमुखत्वेनादोषत्वात् । वैशिष्ट्याख्यसम्बन्धस्तु वैशिष्ट्याख्यरूप एवेति नानवस्थेति यदि विभाव्यते तदा तुल्ययुक्त्याभावस्यातिरिक्तवैशिष्ट्यसम्बन्धस्वीकारोऽप्यावश्यकः । अभावस्याभावसम्बन्धत्वाभ्युपगमे ऽभावाधिकरणवृत्त्यखण्डभेदतावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरहापत्तेः । न चाभावस्यातिरिक्तसम्बन्धस्वीकारेपि तादृशविनिगमनाविरहो दुर्वार

एतेन ज्ञानादिविषयता व्याख्याता ॥

नानुपमृद्य प्रादुर्भावादिति सूत्रम् अनुपमृद्य प्रादुर्भावादिति तदर्थः गुरूणां नये न कलञ्जं भक्षयेदिति कलञ्जभक्षणाभावविषयककार्यमित्यर्थः। एतेनैतादृशोप्यन्वयः स्थलविशेषे व्युत्पत्तिसिद्ध इति मन्तव्यम् ॥

इति वाच्यम्। क्लृप्तेनाक्लृप्तस्य विनिगमनाविरहासम्भवादिति भावः ॥

एतेन। क्लृप्तान्तर्भावासम्भवेन। व्याख्याता। अतिरिक्तत्वेन व्याख्याता। अयं भावः। विषयतायाः ज्ञानस्वरूपत्वे घटपटाविति समूहालम्बनस्य भ्रमत्वापत्तिः। तत्र तदुभयविषयतायाः एकज्ञानस्वरूपत्वेन घटत्वाद्यवच्छिन्नघटत्वाद्यभाववद्वृत्तिविषयताप्रतियोगित्वरूपभ्रमत्वसत्त्वात् विषयतायाः विषयस्वरूपत्वे तु घटभूतलसंयोगाविति समूहालम्बनतो घटवद्भूतलमिति विशिष्टबुद्धेरवैलक्षण्यापत्तेः। न च समूहालम्बनेऽधिकस्य संयोगत्वस्य भानत्वान्नतथेति वाच्यम्। तथा सति घटवद्भूतलसंयोगश्चेतिज्ञानात् तादृशसमूहालम्बनवैलक्षण्यानिर्वाहात्। न च विशिष्टबुद्धौ सम्बन्धसम्बन्धोप्यधिको भासते इति नानुपपत्तिरिति वाच्यम्। सम्बन्धसम्बन्धमादायापि समूहालम्बनसम्भवादिति। अधिकं विषयताविचारेऽनुसन्धेयमिति संक्षेपः ॥

अर्थानां युक्तिसिद्धानां मदुक्तानां प्रयत्नतः ।
सर्वदर्शनसिद्धान्तविरोधेनैव दर्शनम् ॥
अर्था निरुक्ताः सिद्धान्तविरोधेनैव पण्डिताः ।
विना विचारं न त्याज्या विचारयत यत्नतः ॥
सर्वशास्त्रार्थतत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत सादरम्(१) ॥
रीतिरेषापकृष्टापि सेविता पूर्वपण्डितैः ।
यन्निजोक्तिविचाराय याचते विदुषोपरान् ॥(२)

अर्थानामित्यादि । ननु अप्रयोजका एव त्वदर्थां इत्यत आह । युक्तिसिद्धानामिति । मदुक्तानां । नान्येनोक्तानाम् । दर्शनं शास्त्रम् । भावादृशान् । पण्डितान् । एषा पूर्वश्लोकोक्ता । पूर्वपण्डितैः । वाचस्पतिमिश्रादिभिः । अपरानिति । पण्डितानित्यर्थः ॥

पदार्थखण्डनाकूतपुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतम् ॥
श्रीमद्दीधितिकारकल्पितघटीकोलाहलव्याकुले
मार्गे सञ्चरणाय यन्निगदितं सिद्धान्तसिद्धेतरत् ।
दैवात् तेन भवेद्यदीह सहसा प्रौढापराधो मम
क्षन्तव्यः कृतिभिः श्रुतो यदि भवेद्यत्नानुरूपो बलिः॥

(१) सादृत.—पा॰ १ पु॰ ।
(२) शिरोमणिकृतं स्वं पदार्थानां हि खण्डनम् ।
विद्वज्जनैः सदा धार्यं मौलेर्दिव्यप्रकाशकम् ॥
इत्यधिकं २ पुस्तके वर्तते ।

इति महामहोपाध्यायतार्किकशिरोमणि-श्रीरघुनाथभट्टाचार्यविरचितं पदार्थतत्त्वनिरूपणं समाप्तम्[१] ॥

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता
पदार्थखण्डनव्याख्या
समाप्ता ॥

(१) पदार्थतत्त्व समाप्तम्—पा ४ पु ।



प्रतीच्यामित्यादेरिदानीं तदानीमित्यादेश्च प्रत्ययस्य विलक्षणतया वक्तव्यत्वादिति भावः । यत्तु काले दिशीति प्रतीत्योर्विषयभेदानुभवान्न तयोरभेद इति लीलावतीरीतिः । तन्न विभिन्नोपाधिविषयकत्वेनैव, तदुपपत्तेः उपाधिमतोर्भेदः प्रतीयत इति[1] वासनाविरसमानानामेव सरणिः । अन्यथा प्राच्यां प्रतीच्यामित्यादिप्रतीतिषूपाधिमतां भेदोऽनुभूयत इति कथामात्रेण नानादिक्कालसिद्धेर्वा दुरतापत्तेरिति न किञ्चिदेतत् । अथेश्वरादेव तत्तत्कार्योत्पत्तिर्न तु जीवादित्यत्र को हेतुः । तेषामनन्तत्वमिति चेत् न प्रत्येकमादाय विनिगमकाभावात् । नैवम् जीवानां कालत्वदिक्त्वरूपविशेषणाविशेषवत्त्व ज्ञानादिसमवायवत् तस्य मनसा लौकिकप्रत्यक्षापत्तेः । वस्तुतस्तु प्राच्यां दिशि घट एतस्मिन् काले पट इत्यादिप्रतीतयो विलक्षणविशेषणतावत्त्वरूपदिक्त्वकालत्वे उपाधी अवगाहन्ते । वैलक्षण्यं च विषयतात्वादिवदखण्डोपाधिः । अवगाहन्तां वा दिक्कालपदवाच्यत्वलक्षणमेव दिक्त्वं कालत्वं च केशवो हरिः केशरी हरिरित्यादिप्रत्यया इव हरिपदवाच्यत्वरूपं हरित्वमिति नाहशप्रत्ययविषयस्य शब्दसमवायिविभुनः शशविषाणसमत्वात् क्रान्तभावबहिर्भावचिन्तेति शब्दसमवायिकारणतयाऽतिरिक्ताकाशसिद्धिः । न चेश्वर एव तथा अनन्तकोटिजीवैः प्रत्येकं विनिगमकाभावेन सर्वत्र तथा कल्पने गौरवादिति ॥

(३ । ३) नैयायिकनयं निराकरोति । शब्देति । जन्यमात्रं प्रति क्लृप्तनिमित्तकारणतापूर्ववर्तिकत्वेन शब्दं प्रत्यपि भगवतः

(१) भेदोऽनुभूयत इति–पा० ३ पु० ।

परिमाणस्य निराकरिष्यमाणत्वात् । नाद्य प्रतीतय उदयगिरितपनसंयोगाद्यात्मकदिगुपाधेः सूर्यक्रियादिरूपकालोपाधेः स्वाश्रयसंयुक्तसंयोगादिरूपपरम्परासम्बन्धघटकतया दिक्कालावगाहन्त इति भाष्यादयः । नन्न सर्वदिक्कालोपाधिवैशिष्ट्यप्रतीत्यापत्तेः । विशेषणाविशेषस्यैव सम्बन्धत्वात् । स च सम्बन्धोऽतिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् । उदयगिरितपनसंयोगादेश्च प्राच्यादित्वे तत्पश्चिमादिदिग्वर्तिन्यपि ततः प्राच्यामयमित्यादिप्रतीतेरापत्तिः किन्तु तदपेक्षया उदयगिरिसन्निध्यादिकमेव प्राच्यादित्वमिति । केचित्तु तदीयत्वनिरूपितेनोदयगिरिसंयोगादिविशेषेण ततः प्राच्यादित्वव्यवहार इत्यपि वदन्ति । घटादेर्विशेषणतयैव[1] तास्तावगाहन्ते । तत्तद्दिगुपाधिविशिष्टस्यैकस्य वस्तुनस्तत्तत्कालोपाधिविशिष्टस्य चैकस्य वस्तुनो घटादिविशेषणत्वेन भानमन्तरेण पूर्वस्यां दिशि घटः प्रतीच्यां दिशि घटः तस्मिन् काले घट एतस्मिन् काले घट इत्याद्यनुगताकाराद्याकारस्य प्रत्ययस्यानुपपत्तेरिति लीलावतीकृत । मानाभावादिति । ईश्वरातिरिक्तत्वे[2] मानाभावादित्यर्थः । अथोक्तानुगतप्रत्ययानुपपत्तिरेव तयोर्मानम् ईश्वरस्य तद्विषयत्वे प्राच्यां प्रतीच्यां दिशीदानीं तदानीमित्यादेश्च विलक्षणप्रत्ययस्यानुपपत्तेरित्यत आह । तत्तन्निमित्तेति । तत्तत्कालदिगुपाध्यवच्छिन्नादित्यर्थः । तत्तत्कार्यं विलक्षणप्राच्यादिप्रत्ययः । परेषामिति । अतिरिक्तदिगादिवादिनामपि तयोरेकैकत्वस्यैव स्वीकारेण तत्तन्निमित्तसमाधानवशादेव प्राच्यां

१ विशेषणविधयैव-पा० ३ पु० ।
२ अतिरिक्तत्वेन-पा० १ पु० ।

गुण: शब्द: तादृशशब्दं प्रति मृदङ्गत्वादिना समवायिकारणता-या एव ला ववेनोचितत्वात् । त्वयापि मृदङ्गत्वादिना निमित्तका-रणतायाः स्वीकारात् युज्यते च रीतिरयं मृदङ्गेशब्द इत्यादि-प्रतीतेरनुभवसिद्धत्वात् । न च तत्रावच्छेदकत्वं विषयो मानाभा-वात् अन्यथा इहावच्छेदकतात्मकस्वरूपसम्बन्धस्य अन्यत्र समवायस्य कल्पने गौरवात् मूले संयोग इत्यादौ इहाद्य-धिकरणस्यैव प्रकृतेप्यधिकरणान्तरप्रतीत्यापत्तेश्च । न चैवं सति-मुरजादौ मुरजीयशब्दनाशो न स्यात् मुरजादिविशेषगुणनाशं प्रति मुरजादिनाशस्य हेतुत्वादिति वाच्यम् सति मुरजादौ पाके-न तदीयरूपादिनाशवत विरोधिगुणादेव शब्दस्यापि नाशो-पपत्तेः । इत्थं च श्रोत्रमपि कर्ण एव कर्णेन शृणोमीति प्रत्ययात् तस्य , च समवाय एव प्रत्यासत्तिः वीचीतर-ङ्गन्यायेन कर्ण एव शब्दोत्पत्ते । अवच्छेदकताख्यसम्बन्धविशेषे वा स च मृदङ्गादिसमवेत एव क्वचित् शब्दे क्वचित्कर्णस्य अत एव वीचीतरङ्गन्यायेनोत्पादकल्पने गौरवप्रसङ्गोपि निराकृ-तो भवति भवन्ति च निराबाधाः प्रत्यभिज्ञादय इति दिक् । अथातिरिक्ताकाशानभ्युपगमे कथं कर्णविवरावच्छिन्नाकाशस्य श्रोत्रत्वमुपपद्यतामत आह । श्रोत्रमपीति । तथाविधं कर्णविवरा-वच्छिन्नम् । अत्र च श्रोत्रत्वं शब्दग्राहकवहिरिन्द्रियत्वं वस्तु-तस्तु श्रोत्र।दवाच्यत्वमेव श्रोत्रत्वं श्रोत्रतत्सन्निकर्षयोः शब्द-ग्रहहेतुत्वे मानाभवात् कर्णावच्छिन्नशब्दत्वेन विषयविधया-हेतुत्वेनातिप्रसङ्गाभावस्य त्वयापि वाच्यत्वात् वस्तुत अवच्छे-दकतासंसर्गेण विषयगतस्यैव कर्णस्य कर्णत्वेन हेतुत्वं लाघवात्

कारणतायाः क्लृप्तत्वात् तत्र समवायिकारणतामात्रकल्पनयैव समवायिकारणता निर्वहति। जीवे शब्दकारणत्वं समवायित्वं च द्वयं कल्प्यमतो गौरवमिति भावः। अथ शब्दजनकादृष्टवत्तो जीवस्य शब्दकारणतां साधयदनुमानं लाघवाच्छब्दसमवायिकारणतामेव साधयति। अन्यथा ईश्वरे निमित्तसमवायिकारणतयोर्जीवे निमित्तकारणतायाः कल्पने गौरवं स्यादिति जीव एव समवायी शब्दानामित्यत आह। शब्दस्तज्जन्य इति। अथ कार्यतावच्छेदकभेदेन प्रत्यासत्तिभेदेन च कारणताया भेदात् कार्यत्वावच्छिन्नं प्रति यन्निमित्तकारणत्वं ततोऽन्यदेव शब्दत्वावच्छिन्नं प्रति समवायिकारणत्वं तच्च प्रत्येकजीवमादाय विनिगमकरहितमिति नोक्तलाघवावतार इत्यत आह। अहमिति। अथ शब्दवानहमिति कमादायापाद्यते। लौकिकप्रत्यक्षं चेन्न शब्दात्मनोर्मनःश्रवणयोरयोग्यतया तदनुपपत्तेः। तदन्यज्ञानं चेदिष्यत एवैतत् ईश्वरः शब्दवानितिवदुक्तेस्तुल्यत्वादिति चेन्न सत्यपि मनःसंयुक्तस्यात्मसमवाये शब्दस्यायोग्यतयाऽदृष्टादीनामिव मानसलौकिकप्रत्यक्षं प्रति तादात्म्येन प्रतिबन्धकतया निर्वाहेण गौरवापत्तेः। स्वतन्त्रास्तु लौकिकमानसप्रत्यक्षं प्रति विषयस्य विशिष्यैव हेतुत्वोपगमात् सामान्यसामग्र्याश्च विशेषसामग्रीसहिताया एव फलजनकत्वेन विशेषसामग्रीविरहादेव धर्मादेरप्रत्यक्षतोपपत्तौ न प्रतिबन्धकत्वं कल्प्यते। कल्पनं वा गुणलौकिकमानसत्वावच्छिन्नं प्रति जनकतावच्छेदकतया बुद्धित्वादिव्यापको विषयगतो जातिविशेषो लाघवात्। तथा च शब्दानामस्मदादिगुणत्वेपि मानसनिरासादयुक्तमेव तदिति प्राहुः। वस्तुतो ह्यदृष्टादीनामेव

(११।२) परमाणुद्व्यणुकयोरिति। त्रसरेणोर्द्रव्यसमवेतसमवेतत्वद्रव्यसमवेतत्वयोर्मानाभाव इत्यर्थः। नन्वेवं त्रसरेणोरुत्पत्तिर्न स्यात् समवायिकारणाभावादित्यत आह। त्रुटाविति। विश्रामादिति। द्रव्यसमवायित्वस्येत्यादि। असमवेतत्वसामानाधिकरण्यं विश्रामः। तथा च तस्यासमवेतद्रव्यत्वात् सदातनत्वेनोत्पत्तिरेव नास्तीति भावः। चाक्षुषद्रव्यत्वादिति। अत्रात्मघटाभावयोर्यथाक्रमं व्यभिचारवारणाय चाक्षुषपदं द्रव्यपदं च। ते चेति। त्रुटिसमवायिन इत्यर्थः। द्रव्यसमवायित्वं परमाणौ व्यभिचारीति चाक्षुषेति द्रव्यविशेषणं चाक्षुषस्य द्रव्यत्वस्य समवायित्वमात्मन्यपीति द्रव्येति चाक्षुषद्रव्यवत्त्वं संयोगेनात्मनोऽपीति समवायसंबन्धेन तादृशद्रव्यस्य हेतुतानाभाय समवेतत्वादिति। अन्यथेति। अप्रयोजकादप्यनुमानादस्तुसिद्धावित्यर्थः। तादृशेति। चाक्षुषद्रव्येत्यर्थः। अत्र त्रुटिसमवायिसमवायिप्रभृतेः पक्षत्वं समवेतत्वस्य च साध्यत्वमवसेयम्। नन्वणुव्यवहारोऽणुपरिमाणनिबन्धन इति तदाश्रयद्रव्यसिद्धिरावश्यकीत्यत आह। अणुव्यवहार इति। अपकृष्टपरिमाणेति। अपकृष्टमहत्त्वेत्यर्थः। नातोऽपकृष्टदीर्घत्वोत्कृष्टमहत्त्ववति तथा व्यवहारः एवं ह्रस्वव्यवहारोऽप्यपकृष्टदीर्घत्वनिबन्धनः। दीर्घेऽपि दीर्घतमो ह्रस्व इति व्यवहारादिति बोध्यम्।

(१५।४) नन्वीश्वरे द्रव्यत्वे परिमाणवत्त्वमनुमेयमित्यत आह। द्रव्यत्वस्येति। यथा त्रुटित्वादेरन्यतमस्यासाधकं द्रव्यत्वं तथा परिमाणस्यापि अप्रयोजकत्वादिति भावः। ननु ईश्वरस्यापरिमितशक्तित्वादीश्वरस्य परिमाणवत्त्वं दुर्वारमत आह।

अत एव कर्णेन शृणोमीति हेतुत्वमवगाहमाना प्रतीतिः सङ्ग-
च्छते। श्रोत्रपदवाच्यत्वमपि तस्यैव श्रोत्रेण शृणोमीति व्यवहा-
रात् कारणान्तरकल्पने गौरवादिति समीचीनः पन्थाः ॥

(१०।३) मनोऽपि चासमवेतभूतमित्येव पाठः। मूर्तमिति पाठस्तु
प्रामादिकः। अतिरिक्तमनोवादिनापि तथा स्वीकारात्। मनसः
परमसूक्ष्मत्वेन श्रुतिषु प्रसिद्धत्वात् असमवेतभूतस्य त्रसरेणुरूप-
स्यानुधावनम्। मनस्त्वं चेच्छात्मग्राहकेन्द्रियत्वं मनःपदवाच्यत्वं
वा नातः सिद्धसिद्धिव्याघातः। नन्वेवं युगपच्चाक्षुषरासनाद्युत्प
त्तिः स्यादिन्द्रियमनोयोगहेतुत्वेन त्वया तस्या वारयितुमशक्य-
त्वात्। त्वन्मते चक्षुरादिभिरेकदा मनोयोगस्यासत्त्वादित्यत आह
अदृष्टेति। अतिरिक्तमनोऽभ्युपगमे चक्षुराद्येकतरेण मनःसंयोगो-
त्पत्तिसमये नान्यतरेण तदुत्पत्तिरदृष्टविशेषोपग्रहादेव तथा च
तत एव ज्ञानयोर्युगपदनुत्पत्तौ नातिरिक्तसिद्धिरिति भावः। अ-
दृष्टविशेषोपग्रहः अदृष्टविशेषघटिततत्तदसाधारणकारणकला-
पस्य विरोधित्वम् अदृष्टेन फलस्यादर्शनेन विशेषस्योपग्रहः तत्त-
त्कारणकलापविरोधित्वावधारणं वा एवं च क्वचिद्बुद्धियौगपद्यानु
भवेऽपि निराबाधपदमादधातीति दिक्। इदं च बोध्यम्। आत्मा-
दिग्रहे मनसः तत्सन्निकर्षस्य च हेतुत्वे मानाभावः तद्व्यतिरेकेण
कार्यव्यतिरेकाभावात्। प्रत्यक्षसामान्ये इन्द्रियतत्सन्निकर्षत्वा-
दिना हेतुत्वस्यासम्भवदुक्तिकत्वात् जन्यज्ञानसामान्ये मनःसंयो-
गसमवायिकारणत्वेन मनोयोगस्यात्मग्रहे हेतुत्वमिति न युक्तम्
एकत्वादेरिव ज्ञानादेरपि सासमवायिकारणकत्वे मानाभा-
वात्। तस्मान्मनःपदवाच्यत्वमेव इह मनस्त्वमिति ॥

(११।२) परमाणुद्व्यणुकयोरिति। त्रसरेणोर्द्रव्यसमवेतसमवेतत्वद्रव्यसमवेतत्वयोर्मानाभाव इत्यर्थः। नन्वेवं त्रसरेणोरुत्पत्तिर्न स्यात् समवायिकारणाभावादित्यत आह। त्रुटाविति। विश्रामादिति। द्रव्यसमवायित्वस्येत्यादि। असमवेतत्वसामानाधिकरण्यं विश्रामः। तथा च तस्यासमवेतद्रव्यत्वात् सदातनत्वेनोत्पत्तिरेव नास्तीति भावः। चाक्षुषद्रव्यत्वादिति। अचात्मघटाभावयोर्यथाक्रमं व्यभिचारवारणाय चाक्षुषपदं द्रव्यपदं च। ते चेति। त्रुटिसमवायिन इत्यर्थः। द्रव्यसमवायित्वं परमाणौ व्यभिचारीति चाक्षुषेति द्रव्यविशेषणं चाक्षुषस्य द्रव्यत्वस्य समवायित्वमात्मन्यपीति द्रव्येति चाक्षुषद्रव्यवत्त्वं संयोगेनात्मनोऽपीति समवायसंबन्धेन तादृशद्रव्यस्य हेतुतालाभाय समवेतत्वादिति। अन्यथेति। अप्रयोजकादप्यनुमानाद्वस्तुसिद्धावित्यर्थः। तादृशेति। चाक्षुषद्रव्येत्यर्थः। अत्र त्रुटिसमवायिसमवायिप्रभृतेः पक्षत्वं समवेतत्वस्य च साध्यत्वमवसेयम्। नन्वणुव्यवहारोऽणुपरिमाणनिबन्धन इति तदाश्रयद्रव्यसिद्धिरावश्यकीत्यत आह। अणुव्यवहार इति। अपकृष्टपरिमाणेति। अपकृष्टमहत्त्वेत्यर्थः। नातोऽपकृष्टदीर्घत्वोत्कृष्टमहत्त्ववति तथा व्यवहारः एवं ह्रस्वव्यवहारोऽप्यपकृष्टदीर्घत्वनिबन्धनः। दीर्घेऽपि दीर्घतमतो ह्रस्व इति व्यवहारादिति बोध्यम्।

(१५।४) नन्वीश्वरे द्रव्यत्वेन परिमाणवत्त्वमनुमेयमित्यत आह। द्रव्यत्वस्येति। यथा त्रुटित्वादेरन्यतमस्यासाधकं द्रव्यत्वं तथा परिमाणस्यापि अप्रयोजकत्वादिति भावः। ननु ईश्वरस्यापरिमितार्थत्वादीश्वरस्य परिमाणवत्त्वं दुर्वारमत आह।

तस्य चेति। ईश्वरे मत्त्वव्यवहारस्य नित्यज्ञानादिरूपोत्कर्षनिबन्धनः जीवेऽपि तच तथा व्यवहारादिति भावः । वस्तुतः पुनरीश्वरस्य द्रव्यत्वेऽपि मानाभावः तच संयोगे विभागेऽपि च मानाभावः मानाभावाच क्रियाविशेषं प्रति प्रयत्नवदात्मसंयोगासमवायिकारणकत्वम् । नन्वेवमात्ममनोयोगादिजन्यतया ज्ञानादेः त्वयैव बहुशो निरासादस्मदादीनामपि संयोगविभागौ न स्यातामिति चेत् न स्यातामेव अत एव द्रव्यत्वमपि दूरपराहतम् । द्रव्यमहमिति प्रतीतिस्तु न लोकानाम् । तस्मान्मूर्तत्वमेव द्रव्यत्वमिति युक्तमुत्पश्यामः । अनुद्भूतरूपादिकं निराकरोति । *रूपादीनामिति । वाय्वादाविति । आदिपदाज्जलतेज प्रभापरि*ग्रहः । रूपादिकमित्यादिपदाद्गन्धरसस्पर्शपरिग्रहः । अन्यथेति । न च लाघवाद्भावत्वव्याप्येन भावाभावसाधारणेन वाखण्डोपाधिनाऽभावस्य वस्तुमात्रस्य वा योग्यत्वान्मूर्तसामान्याभावस्यायोग्यत्वेपि न तेषामयोग्यत्वमिति वाच्यम् तथापि प्रमाणाभावात्तादृशरूपादेः साधयितुमशक्यत्वात् । द्रव्यत्वस्येव पृथिवीत्वादेरपि गन्धाद्यसाधकत्वात् । अथ समवेतद्रव्यं प्रति स्पर्शवत्त्वेन समवायिकारणत्वात् चक्षुराद्यवयवानामनुद्भूतस्पर्श आवश्यक इत्यत आह । अतीन्द्रियेति ॥

(२५।४) ननु मूर्तत्वमवच्छिन्नपरिमाणवत्त्वमित्यनन्तपरिमाणकल्पना तवाप्यावश्यकीति विनिगमकाभावात् तादृशस्पर्शसिद्धिरपि दुर्वारेत्यत आह । मूर्तत्वं त्विति । ननु मूर्तत्वं न जातिः भूतत्वेन साङ्कर्यादित्यत आह । भूतत्वमपीति । गगनमनसोरपात्तत्वादिति भाव । यद्वा ननु भूतत्वजात्या सह तुल्यव्य-

त्तिकतया मूर्तत्वं न जातिरित्यत आह । भूतत्वमपीति । भूतं मूर्तमिति सहप्रयोगश्च एकपदस्यापरपदवाच्यत्वपरतयोपवर्णनीय इति भावः । समवेतेति । आत्मवारणाय इत्यन्तम् । आत्मन्यपि समवेतेन्द्रियग्राह्यद्रव्यत्ववत्त्वाद् गुणेति । गुणवत्त्वमपि एकमात्रसमवेतत्वं गुणत्वम् जातेर्निराकरिष्यमाणत्वात् । चक्षुरादेः समवेतेन्द्रियग्राह्यगुणवत्त्वाभावात् जातिगर्भता । द्रव्यत्वव्याप्येति । तत्त्वं च द्रव्यनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वम् । एतेन द्रव्यत्वव्याप्यत्वं द्रव्यत्वस्यापीति तद्दोषतादवस्थ्यम् । भेदेन तत्त्वोक्तौ च व्याप्यत्वानुधावनमजातिप्रयोजकं सत्तायाः निराकरिष्यमाणत्वादिति निरस्तम । समवेतेन्द्रियग्राह्यद्रव्यत्वव्याप्यजातिमत्त्व

ज्ञानवदन्यद्रव्यत्वम् । ज्ञानासमानाधिकरणधर्मसमवायिद्रव्यत्वं वा तदिति तु न्यायः । केचिदित्यस्य गौरवान्नेदं भूतपदस्य शक्यतावच्छेदकमित्यस्वरस. । ननु मूर्तत्वेन द्रव्यसमवायिकारणत्वेऽन्त्यावयविनापि द्रव्यमारभ्येतेत्यत आह । अन्त्यावयवीति । सत्यपि स्पर्शवत्त्वे ऽन्त्यावयवी नारभते द्रव्यं तदारम्भकविलक्षणसंयोगाभावादिति त्वयेव मयापि वाच्यमिति भावः । अन्त्यावयविभिन्नत्वस्य कारणतावच्छेदके निवेशात् तद्वारणमित्यपि केचित् । प्रागभावविरहात् तत्र कार्याभाव इत्यपि वदन्ति । न चैवं द्रव्यत्वमेव तथास्तु उक्तदिशा आत्मनोपि वारणसम्भवादिति वाच्यम् । अजनकत्याहत्तेन मूर्तत्वेनागुरुणा कारणताया. सति सम्भवे तद्धारकस्यान्यथासिद्धिनिरूपकत्वात्तेन कारणतानवच्छेदकत्वात् समानाकाराणां च

रूपरसगन्धस्पर्शस्नेहपरिमाणद्रवत्वादीनां प्रायश एकैकत्वं न तु नीलादिमात्रस्य तारतम्यानुभवात् पाकात् श्यामं रूपं नष्टं रक्तमुत्पन्नमित्यादिप्रत्ययाच्च ॥

(२८।१) पृथक्त्वमपीति । घटात् पटः पृथगित्येतत्प्रत्ययप्रकारो न द्रव्यादिभिन्नो मानाभावादित्यर्थः । गुणत्वसामान्यस्य निराकर्तव्यत्वेन तन्निषेधस्य कर्तुमशक्यत्वात् । केन तर्हि पृथग्व्यवहार इत्यत आह । अन्योन्याभावादिति । पृथक्त्वं नाभावः सावधित्वात् । न च तदसिद्धम् तथाप्रतीतेः । अभावस्तु न सावधिकः पटान्नेत्यप्रतीतेरत आह । पृथक्त्वेति । मानाभावादिति । अस्तु वा अन्योन्याभावस्यैव सावधित्वं धर्मीति न्यायात् । घटान्नेत्यादिरभिलापस्तु नास्त्येव नञ्योगे पञ्चम्या असाधुत्वादित्यपि वदन्ति । ननु पृथगादिशब्दानामन्योन्याभाववदर्थकत्वे पृथगादिशब्दस्येव नञोपि योगे पञ्चमी स्यात् अन्याराद्इतरर्तेतिपञ्चमीविधायकसूत्रेण पृथगादिशब्दसाधारणस्यान्यपर्यायान्तःपातिन एव बोधनादित्यत आह । घटादिति । तथा च तत्सूत्रेऽन्यशब्दः पृथगादिपरो न तु सामान्येन तदर्थकपर इति भावः ॥

(२९।४) दूरसन्निकृष्टयोर्ज्येष्ठकनिष्ठयोश्च परापरबुद्धिप्रकारतया परत्वापरत्वाख्ये गुणान्तरे नैयायिकादीनामभिमते निराकुरुते । परत्वेति । रूपादिभिन्ने अस्मादिदं परमपरमिति प्रत्ययविशेषणे न संयोगादिभिन्ने इत्यर्थः । विनापि परत्वापरत्वे दूरसन्निकृष्टयोर्व्यवहारमुपपादयति । विप्रकृष्टेति । बहुतराल्पतरसंयुक्तसंयोगाभ्यामित्यर्थः । ज्येष्ठकनिष्ठयोस्तदुपपादय-

ति । ज्येष्ठत्वेति । तज्ज्येष्ठत्वम् तत्प्रागभावाधिकरणक्षणवृत्तित्वं तदुत्पत्तिक्षणवृत्तिध्वंसप्रतियोगिसमयवृत्तित्वं वा । तत्कनिष्ठत्वञ्च तदधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वं तदधिकरणसमयध्वंसाधिकरणक्षणोत्पत्तिकत्वं वा । घटादेर्ज्येष्ठत्वादिव्यवहारविरहहेतुतत्पदार्थस्वाद्व्यवृत्तित्वादिकं च प्राणित्वेन विशेषणीयम् । तथाविधेति । परापरव्यवहारेत्यर्थः । तचेति । आद्ये विप्रकृष्टत्वसन्निकृष्टत्वे । तृतीयमिति । प्रयागतः काशीविप्रकृष्टा मथुरा । मथुरातः काशीसन्निकृष्टः प्रयाग इति व्यवहारादिति भावः । अन्त्ये ज्येष्ठत्वकनिष्ठत्वे । परस्परेति लक्षणात् ज्येष्ठो रामो रामात्कनिष्ठो लक्ष्मण इति व्यवहारादिति भावः ॥

(३० । २) विशेषोऽपीति । द्रव्यादिभिन्नो न भाव इत्यर्थः । ननु समवायित्वे सति समवायिव्यक्त्यैकवृत्तित्वं तत्तदसमवेतसमवेतशून्यधर्मसमवायीति व्याप्तेर्घटपटादाववधारणात् । सजातीयनित्यद्रव्यद्वये परस्परासमवेतसमवेतशून्यधर्मसिद्धावर्थाद्विशेषसिद्धिः । अत्र च द्रव्यत्वादिभिः सिद्धसाधनवारणाय तदसमवेतेति । एकत्वादिभिस्तद्वारणाय समवेतशून्येति । अभावव्यक्तिभिस्तद्वारणाय समवायीति । अभावे व्यभिचारवारणाय हेतौ समवायित्वे सतीति । घटादावभावव्यावृत्तिसत्त्वेनाभावसमवेतत्वाप्रसिद्धा व्याप्यत्वासिद्धिः स्यादिति समवायीति । अनुपादेयमेव वा तत् साध्ये तदसमवेतेति परित्यज्य स्वासमवायितत्कत्वस्य वक्तव्यत्वात् साध्ये समवायत्वं साक्षात्स्वाश्रयसमवेतत्वादिपरम्परासाधारणं नातः सजातीयघटद्वये व्यभिचारः विशेषमादाय तत्रापि साध्यसत्त्वात् समवायित्वे सतीत्यपहाय

नित्यद्रव्यत्वे सतीति वाच्यमत आह । विनापीति । समवायेनेति शेषः । स्वत एव । तादात्म्यादिना स्वीयत एव । तथा च यथा विशेषसमवायेन तद्वृत्तिधर्ममन्तरेणापि तद्वृत्तिधर्ममात्रसत्त्वेन तद्व्यावृत्तिः तथा प्रकृतेपीत्यप्रयोजकत्वात् तथाव्याप्तिरेव नास्ति किन्तु यो यद्व्यावृत्तः स तद्व्यावृत्तधर्मवानित्येव व्याप्तिरिति भावः । शङ्कते । योगिन इति । त एवेति । तथा च तेषां तदीक्षणमेव नास्ति मानाभावादिति भावः ॥

(३२।२) ननु व्याप्यवृत्तिवृत्तिरूपत्वादेः कथमव्याप्यवृत्तिवृत्तित्वं सविषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वाभावनियमात् अव्याप्यवृत्तावस्मदादिज्ञानादौ व्याप्यवृत्तीश्वरज्ञानादौ च वर्तमानस्य ज्ञानत्वादेर्वारणाय सविषयावृत्तीत्यत आह । सविषयेति । ननु तथापि साधकाभावाद्रूपं नाव्याप्यवृत्तीत्यत आह । पक्वे चेति । श्यामत्वमिति । रक्तत्वाभावस्य । न तु रक्तत्वमपीति शेषः । तथा चैकत्र घटेऽवच्छेदकभेदेन रक्तत्वतदभावोपलम्भात्प्रत्यक्षसिद्धमेव तदव्याप्यवृत्तित्वमिति भावः ॥

(३२।१) नैयायिकवैशेषिकौ विजातीयनानारूपवदवयवारब्धे चित्ररूपवत्ताप्रतीतेर्नीलाद्यतिरिक्तमवयवविजातीयं नानारूपासमवायिकारणकं व्याप्यवृत्ति चित्ररूपं स्वीकुरुतस्तन्निराकरोति । चित्रमपीति । चित्राकारप्रतीतिविषयरूपं न नीलाद्यतिरिक्तमित्यर्थः । एकत्र सजातीये नानारूपक्रमेण चित्ररूपव्यवहाराभावाद्विजातीयेति । तयेति । चित्ररूपव्यवहारेत्यर्थः । एकमस्य चित्ररूपमिति प्रत्ययस्तु एकं वनमितिवत् समूहस्यैकत्वादिति भावः । नीलादेरिति । न चेदमप्रयोजकं

नित्यद्रव्यत्वे सतीति वाच्यमत आह । विनापीति । समवायेनेति शेषः । स्वत एव । तादात्म्यादिना स्वीयत एव । तथा च यथा विशेषसमवायेन तद्वृत्तिधर्मसत्त्वेऽपि तद्वृत्तिधर्मसामान्येन तद्व्याप्तिः तथा प्रकृतेपीत्यप्रयोजकत्वात् तथाव्याप्तिरेव नास्ति किन्तु यो यद्व्याप्तः स तद्व्याप्तधर्मवानित्येव व्याप्तिरिति भावः । शङ्कते । योगिन इति । त एवेति । तथा च तेषां तदीक्षणमेव नास्ति मानाभावादिति भावः ॥

(३२ । २) ननु व्याप्यवृत्तिवृत्तिरूपत्वादेः कथमव्याप्यवृत्तिवृत्तित्वं सविषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वाभावनियमात् अव्याप्यवृत्तावस्मदादिज्ञानादौ व्याप्यवृत्तीश्वरज्ञानादौ च वर्तमानस्य ज्ञानत्वादेर्वारणाय सविषयावृत्तीत्यत आह । सविषयेति । ननु तथापि साधकाभावाद्रूपं नाव्याप्यवृत्तीत्यत आह । एके चेति । श्यामत्वमिति । रक्तत्वाभावश्च । न तु रक्तत्वमपीति शेषः । तथा चैकत्र घटेऽवच्छेदकभेदेन रक्तत्वतदभावोपलम्भात्प्रत्यक्षसहस्रैव तद्व्याप्यवृत्तित्वमिति भावः ॥

(३३ । १) नैयायिकवैशेषिकौ विजातीयनानारूपवदवयवारब्धे चित्ररूपवत्ताप्रतीतेर्नीलाद्यतिरिक्तमवयवविजातीयं नानारूपासमवायिकारणकं व्याप्यवृत्ति चित्ररूपं स्वीकुरुतस्तन्निराकरोति । चित्रमपीति । चित्राकारप्रतीतिविषयरूपं न नीलाद्यतिरिक्तमित्यर्थः । एकत्र सजातीये नानारूपसमावेशे चित्ररूपव्यवहाराभावाद्विजातीयेति । तथेति । चित्ररूपव्यवहारेत्यर्थः । एकमस्य चित्ररूपमिति प्रत्ययस्तु एकं वनमितिवत् समूहस्यैकत्वादिति भावः । नीलादेरिति । न चेदमप्रयोजकं

कल्पनेनैवातिप्रसङ्गभङ्गे तथैव प्रतिबध्यप्रतिबन्धकभावाकल्पनात् चित्ररूपस्पर्शयोस्तदभ्युपगमबाधेन बहुतरकार्यकारणभावकल्पनामपेक्ष्य तत्रावयविनि नीलादिसुकुमारादिकल्पनाया एव न्याय्यत्वात्। इदं तु चिन्त्यते। नीरूपो निस्पर्शस्तत्रावयवी किं न स्यात् द्रव्यचाक्षुषं प्रति रूपस्य स्पार्शनं प्रति च स्पर्शस्य हेतुत्वे मानाभावात् चाक्षुषसामान्यं प्रति विषयकारणताया भावाभावसाधारणेन शक्तिविशेषेणैव लाघवेनावच्छेदात्। अन्यथा गुणादिचाक्षुषेपि रूपस्य सम्बन्धविशेषेण हेतुत्वस्य वक्तव्यत्वेगौरवापत्तेः। अनन्तरूपव्यक्तिकल्पनापेक्षया शक्तिकल्पनाया एव न्याय्यत्वाच्च। एवं स्पार्शनसामान्यं प्रति तथैव रीतिरस्तु। वस्तुतस्तु तत्रावयविनि समवायेन नीलादिप्रतीतेर्बाधकं विना भ्रमत्वायोगादव्याप्यवृत्तयो रूपरसगन्धस्पर्शा दुर्वाराः प्रत्येकमव्यकल्पनागौरवेण प्रतीतिबाधरूपादेः त्रुटिमात्रगततापत्तेः। एवं च न कुत्रापि रूपादीनां विजातीयरूपादिविरोधित्वं नीरस एव वा तत्रावयवीत्यत्र तु वाकारोऽनास्थायामिति तत्त्वम्॥

(२७। १) एतेनेति। गन्धोपि चाव्याप्यवृत्तिः सुरभ्यसुरभिभ्यामवयवाभ्यामारब्धे ऽवयविनि सुरभ्यवच्छेदेन घ्राणसन्निकर्षेऽसौरभ्यानुपलम्भात् निर्गन्ध एव वा तत्रावयवीत्यर्थः। पितृचरणास्तु तत्र तत्रावयविन्यव्याप्यवृत्तिनीलादिवच्चित्ररूपरसगन्धस्पर्शा अपि दुर्वाराः चित्ररूपानुगताकारप्रतीतेश्चित्ररूपत्वादिजातिमन्तरेणोपपादयितुमशक्यत्वात्। विजातीयनानारूपत्वादेरननुगतत्वात्। अनुगतप्रत्ययापलापिनील-

मवायसम्बन्धाभ्यामपि कार्यकारणभावान्तरं कल्पनीयं कारणै- कार्यसमवायगर्भया असमवायिकारणतयोक्तातिप्रसङ्गस्य निरा- कर्तुमशक्यत्वादित्युक्तस्वाभाव्यनिर्वाह इति चेत् तर्हि कार्य- कारणभावान्तरस्यावश्यकत्वे लाघवादुक्तप्रतिबध्यप्रतिबन्धक- भाव एवास्थीयते । अन्यथा तादृशावयविन्यनन्तकोटितिक्तादि- कल्पनागौरवापत्तेः । तिक्तेतररसाद्यभावहेतुतायां च न प्रति- योगिनिवेशः तस्याभावविशेषपरिचायकत्वादिति कारणतावच्छे- दके गौरवशङ्कापि नावतरतीत्यभिप्रायवानाह । नीरस एवेति । अवयविनि तिक्तादिप्रत्ययस्तु परम्परयाऽवयवतिक्तादिकमाल- म्बत इति भावः । नन्वेवं गतमव्याप्यवृत्तिरूपस्पर्शाभ्यां तथा- प्यन्यावच्छेदेन नीलाद्यनुत्पत्तये तथा प्रतिबध्यप्रतिबन्धकभा- वानां वक्तव्यत्वात् एवं च चित्ररूपस्पर्शावप्यतिरिक्तौ स्वीकार्यौ अन्यथा तस्यावयविनोर्नीरूपस्पर्शत्वे चाक्षुषस्पार्शनाद्यनुपपत्तिः तयोस्तत्र कारणत्वात् तत्र च रूपत्वादिनैव नीलादीनाम- समवायिकारणत्वं चित्ररूपस्पर्शौ प्रति च तदितररूपस्प- र्शयोः प्रतिबन्धकत्वात् प्रतिबन्धकाभावस्य कार्यसहवृत्तित्वेनै- षाच हेतुत्वात् न नीलाद्युत्पत्तिसमये चित्रोत्पत्तिः । गुरवस्तु चित्ररूपं प्रति नीलेतररूपत्वपीतेतररूपत्वरक्तेतररूपत्वादिना असमवायिकारणत्वं चित्रस्पर्शं प्रति च सुकुमारेतरस्पर्शत्वक- ठिनेतरस्पर्शत्वादिनाऽसमवायिकारणत्वमतो नातिप्रसङ्गव्य- भिचारौ नीलादिपदं च तारतम्यपरं उत्कृष्टापकृष्टनीलाभ्या- मपि चित्ररूपजननादित्याहुः । नैवम् अवच्छेदकतासम्बन्धेना- वयविनीलोत्पत्तिं प्रति समवायेनावयवनीलादेर्नियामकताया

कल्पनेनैवातिप्रसङ्गभङ्गे तत्रैव प्रतिबध्यप्रतिबन्धकभावाकल्पनात् चित्ररूपस्पर्शयोस्तदभ्युपगमबाधेन बहुतरकार्यकारणभावकल्पनामपेक्ष्य तत्रावयविनि नीलादिसुकुमारादिकल्पनाया एव न्याय्यत्वात् ।इदं तु चिन्त्यते। नीरूपो निस्पर्शस्तत्रावयवी किं न स्यात् द्रव्यचाक्षुषं प्रति रूपस्य स्पार्शनं प्रति च स्पर्शस्य हेतुत्वे मानाभावात् चाक्षुषसामान्यं प्रति विषयकारणताया भावाभावसाधारणेन शक्तिविशेषेणैव लाघवेनावच्छेदात्। अन्यथा गुणादिचाक्षुषेपि रूपस्य सम्बन्धविशेषेण हेतुत्वस्य वक्तव्यत्वे गौरवापत्तेः । अनन्तरूपव्यक्तिकल्पनापेक्षया शक्तिकल्पनाया एव न्याय्यत्वाच्च । एवं स्पार्शनसामान्यं प्रति तथैव रीतिरस्तु । वस्तुतस्तु तत्रावयविनि समवायेन नीलादिप्रतीतेर्बाधकं विना भ्रमत्वायोगादव्याप्यवृत्तयो रूपरसगन्धस्पर्शा दुर्वाराः प्रत्येतव्यकल्पनागौरवेण प्रतीतिबाधरूपादेः त्रुटिमात्रगततापत्तेः । एवं च न कुत्रापि रूपादीनां विजातीयरूपादिविरोधित्वं नीरस एव वा तत्रावयवीत्यत्र तु नाकारोऽनास्थायामिति तत्त्वम् ॥

(३७ । १) एतेनेति । गन्धोपि चाव्याप्यवृत्तिः सुरभ्यसुरभिभ्यामवयवाभ्यामारब्धे ऽवयविनि सुरभ्यवच्छेदेन घ्राणसन्निकर्षेऽसौरभ्यानुपलम्भात् निर्गन्ध एव वा तत्रावयवीत्यर्थः । पितृचरणास्तु तत्र तत्रावयविन्यव्याप्यवृत्तिनीलादिवच्चित्ररूपरसगन्धस्पर्शा अपि दुर्वाराः चित्ररूपानुगताकारप्रतीतेश्चित्ररूपत्वादिजातिमन्तरेणोपपादयितुमशक्यत्वात् । विजातीयनानारूपत्वादेरननुगतत्वात् । अनुगतप्रत्ययापलापिनील-

त्वादेरपि विलोपप्रसङ्गात् । न च नीलादिव्यक्तिरेव सा जातिः नीलत्वादिना परापरभावानुपपत्तेः। एवं नीलपीतमात्र-पीतरक्तमात्रतत्तच्चित्रमात्रनीलपीतरक्तमात्राद्यारब्धेषु चित्र-त्वव्याप्यजातयोऽपि दुर्वाराः । तत्रतत्र नीलत्वादिनैव तयोस्तत्र तेषां च प्रयोजकत्वम् चित्रत्वं च नासमवायिकारणप्रयोज्यम् अस्तु वा पृथिवीरूपत्वेन रूपत्वेन वा तत्रासमवायिकारणत्वं नीलपीतरक्तमात्रारब्धावयवके च चित्ररूपादिचतुष्टयमुत्पद्यते नीलपीतरक्तमात्रारब्धं नीलरक्तमात्रारब्धं पीतरक्तमात्रारब्धं रक्तचित्रमात्रारब्धं च चरमं व्याप्यवृत्ति इतरत्रयमव्याप्य-वृत्तीति विशेषः । तत्तदवयवद्वयमात्रावच्छेदेनैवेन्द्रियसन्निकर्षे तादृशतादृशचित्रोपलम्भात् । एवं रसादावप्यूहनीयमिति प्राहुः । अस्मत्कृतसिद्धान्तरहस्ये तु नीलविशिष्टपीतादिना नीलपीतोभयादिना वावान्तरचित्रबुद्धिसम्भवात् नावान्तरचि-त्रसिद्धिः । न च सामान्यचित्रत्वेनावान्तरचित्रत्वा-सामानाधिकरण्यप्रत्ययान्नैवमिति वाच्यम् नीलपीतादिविशिष्ट-चित्रेणावान्तरचित्रप्रतीतेः सम्भवस्य तथापि दुर्वारत्वात् नीला-द्यविशेषिता ये नीलादिभेदास्तत्तदाश्रयरूपसमुदायेनानुगतचि-त्रप्रतीतेः सम्भवेन चित्रसामान्यस्याप्यनभ्युपगमाच्च । नन्वेवमपि नीलादिभेदे समुदायेन नीलाद्यनुगतप्रत्ययोपपत्तेः जातिमात्र-मेव विलीयेतेति चेद्विलीयत एव । यदि नाखण्डधर्मावलम्बनानु-भवः यदि चेदापि तादृशानुभवोऽभ्युपेयते तदास्तु तत्र तत्रावय-विनि नीलत्वादितत्तच्चित्रत्वाश्रयमेकमेव व्याप्यवृत्तिरूपादिकं लाघवात् नीलत्वादिकमेव तत्राव्याप्यवृत्तिगुणविशेषाणामिव

जातिविशेषाणामप्यव्याप्यवृत्तित्वे ऽविरोधात्(१)। परस्परव्यभिचारिजात्योः सामानाधिकरण्यस्य बाधकविरहे सत्तर्कप्रमाणसिद्धस्यानभ्युपगममात्रेण निराकरणायोगात् अत एव ककारादिषु सर्वेषु ताराद्याकारानुगतमतिरुपपद्यते । एकस्यैव तारत्वादेः ककारादिवृत्तित्वात्। उपपद्यते च मार्दपाषाणसौवर्णघटादावनुगताकारानुगतमतिरिति स्वनन्तः पन्थाः । अथ नीलाद्येकमात्रावयवावच्छेदेनेन्द्रियसन्निकर्षे चित्रं चित्रत्वं वा किं न गृह्यते इति चेन्न विजातीयनानारूपवत्त्वग्रहस्य तत्र हेतुत्वात् । यादृशि यादृशि चित्रे येन येन रूपेणासमवायिकारणत्वं तादृशचित्रग्रहे तत्त्वग्रहे वा तेन रूपेण चित्रत्वग्रहे आश्रयग्रहः तद्वान्तरजातिग्रहो वा हेतुरिति युक्तः पन्थाः त्रसरेणुश्च(२) यदि तत्तद्दिगवच्छेदेन नीलपीतादिरूपवत्तयानुभूयते भवति च तद्‌पाकजचित्ररूपवानपि नो चेत् तदा तच्छून्य एव इति संक्षेपः। ये तु चित्ररूपादिमति नीलादिकं न स्वीकुर्वते स्वीकुर्वते च द्व्यणुकादिकं तेषामवयवजातीयनानारूपवत्त्वग्रह एव चित्रस्य तद्वत्त्वस्य वा ग्रहे हेतुः। अत एव त्रसरेणोश्चित्रं रूपं तत्र तद्वत्त्वं वा न गृह्यत इत्याचार्याः । वस्तुतस्तु त्रसरेणोश्चित्ररूपाग्रहे तदारब्धचतुरणुकादिषु तद्ग्रहो न स्यादिति नैवं पन्थाः । किन्तु नीलावयवावच्छेदेनेन्द्रियसन्निकर्षावयवनीलादिगतनीलत्वादिग्रहप्रतिबन्धकदोषाभावाश्च तत्र हेतव इति त्रसरेणोरपि चित्ररूपग्रहो नानुपपन्न इत्यपर

(१) बाधकाभावात्-पा० २ पु० ।

(२) त्रुटिश्च-पा० २ पु० ।

इति स्तनमञ्जनविचारेण ॥

(३८ । २) ननु नीलपीताद्यवयवैरारब्धे स्वस्वावच्छेदेन नीलपीतादिनानोत्पत्तिवत् सर्वैर्नीलैरवयवैरारब्धे ऽवयविन्यपि स्वस्वावच्छेदेन नानानीलोत्पत्तिः स्यादित्यत आह । सर्वत्रेति ॥

(३८ । ६) असमवायीति । स्वस्वावच्छेदेन नीलपीतादिना नोत्पत्तिवत्सर्वैर्नीलैरारब्धे कारणत्वस्यात्माश्रयादिदोषेण कारणतानवच्छेदकत्वादिति भाव । ननु भावकार्यत्वस्यासमवायिकारणजन्यत्वव्याप्यत्वादेकस्यासमवायिकारणजन्यत्वं सेत्स्यतीत्यत आह । भावेति । अप्रयोजकतया तथा व्याप्तिरेव नास्तीति भाव । एवं द्वित्वादेरपि नासमवायिकारणकत्वम् । न च द्वयोरेव द्वित्वमुत्पद्यते न त्रिष्वित्यादिनियमरक्षार्थं तत्तदेकत्वे हेतुत्वमुपेयमिति युक्तं तावतापि समवायिन एव विशेषतो हेतुताया युक्तत्वात् तत्तत्प्रागभावविरहादन्यत्र तदनुत्पत्तेरिति केचित् । द्वित्वादिकमप्याश्रयोत्पत्तेरनन्तरमेवोत्पद्यते तन्नाशादेव नश्यति नित्यद्रव्यमात्रवृत्तिद्वित्वादिकं तु नित्यमेव । ननु सामानाधिकरण्यवदेकत्वबुद्धिरूपापेक्षाबुद्धिरुत्पद्यते तन्नाशान्नश्यति अपेक्षाबुद्धिश्च तुरीयक्षण एव नश्यति नातो द्वे द्रव्ये इत्यादिविशिष्टवैशिष्ट्यसाक्षात्कारानुपपत्ति । अत्र सुखीत्यादिवद्द्वे द्रव्ये इत्यादिबुद्धेरपि विशेषणांशे ऽलौकिकत्वमेवेति न युक्तं मानाभावात् अपेक्षाबुद्धिशून्येन तद्ग्रहणस्यापेक्षाबुद्धेस्तद्व्यञ्जकत्वेनाप्युपपत्तेः । तत्तत्काले तत्तत्पुरुषापेक्षाबुद्धिजन्यानन्तकोटिद्वित्वादिकल्पनागौरवप्रसङ्गात् । एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेरपेक्षाबुद्धिशून्यपुरुषान्तरेणाग्रहणात् तत्तत्पुरुषी·

यापेक्षाबुद्धिजन्यद्वित्वादि तेन गृह्यत इति स्वभावकल्पने गौर-वाच्च अत एव द्वे द्रव्ये इत्यादिविशिष्टवैशिष्ट्यबोधोऽपि सूपपादः । वस्तुतः पुनरेकमेकमित्यनुगतमतेरेकत्वं सकलैकवृत्त्येकमेव सदातनं कल्प्यते लाघवाद्बाधकाभावाच्च । इत्थं च द्वित्वादयोऽपि व्याख्याता इति नव्याः । नाश एवेति एवकारेण समवाय्यसम-वायिकारणनाशस्य हेतुत्वं व्यवच्छिद्यते(१) । नित्येति । तच्च परमाणुसमवेतं त्रुटिसमवेतं वेत्यन्यदेतत् । विद्यमानविभक्तावय-वकघटादिनाशे चेत्यपि द्रष्टव्यम् । समवायिनाशस्थले च द्वितीय-क्षणे ऽसमवायिकारणीभूतसंयोगनाशस्तदनन्तरं तृतीयक्षण एव द्रव्यनाशः कार्यकारणभावान्तरकल्पनापेक्षया क्षणविलम्बकल्पनायाः समुचितत्वादिति भावः । न चासमवायिका-रणत्वस्यैक्याभावात् कथं सामान्यतो हेतुहेतुमद्भाव इति वाच्यम् जन्यद्रव्यारम्भकतावच्छेदकसंयोगगतजातिविशेषस्यैव तत्त्वात् कर्मादिजन्यतावच्छेदकं तु तद्व्याप्यं जन्यतावच्छेदका-ननुगमस्यादोषत्वात् । वस्तुतो द्रव्यासमवायिकारणसंयोगः कर्मज एव न संयोगजः । किमत्र विनिगमकमिति चेत् परम-ाणोस्त्रसरेणोर्वा समवेतद्रव्यं प्रति असमवायिकारणस्य संयोगस्य संयोगजत्वासम्भवादित्यस्मत् पितृचरणाः । अत्रेदं प्रतिभाति । एकद्रव्यासमवायिकारणनाशेऽपि द्रव्यान्तरानाशात् तत्तद्द्रव्यानाशं प्रति तत्तद्व्यक्तित्वेनैवासमवायिकारणनाशस्यापि हेतुत्वं वाच्यम् । तथा च समवायिकारणनाशेऽपि द्रव्यान्तरानाशात् तत्तद्द्रव्यनाशं प्रति तत्तद्व्यक्तित्वेनैव समवायिकारणनाशस्यापि

(१) समवायिकारणनाशस्य प्रयोजकत्वं व्यवच्छिद्यते-प्रा० २ पु० ।

हेतुना वाच्या तथा च समवायिकारणनाशस्यापि तत्र तत्र तेन तेन रूपेण हेतुत्वं कल्पनीयम् । समवायि(¹)कारणस्यासमवायिकारणस्य च नाशयोरेकशक्तिमत्त्वेन कारणत्वम् एकावयवनाशोत्पत्तिसमये यत्रावयवान्तरे द्रव्यान्तर(²)संयोगविभागोत्पत्तिस्तत्र तदधीनानामवयविन्यनन्तसंयोगादीनां कल्पनमपेक्ष्य एकस्याः शक्तेः कल्पनाया एव समुचितत्वात् ॥

(४१ । १) स्पर्शवत्त्वमेवेति । एवकारेण रूपवत्त्वव्यवच्छेदः निःस्पर्शप्रभादेः स्पार्शनविरहात् स्पर्शस्तत्र प्रयोजको न तु रूपमिति भावः । प्रयोजकजनकतालाघवेन स्पर्शवत्त्वेनैव हेतुताया युक्तत्वात् । प्रयोजकं जनकतावच्छेदकम् विषयहेतुताया अनेनैव रूपेणावच्छेदादित्यपि केचित् । अत एवेति । अन्यथा रूपस्य तत्र प्रयोजकत्वे निशेष्यस्यायोग्यत्वात् तदनुपपत्तिरेव स्यादिति भावः । अस्पार्शनत्वेति । वस्तुतः स स्पार्शन एवेति तुशब्देन सूचितम् । प्रकृष्टतमं त्रुटिपरिमाणावधिकप्रकर्षात्मकजातिविशेषवत् । गौरवादित्यादेः रूपं न तत्र प्रवेशनीयमित्यनेनान्वय । प्रामाणिकं च नेदमित्याह । मानाभावादिति । अनन्यथासिद्धान्वयाद्यनुविधानमेव मानमित्यत आह । त्वगिति । तत्र स्पार्शनप्रयोजके । ननु वायोरध्यक्षत्वे तद्गतसंख्यादयोऽपि प्रत्यक्षाः स्युः योग्यमात्रसमवादेनैव (³) तेषां योग्यत्वादित्यत आह । फूत्कारेति । स्फुटतरेति तद्विषयकप्रत्यक्षत्वेनानुभूयमानप्रत्यक्षविषया इत्यर्थः । अन्य-

(१) हेतुत्वं केन वारणीयम् । अस्तु वा समवायि-पा० २ पु० ।
(२) अवयवान्तर-पा० २ पु० ।
(३) संयोगादिनैव-पा० २ पु० ।

थापि वायौ गृह्यमाणे तत्संख्यादिप्रत्यक्षं भवत्येव परं तु न दोषात् स्फुटमिति भावः । तथा प्रयोजकम् । अन्यथा वाय्वादेरचाक्षुषता न स्यादिति भावः । नेति । निःस्पर्शस्य पिशाचादेरचाक्षुषताया रूपविरहेणैवोपपत्तेरिति भावः । तादृशयोग्यधर्मसुखदुःखादिमत आत्मनो न तादृशं प्रत्यक्षम् । अत उक्तम् अनात्मसमवेतेति । इदं तु नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इत्यभ्युपेत्य अन्यथा चाक्षुषस्पार्शनरूपविशेषकारणरूपस्पर्शविरहादेव तस्य तादृशप्रत्यक्षविरहोपपत्तेः सर्वविशेषणवैयर्थ्यापत्तेरित्यवधेयम् । शब्दवदीश्वरवारणाय शब्देतरेत्युक्तम् । योग्यरसवतो रसनगतपित्तद्रव्यस्य सरेणोर्वारणाय रसेतरत्वम् वायूपनीतसुरभिभागत्रसरेणोर्वारणाय गन्धेतरेति । पृथिवीत्वादिमत्तयोक्तातिप्रसङ्गादवश्यमतो जातीतरेति । समवायेन तद्वत्त्वलाभाय समवायित्वेति । नातः कालिकविशेषणतया घटादिरूपवदीश्वरे स एवातिप्रसङ्गः । ननु शब्देतरेति व्यर्थम् ईश्वरात्मसमवेतस्यानात्मसमवेतेत्यनेनैव वारणादित्यत आह । सुखादीति । नेश्वरेति । तत्र सुखदुःखानुत्पत्तेरिति भावः । तदीयस्येति । ईश्वरीयेत्यर्थः । विषयिधर्मासमानाधिकरणेति विवक्षणीयसाधारणायोग्यपदव्यावर्तनीयमाह । पिशाचेति । पिशाचादेरवारणे तदवयवस्य प्रत्यक्षतापत्तेरिति भावः । ननु रूपस्पर्शघटितविशेषसामग्रीविरहादेव पिशाचावयवादीनां प्रत्यक्षता न भविष्यतीत्यत आह । आदीति । पिशाचारम्भकचतुरणुकतदारम्भकसंयोगादिकं ...

व्याप्तेरिति भावः । लाघवमभिप्रेत्याह । विषयीति । न च लाघवेन ज्ञानासमानाधिकरणेत्येव युक्तं ज्ञानत्वस्य जातित्वादिति वाच्यम् । इच्छाकृत्यसमानाधिकरणत्वादिना सह विनिगमकाभावात् कार्यकारणभावत्रयापत्तेः । यद्यपि विषयिधर्मासमानाधिकरणत्वमप्यापि तैः प्रत्येकं विनिगमकाभावाल्लाघवात्तान्येव वक्तुमुचितानि तथापि तादृशसामानाधिकरण्यानां समनियमात् तदवच्छिन्नप्रतियोगिताक एव भेदः प्रतियोग्यविशेषितो निवेशितः प्रतियोगी च तत्र परिचायक इति लाघवमकिञ्चित्करमित्यवधेयम् । वस्तुतोऽस्मदादिकृत्यादेः समयविशेषावच्छेदेन ज्ञानासमानाधिकरणत्वाद्विषयीत्याद्युक्तम् । तच्च न तत्र तेषां सर्वदा संस्कारसमानाधिकरणत्वादिति युक्तमुत्पश्यामः । अत्र च रसनगतपित्तद्रव्यादिचक्षुरेणुवारणाय रूपेतरत्वाद्युपादानं न युज्यते तैरपि कदाचित् पाकजरूपस्पर्शवद्भिः रूपस्पर्शवद्द्रव्यारम्भेन तेषामपि कदाचित् प्रत्यक्षत्वादिति वदन्ति । अस्मदादीति । अस्मदादेः परिमाणशून्यत्वं नयनसम्बद्धपित्तद्रव्यस्य परिमाणवत्त्वमिति मते त्वित्यर्थः । वायूपनीतसुरभिभागादेश्च परिमाणाभावादिति भावः । टीकाकृतैव केवलमस्मदात्म(¹)परिमाणप्रत्यक्षाभ्युपगमात् नयनसम्बद्धपित्तद्रव्यस्य परिमाणवत्तायाः केनाप्यनुपलम्भात् । रूपवत्त्वस्य च परिमाणव्याप्यत्वे मानाभावात् मत इत्युक्तम् । न च नयनगतपित्तद्रव्यं गृह्यत एव न परन्तु तत्र रूपमेवेति वाच्यम् । द्रव्यचाक्षुषप्रत्यक्षं प्रति रूपस्य हेतु-

(१) केवलमस्मदादात्म-पाठ न पु० ।

त्वात् नयनगतपित्तद्रव्यीयचक्षुटेः रूपवत्त्वे ऽचाक्षुषत्वानुपपत्तेः युज्यते च तावदस्मदादेः परिमाणशून्यत्वं केनापि तदनुपलम्भात् । न तु नयनगतपित्तद्रव्यपरिमाणवत्त्वं केनाप्यनुपलम्भादत आह । यद्वेति । तथा च तस्य परिमाणशून्यत्ववत्ताहशप्रत्यक्षशून्यत्वान्न व्यभिचार इति भावः । नन्वेव पीतः शङ्खः इत्यारोपो न स्यात् नयनगतपित्तद्रव्ये ऽनुभूयमानस्यैव पीतरूपस्य शङ्खादावारोपसम्भवात् पीतान्तरस्य तदानीमसन्निकर्षादित्यत आह ।.स्मर्यमाणेति । इदन्तु चिन्त्यते समवेतेन्द्रियजन्यद्रव्यप्रत्यक्षत्ववदसमवेतेन्द्रियजन्यप्रत्यक्षत्वादिवत् चक्षुरितरेन्द्रियजन्यप्रत्यक्षत्वादिवच्च समवेतेन्द्रियजन्यद्रव्यप्रत्यक्षत्वमपि न कार्यतावच्छेदकं मानाभावात् । इत्थं च द्रव्येतरप्रत्यक्षत्वमिव द्रव्यप्रत्यक्षत्वमपि न तथेति । शब्देति । अत्र शब्देतरत्वेन ईश्वरस्य रसेतरत्वेन रसनगतपित्तद्रव्यस्य गन्धेतरत्वेन वायूपनीतसुरभिभागस्य जातीतरत्वेन तेषां योग्यत्वेनेश्वरादीनां व्युदासः । अस्मदादेः परिमाणवत्त्वे तु परिमाणवत्त्वमेव तथेति मन्तव्यम् । अथ रसगन्धेतरत्वं न युज्यते रसगतपित्तद्रव्यवायूपनीतसुरभिभागयोरध्यक्षत्वादत आह । रसनेति । तथा च न चक्षुषा न वा त्वचा तद्ग्रह इति भावः । रसनेनैव तद्ग्रहो भविष्यतीत्यत आह । रसनेति ।

(४७ । ५) एतेनेति । सोपि न रूपस्पर्शवान् ग्राह्यं च न द्रव्यग्राहकमित्यप्रत्यक्ष एवेति भावः॥

(४८ । २) तस्य घटत्वत्वस्य घटेतरासमवेतत्वे सति घटनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपस्यातीन्द्रियघटेत

रादिघटितत्वेनानीन्द्रियत्वात् योग्यधर्ममात्रावच्छिन्नयोग्य मात्रवृत्तिप्रतियोगिताकत्वेनैवाभावस्य योग्यत्वादिति भावः एवं न जातित्वेनेति । तस्यापि नित्यानेकसमवेतत्वरूपस्या तीन्द्रियत्वादिति भावः । आदिपदेन समवेतत्वादिपरिग्रहः । समवायत्वस्य नित्यसम्बन्धत्वरूपस्यायोग्यत्वान्नानासमवायवा दिनो ग्रन्थकारस्य नये त्वखण्डोपाधिरूपस्यायोग्यवृत्ति त्वादिति भावः । सर्वथैवेति । पटत्वादिसामान्याभावः समवेत सामान्याभावश्च न कोपि प्रत्यक्ष इति भावः । अत्र च घटत्वादिनिरूपितसमवायेन घटाद्यवच्छिन्नप्रतियोगिताको घटत्वादेरभावो ग्रहीतुं शक्यत एवेति चिन्त्यम् । वस्तुतो लाघवादभावचाक्षुषादेरभावत्वव्याप्येन चाक्षुषादिमात्रे वा भावाभावसाधारणेन शक्तिविशेषेण विषयहेतुतावच्छेदात्म तेषां योग्यत्वं तथा सति द्रव्यचाक्षुषं प्रति रूपादेः कारणत्वं विलीयेतेति चेद्विलीयताम् किं तेन। सर्वमिदं सिद्धान्तविरुद्धं न्यायविदामिति चेत् । न न वयं नैयायिकनयमनुरुन्धानाः पदार्थतत्त्वं विवेचयामो यदमीषामुक्तमेव युक्त्या निरूपयितु मुत्सहामहे(१) तथा सति निःकर्षनिरासप्रसङ्गादिति सूक्ष्म मीक्षामहे ।

(४८ । ४) सत्ता चेति । सद्व्यवहारप्रयोजक इत्यर्थः जातित्वावच्छेदेन द्रव्यगुणकर्मसु समवेतानां चित्वेनाभाव इति भावः । ननु सद्व्यवहारबलादेव सा सेत्स्यतीत्यत आह जात्यादेरपीति । तत्र च जातेरभावादिति भावः । ननु

(१) यदमीषामुक्तमेव युक्तया निरूपयितुमुत्सहामहे-पा. २ पु. ।

घटादौ सद्व्यवहारबलेन सत्ताजातिसिद्धेः जात्यादाविकार्थसमवायादिसम्बन्धेन तथा जात्यैव सद्व्यवहाराभावेन वर्तमानत्वनिबन्धन एव तच सद्व्यवहारः समर्थनीय इत्यत आह । घटादाविति । अतीतादौ सद्व्यवहाराभावेन वर्तमानत्वनिबन्धन एव तच सद्व्यवहार इति भावः । घटादावनुगतसदाकारप्रत्ययस्तु न लोकानां नहि विचाय देशकालयोः सत्त्वं नाम किञ्चित्केनाप्यनुभूयते ऽतिरिक्तं कदापि । अत एवास्मिन् काले घटप्रागभावः सन्न घटः तन्तुषु पटः सन्न पट इत्यादिकः सार्वलौकिको व्यवहारः किन्तु भावत्वं तदिति प्रत्यक्षविषमित्यर्थः । अथवा सत्ता चेत्यादेस्तान्त्रिकाणां सच्छब्दसङ्केतावच्छेदिका न जातिरित्यर्थः । किंतु भावत्वं तदिति तान्त्रिकाणां सच्छब्दसङ्केतावच्छेदकं भावत्वमित्यर्थः । ननु भावत्वमपि साक्षात्परम्परासाधारणं सत्त्वमेव अतिरिक्तस्य दुर्वचत्वादत आह । तच्चेति । नन्वभावत्वमपि भावान्यत्वं तच च भावत्वमुक्तरूपेण सत्ताजातिरेव वक्तव्या अन्यथाऽन्योन्याश्रयापत्तेरत आह । अभावत्वं चेति । अनुगतेति । अभावाकारानुगतप्रत्यक्ष इत्यर्थः । वस्तुतोऽभावत्वस्य भावान्यत्वात्मकतया भावत्वस्य च विधित्वेनावभासात् भावत्वमखण्डोपाधिः अभावत्वं तु भावान्यत्वमित्यभिप्रेत्याह । भावत्वमेवेति । एवकारेणाभावत्वं नाखण्डोपाधिः किन्तु भावान्यत्वमिति सूचितमिति प्राहुः । नन्वेवं भावत्वं भावो न स्यात् स्वस्मिन् स्वाष्टत्तेरित्यत आह । तच्चेति । अत्र च विधिरूपे भावत्वे मानाभावः । भावोयमित्यादिप्रत्यय एवानुगतो मानमिति चेत्

कस्यायं बोधः । न साधारणस्य लोकस्य तदसिद्धेः । अस्त्वयं तान्त्रिकाणामनुगतो व्यवहारस्त्वेति चेत् द्रव्यान्यतमत्वमादाय तस्याप्युपपत्तेः । न चेदेवं तन्त्रेषु परवचनादेव पदार्थस्वीकारापत्तिरिति वदन्ति ॥

५१ । ३ । अतीन्द्रियेष्वित्युपलक्षणम् ऐन्द्रियकेष्वपि रूपरसादिष्वेकजात्याननुभवादित्यपि द्रष्टव्यम् । ननु रूपादावनुगतगुणव्यवहारादेव गुणत्वं सेत्स्यतीत्यत आह । तुरगादेरिति । तथा चोत्कर्षप्रवृत्तिनिमित्तगुणव्यवहारो न जातिमेवालम्बते उत्कर्षः पुनरनुगत एवेति भाव. । ननु द्रव्यकर्मान्यसामान्यवद्वृत्तिकारणतात्वेनानुगतीकृतानां रूपादिकारणतानामवच्छेदकतया गुणत्वं जातिरायातीत्यत आह । एकस्येति । अतिप्रसङ्ग इति । रूपद्रव्यकर्मेतरसामान्यवद्वृत्तिकारणतावच्छेदकत्वेन रूपव्यावृत्तरसादिचयोविंशतिवृत्तिजातेरेवं जात्यन्तराणामपि सिद्ध्यापत्तिरित्यर्थः[1] । जातिसङ्करेति । रूपद्रव्येतरसामान्यवद्वृत्तिकारणतावच्छेदकत्वेन रसादिकर्मसाधारणजातेरपि सिद्ध्यापत्त्या तया सङ्करप्रसङ्ग इत्यर्थः । प्रत्यक्षानुमित्यादिसाधारणीमनुभवत्वजातिं निराकरोति । शाब्देति । स्मृत्यन्येति । तथा च तान्त्रिकाणामनुभवबलान्नानुभवत्वजातिसिद्धिरिति भाव । अनुभवामीत्याकारप्रत्यय(१)बलादनुभवत्व जातिसिद्धिर्निराबाधेत्यत आह । जातिस्त्विति । उक्तप्रत्ययविषयजातिस्त्वित्यर्थ । ननु विशेषणज्ञानविशेषणतावच्छेदकप्रकार-

(१) साक्षात्कारप्रत्यय पा० २ पु० ।

कज्ञानयोः कार्यतावच्छेदकघटकतया तत्सिद्धिः । विशिष्टानुभवत्वविशिष्टवैशिष्ट्यानुभवत्वाभ्यामेव तत्कार्यतावच्छेदात् न तु तथा ज्ञानत्वाभ्याम् तादृशस्मृतौ व्यभिचारात् संस्कारद्वारा तथात्वस्य च प्रत्यक्षे ऽसम्भवात् । क्वचित् साक्षात् क्वचित् परम्परया तथात्वस्यानुगतत्वात् । विशिष्टस्मरणेभ्यः पूर्वं निर्विकल्पकस्मरणात् विशिष्टवैशिष्ट्यस्मरणेभ्यश्च पूर्वं विशिष्टस्मरणानां कल्पनामपेक्ष्य लाघवेन स्मृतिव्यावृत्ततयानुभवत्वजातेरेकस्या एव कार्यतावच्छेदकतया कल्पनस्योचितत्वात् न च स्मृत्यन्यज्ञानत्वमेव तदवच्छेदकम् एतदपेक्षयाऽनुभवत्वजातेरेवावच्छेदकतया कल्पयितुमुचितत्वात् तादृशस्मृत्यन्यज्ञानत्वानां विशेषणविशेष्यभावे विनिगमकाभावेन षट्ककारणाभावापत्तेरित्यस्माकं पूर्वपक्षः । सिद्धान्तस्तु सर्वमिदं विशेषणज्ञानत्वादिना विशिष्टबुद्धिं प्रति हेतुतासत्त्वे एव शोभते तदेव तु नास्ति प्रमाणाभावात् । विशेषणादिसन्निकर्षादेव तदुपपत्तेः अत एव निर्विकल्पकमपि नास्ति विज्ञानमित्याहुः । न च स्मृतिं प्रति अनुभवत्वेन हेतुत्वात् तस्य च लाघवाज्जातिरेवावच्छेदकतया कल्प्यते । न च स्मरणस्य स्मरणाजनकत्वे घट इत्यादिस्मरणोत्तरतृतीयक्षणादौ तादृशस्मरणं न स्यात् घट इत्याकारकस्मरणत्वेन तदाकारसंस्कारनाशकतया तत्स्मरणेन तादृशसंस्कारनाशादिति वाच्यम् लाघवेन तत्तत्पुरुषीयचरमस्मृतेरेव तत्तद्व्यक्तित्वेन तत्पुरुषीयसंस्कारनाशकतोपगमेन तदानीं संस्कारनाशनिरासात् उद्बोधकविरहेणैवावान्तरा स्मरणवि-

रचात् । युज्यते च रीतिरियम् इतरथा चानन्तसंस्काराणामनन्तनाशकल्पनापत्तेः । एकदा तदीयसकलसंस्कारनाशोपगमे तु तावत्संस्कारप्रतियोगिक एक एव नाशो बाधकाभावात् । एवं कार्यतापि तत्तद्व्यक्तित्वेनैवेति तु प्रकारो विभाव्यताम् । तर्हि मया वक्ष्यमाणवर्त्मना भावनाख्यसंस्कारनिराकरणमपीति सर्वथा नानुभवत्वजातिसिद्धिरिति दिक् ॥

५५ । १ । घटाद्यभावेति । घटाद्यत्यन्ताभावान्योन्याभावात्यन्ताभाव इत्यर्थः । अतिरिक्तं वेति । भावातिरिक्त एव न तु घटाद्यात्मक इत्यर्थः । अबाधिताभावत्वेति । अत्र चाभावत्वं भावभिन्नत्वं न त्वखण्डोपाधिस्तस्य भावसाधारण्याभ्युपगमेनैव तर्कोपपत्तेः सम्भवात् । अभावाभावस्यातिरिक्तत्वे इत्यर्थः । तदाभावत्वेति । तदा घटाभावत्वेपरामर्शः । परे तु नास्तीति प्रत्ययो नाभावत्वमालम्बते परमखण्डमत्यन्ताभावत्वं तच्च भावाभावसाधारणमभ्युपेयतां कृतमतिरिक्तैरभावाभावैः । घटाभावात्यन्ताभावो न भाव इति च प्रत्ययो न लोकानामिति वदन्ति ॥

अन्ये तु घटवति घटाभावो नास्तीतिप्रत्ययबलादतिरिक्त एव तदभावः विशेषणतावच्छेदकैक्येन तदुपपादने चाभावमात्रविलयप्रसङ्गः तदधिकरणवृत्तिधर्मैरेव तदभावत्वेनानुगतीकृतैरनुगततदभावप्रत्ययानामुपपादयितुं शक्यत्वात् । विशेषणैक्यानुभवो भावभिन्नत्वानुभवो वा पुनरत्रापि न पाणिपिहित इति प्राहुः । भावत्वं संसर्गाभावत्वं चेति । अन्योन्याभावसामान्यान्योन्याभावमभिप्रेत्य घटान्योन्याभावभेदतादृशाभावत्वं

संसर्गाभावत्वं पटान्योन्याभावत्वं चेत्यवसेयम्। भावत्वं संसर्गाभावत्वं प्रायशस्तत्तदन्योन्याभावत्वं चेति युक्तः पाठः। मातश्चरणास्तु प्रामाणिकत्वादियमनवस्था न दोषायेति अतिरिक्ता एव भेदाभेदाः। अन्यथा अन्योन्याभावमात्रमेव नातिरिच्येत अधिकरणादृत्तिधर्माणामेव तत्त्वमभ्युपेतुं शक्यत्वादित्याहुः ध्वंसस्य प्रागभावः प्रागभावस्य च ध्वंसः प्रतियोग्येव प्रतियोगिसत्त्वकाल एव तत्प्रत्ययादिति प्राचीनमतं दूषयति,। ध्वंसेति। तस्येति। घटादेरित्यर्थः। ध्वंसप्रागभावौ न स्त इति द्वित्वमविवक्षितं, तेन घटस्य ध्वंसो नास्ति प्रागभावो नास्तीत्यर्थः। वस्तुतो घटादेर्ध्वंसो भविष्यति प्रागभावो नष्ट इत्यादिकप्रयोग एव ग्राह्यः। उक्तस्य प्रत्ययस्यात्यन्ताभावविषयत्वेनाप्युपपत्तेरित्यवधेयम्। अभावत्वेति। यद्यपि दर्शितप्रत्ययो ध्वंसत्वप्रागभावत्वे अखण्डोपाधी एवावगाहते न तु भावभिन्नत्वघटिते तेऽच भावसाधारणे एवोपगमितुमुचिते लाघवात्। घटध्वंसस्य प्रागभावो न भाव इत्यादिकस्य प्रत्ययः प्रश्नविषाणसम एष तथापि घटादौ ध्वंसत्वप्रागभावत्वे घटध्वंसप्रागभावप्रतियोगित्वोपगमे घटध्वंसस्य प्रागभावो भविष्यति ध्वंसो नष्ट इत्यादिप्रत्ययप्रसङ्गा एव दूषणमवसेयमिति वदन्ति। उत्तानाः पुनश्च ध्वंसप्रागभावयोः ध्वंसत्वप्रागभावत्वनिरूपितप्रतियोगित्वविरहादेव नोक्तप्रत्ययप्रसङ्ग इति नातिरिक्तावेव तावित्याहुः। परे तु प्रागभावो ध्वंसोऽन्योन्याभावोऽत्यन्ताभावस्य नाभाव इति प्रागभावत्वावच्छेदेन भावभिन्नत्वप्रत्यय कल्पयन्तोऽभावाभावमात्रमेवातिरिक्तं कल्पयन्ति। प्रागभाव एवेति। भविष्यतीति

प्रत्ययो वर्त्तमानकालोत्तरकालोत्पत्तिकत्वावलम्बन इदानीं घटप्रागभाव इत्यादिकस्तु प्रत्ययो न लोकानामिति भावः ॥

५७ । ३ । संस्कार एवेति । युक्तं चैतत् लाघवेन तत्तविषयत्वेन विषयितासंसर्गेण तत्तया वा ज्ञानलक्षणप्रत्यासत्तेर्हेतुत्वात् अत एव स्मृतिजनकेच्छाद्वेषाणां तत्ताविशिष्टतया तत्तासाक्षात्कार उपपद्यते स्मृत्यादेरेव प्रत्यासत्तित्वादिति संस्कारेति । संस्कारध्वंसेव्यभिचारवारणाय ज्ञानेति । अविरोधादिति । प्रत्यभिज्ञाया. संस्कारजन्यत्वाविरोधादित्यर्थः । अनुद्भूते । उद्बोधकविरहिते । अभिभूते । स्मृतिप्रतिबन्धकसहिते । तत्तास्मृतीति । तथा च गुरुणापि तत्ताज्ञानत्वेन हेतुत्वम् स्मृतिसाक्षात्कारपूर्वं च विषयस्मृतिनियमतः कल्प्यते तज्जनकेच्छाद्वेषयोश्च न तज्जनकज्ञानस्येव वा प्रत्यक्षत्वमेवेति भाव इति साम्प्रदायिकाः । संस्कारान्यतत्ताविषयकत्वेन तदन्यत्वविशिष्टतत्तया संस्कारव्यावृत्तस्मृत्यादिसाधारणजातिविशेषवत्तत्ताविषयकत्वादिना हेतुत्वम् । उक्तानन्तविषयस्मृतिकल्पनामपेक्ष्य लाघवेन जातिविशेषकल्पनाया उचितत्वात् । वस्तुतस्तत्त्वनिरूपणदशायां समानाधिकरणज्ञानेच्छादीनामपि युगपदुत्पादाभ्युपगमात् तत्ताज्ञानत्वेनैव हेतुत्वमिति परैरपरिशीलितः पन्था । संस्कारो निर्विषयक एव सविषयकत्वे मानाभावात् । अनुभवव्यापारतयैव तत्सिद्धेः । इत्थं तत्ताविषयकत्वेनैव हेतुत्वमिति स्वतन्त्राः । एतेन विशिष्टबुद्धिं प्रति विशेषणधियो हेतुत्वेन विशिष्टवैशिष्ट्यबुद्धिं प्रति च विशेषणतावच्छेदकप्रकारकबुद्धेर्हेतुत्वमते तदपि व्याख्यातम् । अत्र च

विशेषणतावच्छेदकप्रकारकबुद्धेर्हेतुतायां तथा निश्चयत्वमेवावच्छेदकं रक्तो दण्डो न वेति संशयोत्तरं रक्तदण्डवानिति ज्ञानानुदयादिति साम्प्रदायिकाः । तादृशज्ञानत्वेनैव तत्कारणताया अवच्छेदो न तु निश्चयत्वेन उक्तसंशयानन्तर रक्तारक्तदण्डवानिति बुद्धेरानुभविकत्वादिति पुनरस्मत्पितामहचरणाः । वस्तुतो भावनाख्यसंस्कारेपि मानाभावः ध्वंसद्वारैव स्मृतिहेतुताया उपपत्तेः ध्वंसस्यानन्तत्वेपि उद्बोधकविरहादेव स्मृतेर्विरहात् । प्रतियोगिध्वंसयोरेकत्राजनकत्वप्रवादस्य मानाभावेनाश्रद्धेयत्वात् । यत्तु ध्वंसस्य कारणत्वे ऽनुभवादिप्रतिबन्धकः स्यात् न चैवमेकत्र जनकत्वाप्रतिबन्धकत्वप्रतिबन्धकयोर्विरोधादिति तन्न विरोधासिद्धेः । अथैवं स्वनाशसहायस्य मणेरपि दाहहेतुत्वं स्यान्न स्यात् मानाभावात् मणिध्वंसं विनापि दाहदर्शनात् । यदभावत्वेन कारणत्वं तस्यैव प्रतिबन्धकत्वाद् विना चानुभवादिकं स्मृतेरनुदयात् । अथैवं धर्माऽधर्मश्च द्वयमपि न स्यात् विहितनिषिद्धक्रिययोरपि ध्वंसद्वारा सुखदुःखादिहेतुत्वोपपत्तेः । ध्वंसस्यानन्तत्वेपि फलप्रवाहविच्छेदस्य तत्तद्विषयविशेषसान्निध्यविरहादेव सम्भवात् सत्यपि धर्मादौ फलानुत्पत्तेस्त्वयापि तथाभ्युपगमात् प्रायश्चित्तादीनां ध्वंसद्वारा साक्षाद्वा नरकादिप्रतिबन्धकतयैव प्रवृत्त्यादेरुत्पत्तिरिति चेन्न स्यादेवं यदि न स्यातां पापनाशमुद्दिश्य प्रायश्चित्तादौ पुण्यनाशं विशिष्य कर्मनाशाजलस्पर्शादौ प्रवृत्तिनिवृत्ती शिष्टानाम् । न स्याच्च प्रायश्चित्तादेः

पापादिनाशकताबोधको वेदः । यदि च शिष्टानां तथा प्रवृत्त्यादिकं नोपेयते उपेयते च वेदानामन्यथार्थकत्वं तदा स्वर्गादिकं प्रत्येव न मानं युक्तेस्तुल्यत्वात् कैव कथा तदर्थकव्यापारविचारेऽपीति दिक् । अत्र च तत्ताज्ञानजन्यत्वं तत्ताविशिष्टसाक्षात्कारत्वेन लाघवात् । अत एव निर्विकल्पकसिद्धिरपीत्यस्मत्पितृचरणाः । तत्तादिविषयितानिष्ठं वैजात्यमेकमेव कल्प्यते । अनन्तनिर्विकल्पककल्पनामपेक्ष्य लघुत्वात् । एतेनेन्द्रियसंयोगादिजन्यतापि व्याख्याता व्याख्याते चानुमित्यादौ लिङ्गकत्वादिकं घटादिशाब्दबुद्धौ घटपटादिज्ञानजन्यत्वं च । वस्तुतो लिङ्गभेदेन व्याप्तिभेदेन विभिन्नेषु परामर्शेषु वह्न्यादिविषयितानिष्ठमेकमेव वैलक्षण्यं कल्प्यते लाघवात् एवञ्च पर्वतविशेष्यकवह्निविधेयकानुमितित्वादिकमेव जन्यताया जनकतायाश्च वह्निनिरूपितविलक्षणविषयित्वादिकमेवावच्छेदकम् । एवं घटादिपदज्ञान्यघटाद्युपस्थितावपि घटादिविषयितायामपि वैलक्षण्यमेकमेव कल्प्यते तथा च घटादिशाब्दत्वघटादिनिरूपितविलक्षणविषयित्वाभ्यामेव कार्यकारणभावः । इत्थं च केवलान्वय्यनुमानमपि निराबाधपदमादधातीति नैयायिकनयनानन्दनो शरणिः ॥

६७ । १ । अयं स्थाणुर्न वेति वाक्यश्रवणानन्तरं पदजन्यधर्मिकोटिद्वयादिज्ञानसहितात् प्रत्यक्षप्रमाणादेव साक्षात्कारात्मकः संशयः न त्वस्य प्रत्यक्षत्वव्याप्यत्वादिति प्राचीनमतं निराकरोति । पदेति । पदज्ञानजन्येत्यर्थः ।

अयं स्थाणुरित्यादिवाक्ये इदंपदाद्धर्मिणः स्थाण्वादिनञ्पदाभ्यां कोटिद्वयस्य वाकारात् कोटिद्वयविरोधस्य भानमिति भावः । तदुभयविरोधस्य भानं प्रायिकं प्राचीनप्रणयानुरोधादुक्तम् यत्र वाकारो नास्ति तत्र विनाविरोधभानमपि संशयः उत्पद्यते एव एकत्र भावाभावप्रकारकबुद्धेरेव तथात्वादिति । योग्यतानिर्णये सति विशेषदर्शनादेव न संशय इति तेन सम्बन्धेन तत्तच्छाब्दबुद्धौ तेन सम्बन्धेन तत्तद्वत्त्वस्यैव योग्यत्वादित्यतः संशयात्मकेत्युक्तम् । इदं तु प्राचीनमतमभ्युपेत्याभिहितं वस्तुतः विशिष्टधीसामान्यस्य कारणे संसर्गाग्रहे सति तद्भिन्नत्वेन फलविशेषस्याभावात् योग्यतादिज्ञानं शाब्दबुद्धौ तन्नये हेतुरेव नेति मन्तव्यम् । आहत्य प्रत्यक्षप्रमाणं साक्षात्कारप्रागभावं वाऽसचायीकृत्य शब्दत्वाख्यजातिविशेषवान् संशय इति फलितार्थः । तत्सामग्रीसत्त्वात् अयं स्थाणुरितिवाक्याधीननिर्णयस्येवायं स्थाणुर्नवेति वाक्याधीनसंशयस्यापि जातिविशेषवत्तयाऽनुभवाच्चेति भावः । शब्दाद्वत्येति अविलम्बेनेत्यर्थ इति तत्र धर्मिज्ञानादिसत्त्वे साक्षात्कारात्मकसंशयेऽपि विलम्बाभावात् । शब्दात् शब्दज्ञानात् । समानेत्यादीनि । समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशय इति सूत्रमित्यर्थः । संमतमिदमिति तत्र सूत्रे विप्रतिपत्तेरितिश्रवणादिति भावः । संशयत्वनिश्चयत्वयोर्धर्मिज्ञानसंशयसामग्र्यभावादिजन्यतावच्छेदकत्वं प्राचीनमतं स्वीकृतं निराकरोति । एकधर्मिकेति । ह्रदपर्वतौ पाषाणमयौ वा वह्नितदभाववन्तौ

इत्यादिवारणायैकधर्मिके एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नविरुद्धनानाप्रकारकत्वमित्यर्थः। घटो द्रव्यं पृथिवीत्यादिवारणाय विरुद्धेति। विरुद्धत्वेन नानाप्रकारकत्वमित्यर्थः। एतेन शुक्तामिदं रजतमिदूपवच्चेत्यादिकुद्धेर्निरास। अत एव विरोधभानसामग्रीत्युत्तरग्रन्थोपि सङ्गच्छते। अत्र च परस्परविरुद्धत्वेन नानाधर्मप्रकारकत्वमर्थ इत्येके। तत्प्रकारकत्वे सति विरुद्धत्वेन किञ्चित्प्रकारकत्वमर्थ इत्यन्ये। यद्रूपेण येन च सम्बन्धेन विरोधग्रहस्तेन रूपेण तेन सम्बन्धेन च प्रकारकत्वं वक्तव्यम्। तेनायं जलत्ववान् स्नेहसमवायिकारणतावच्छेदकजातिविरुद्धवांश्चेत्यादेर्निरासोऽनिरासश्च समवायादिना विरुद्धयोः पृथिवीत्वजलत्वयोः कालिकविशेषणतया एकधर्मिकस्य ज्ञानस्य। नन्वत्र विरोधस्तदवृत्तित्वं तद्व्याप्यप्रतिबन्धकग्रहविषयत्वं वा तज्ज्ञानमपि प्रकारतया संसर्गविधया वा। नाद्यः तदवृत्तित्वलक्षणविरोधस्य तदभावव्याप्तिपर्यवसायिनः संशयेनास्पर्शात् तदभावव्याप्यवत्तानिश्चयस्य संशयप्रतिबन्धकत्वात् तदभावस्य च कार्यसहभावेन हेतुत्वात् तदभावव्याप्यवत्तानिश्चयत्वं च न तदभावप्रकारकत्वघटितं गौरवात् अन्यथा वह्न्यभावव्याप्यव्याप्यवान् वह्निव्याप्यवान् पर्वत इति परामर्शदयात् पर्वतो वह्निमांस्तदभावव्याप्यवांश्चेति संशयरूपानुमितेर्दुर्वारत्वाद्विरोधाविषयकैकधर्मिकस्थाणुत्वतदभावप्रकारकज्ञानेपि संशयत्वव्यवहाराच्च अन्यथा तस्य संशयान्यत्वे ततो निश्चयकार्यापत्तेः। अत एव न द्वितीयादि-

रपि। नैवम् ज्ञानविषयतया परस्परग्रहप्रतिबन्धकतावच्छेदक-
धर्मस्यैवेह विरोधपदार्थत्वात् स च धर्मस्तत्त्वतदभावत्वादिः ।
परे तु परस्परग्रहप्रतिबन्धकत्वे प्रतिबध्यत्वयोरन्यतरज्ञान-
विरोधितयाऽवच्छेदकमेवाविरोधः । यदा तत्तदभावयोरेकध-
र्मिणि ज्ञानमेकमुत्पद्यते तदा कैव कथा तत्तदभावव्याप्ययो. ।
एवं च तदभावव्याप्यत्वनिश्चयत्वं तदभावाप्रकारत्वघटितमेवा-
स्थीयते एकत्र धर्मिणि तु तदभावव्याप्ययोश्च संशयानुमितिरि-
ष्यत एव नेष्यते तु तत्तदभावयोरित्याहुः । समाजो मिलन युग-
पदेकार्थसम्बन्धः । नीलेति । यथा घटसामग्रीतो घटोत्पत्तौ
तत्र नीलरूपसामग्रीतो नीलरूपोत्पत्त्यैव नीलघटनिर्वाहे नील-
घटत्वं न कार्यतावच्छेदकं तथा तत्तत्कोटिधर्मिविरोधसा-
मग्रीतो जायमानमविरोधात् एकमेव समूहालम्बनमुत्पद्य-
इत्येव संशयनिर्वाहे तत्त्वमपि न जन्यतावच्छेदकमिति भावः॥
न चैवधर्मिज्ञानमन्तरेण निश्चयवत् संशयोपि स्यात् सति धर्मी-
न्द्रियसन्निकर्षे दृष्टत्वात् धर्मिज्ञानस्य क्वचिद्धर्मीन्द्रियसन्नि-
कर्षविधयैवोपयोगात् । कोट्युपस्थितेरपेक्षा च विशेषणज्ञा-
नविधयाविशिष्टबुद्धिं प्रति विशेषणज्ञानाद्धेतुत्वे तत्कोटीन्द्रि-
यसन्निकर्ष एवापेक्षितो न तु सर्वत्र तज्ज्ञानमपीति
दिक् । संशयत्वशून्यज्ञानत्वं चेति । तद्विषयकत्वावच्छिन्नतद-
भावादिप्रकारकत्वशून्यतद्विशेष्यत्वावच्छिन्नतत्प्रकारकत्ववज्ज-
न्यज्ञानत्वरूपं तच्च तन्निश्चयत्वमित्यर्थः । ननु यथाश्रुते
संशयत्वघटकतत्प्रकारकत्वस्य वैयर्थ्यात् महानस वह्निमन्न

वा पर्वतो वह्निमानित्यस्य पर्वते वह्निनिश्चयत्वानापत्तेः । मद्दानसेपि तदापत्तेर्वा सम्बन्धप्रकारादिनिष्कर्षस्तु स्वयमेवावसेयः । जन्यत्वं वा नोपादेयम् अजन्यवृत्तिधर्मस्य जन्यतावच्छेदकत्वे विरोधाभावात् न हि स धर्मोऽन्यथासिद्धिनिरूपकः प्रमाणाभावात् । एवं न कार्यतावच्छेदकं नीलत्वादिति । न चैवं संशयसामग्र्या निश्चयाप्रतिबन्धकत्वे संशयोत्पत्तिसमयेपि निश्चयापत्तिः । निश्चयत्वस्य कार्यतानवच्छेदकतया तदुत्पत्तेरापादयितुमशक्यत्वात् तत्प्रकारकबुद्धेश्च जायमानत्वात् तदभावाप्रकारकबुद्धेरनुत्पादस्य तदभावप्रकारकबुद्धिसामग्रीसत्त्वे नापादकत्वादिति दिक् ॥

५८ । ४ क्षणश्चेति । क्षणव्यवहारविषयश्चार्थः । क्षणक इति द्रव्यादिवैधर्म्यमुक्तम् । तस्य क्षणिकत्वे घटप्रागभावक्षणे घट इति व्यवहारापत्तिरिति भावः । स्वजन्येति । तादृशयावत्प्रागभावस्येत्यर्थः । विभागो वा प्राथमिको ग्राह्यः । तेन कर्मणाश्चोत्तरोत्पन्न इत्यान्तरकर्माधीनक्रमिकानेकसंयोगसहकारात् क्रमिकानेकविभागजननेऽपि न क्षतिः । अत्र स्वजन्यविभागः प्रागभावविशेषपरिचायको न तु क्षणोपाधिप्रविष्टः एवमुत्तरत्रापीति वदन्ति । तत् कर्म तथा क्षणः सत्त्वेति मम तु क्षणत्वेनाखण्डोपाधिना अनुगम इति भावः । पृच्छति जाते चेति जायमान इत्यर्थः । कुत इति । तत्र स्वजन्यविभागप्रागभावविशिष्टस्य कर्मणोऽभावादिति भावः । उत्तरयति । विभागेति । नाशकनाशप्रभावापन्नेत्यादिः यत्किञ्चिद्विभाग

पूर्वसंयोगविशिष्टस्य कर्मणोऽनेकक्षणस्थायित्वात् । अत्र च कर्मणः कालोपाधितायाः सर्वसंमतत्वात् कर्मणोऽभिधानम् । वस्तुतः परस्परविशिष्टौ तादृशविभागसंयोगावेव वक्तव्यौ जन्यमानस्यैव कालोपाधित्वादित्यवधेयम् । सुतरामिति । शब्दानुगमस्याप्यभावादिति भावः । एवमिति । उत्तरसंयोगप्रागभावपूर्वसंयोगनाशविशिष्टं कर्म पूर्वसंयोगनाशोत्पत्तिसमये क्षणव्यवहारं जनयति उत्तरसंयोगोत्पत्तिसमये चोत्तरसंयोगविशिष्टं कर्मेति सुतरामननुगम इत्यर्थः । अत्रोत्तरसंयोगः स्वजन्यः संयोगः पूर्वसंयोगनाशः स्वप्रयोज्यसंयोगनाश इत्यवधेयम् । न च विभागोत्पत्तिसमये ऽन्यत्र कर्मान्तरोत्पत्तेः स्वजन्यविभागप्रागभावविशिष्टकर्मणैव तदापि क्षणव्यवहार इति वाच्यम् तदानीमन्यत्र कर्मण आवश्यकत्वे मानाभावात् । प्रतिक्षणं किञ्चिज्जायते इत्येव हि नियमो न तु कर्म जायत इत्यवधेयमिति भावः । अथ वदन्ति स्वजन्यविभागप्रागभावविशिष्टकर्मादिकमेव क्षणः क्षणशब्दस्य चोत्पत्त्यादिशब्दवन्नानार्थत्वमेव अनुगतव्यवहारस्तु शब्दैक्यादुत्पत्त्यादेरिव । इत्थं च यस्योत्पत्तेरव्यवहितोत्तरमेव यन्नश्यति तयोरेकतरविशिष्ट एवान्यतरः क्षणः समर्थनीयो विनिगमकाभावात् । अव्यवहितोत्तरत्वादिकं चेह व्यक्तिविशेषपरिचायकं न तु तदपि प्रविष्टमिति ।

६२।१। एवं स्वत्वमपीति । चैत्रस्येदं धनमितिप्रतीतिविषयो धनवृत्तिचैत्रवृत्तिसम्बन्धोऽपीत्यर्थः । तत् स्वत्वं तत्तद्येति अपहरणादिकं विनियोग इत्यर्थः । एतेनोत्पत्तिरपि व्याख्याता ।

उत्पद्यते इति प्रतीतेः प्रागभावप्रतियोगित्वमात्रं विषयो न तु स्वत्वघटितमन्यदननुगमात् प्रतीतेश्चानुगताकारकत्वात् । न च द्वितीयादिक्षणेऽपि उत्पत्त्यादिप्रतीतेरापत्तिः, तदानीं प्रागभावप्रतियोगिताविरहात् किमत्र मानमिति चेत् इदानीं न भविष्यतीति प्रतीतिरेव । अत एवाद्यमाविनि श्वो भविष्यतीति नैषा मनीषोन्मिषतीति तदानीं प्रतियोगीताविरहात् । न चायं सिद्धान्तः प्रमेयवार्तिके स्फुटत्वादिति शब्दमणिदीधितौ तातचरणाः । परकीयेऽन्ने च भक्षणादिकं निषिद्धमिति भावः । तत्प्रवृत्तिरिति । किं च योग्यत्वं न शब्दस्वरूपं तस्य क्रयादे पूर्वमुत्तरं च विक्रयादेः सत्त्वात् । एतेन तादृशविनियोगोपायविदयत्वं तत् स चोपायः क्रयादिरित्यपास्तम् । विषयतायाः धनस्वरूपत्वे उक्तदोषात् क्रयादिरूपत्वे पगमेपितत्वभावप्रसंगादिति । अस्वर्णं प्रतिग्रहः । उपादानमावश्यककुशादेरस्वामिकस्य अथाननुगमात् कथं स्वत्वं प्रतिग्रहादेः स्वत्वनाशविक्रयाद्योर्वा कार्यकारणभावग्रह इत्यत आह । कारणानामिति स्वत्वकारणीभूतप्रतिग्रहादीनां स्वत्वनाशकारणविक्रयादीनां चेत्यर्थः । अत्र स्वत्वत्वावच्छिन्नं प्रति कारणतावच्छेदकतया प्रतिग्रहादिषु एका स्वत्वनाशत्वावच्छिन्नंप्रति कारणतावच्छेदकतया विक्रियदिषपराशक्तिस्तृणादीनामिव वह्नौ सिध्यति स्वत्वत्वं चाखण्डोपाधिरस्तु वा जातिरिति भावः । वैजात्यादधर्म्यात् । स्वत्वनाशजातेरसत्वप्यखण्डोपाधय एव जन्यतावच्छेदिका इति भावः । वाकारोऽस्वरसमूच-

नाय । स च बहुतरवैजात्यकल्पनापेक्षया एकस्याः शक्तेरेव कल्पनायाः लघुत्वादिति । अत्र वदन्ति स्वत्वं नातिरिच्यते अतिरिक्तकल्पने गौरवात् मानाभावाच्च । अथ अनुगतप्रत्यय एवमानमिति चेत् न तदसिद्धेः अनुगतस्यैव तद्विषयत्वात् । अस्तु तथानुगतो व्यवहारादिति चेत् तत् किंशब्दानामनुगम एवानुगतविषये कल्पकः कल्प्यतां तर्हि सिंहादिष्वपि हरिर्हरिरित्यादेरनुगतव्यवहारादतिरिक्तो हरित्वपदार्थः । तथापि यथोक्तविनियोगार्हत्वादेरपास्ततया किमिदं स्वत्वमिति चेत् क्वचिद्विक्रयप्रागभावविशिष्टक्रयाविनाशः क्वचिच्च दानादिप्रागभावविशिष्टः । प्रतिग्रहादिध्वंस एव तथा प्रतिग्रहादेः पूर्वं न तथाप्रत्ययः प्रतिग्रहादिध्वंसविरहात् दानाद्यनन्तरं च न स्वत्वव्यवहारस्तत्प्रागभावविरहात् तच्च मरणस्य च ध्वंसात्मकतया विक्रयादिप्रागभावविशिष्टं तदेव क्वचित् स्वत्वं तदधिकरणहरणध्वंसो वा । इत्थं चातिरिक्तस्वत्ववादिमते स्वत्वस्य यानियानि नाशकानि तेषां प्रागभावविशिष्टा ये स्वत्वोत्पादकानां प्रतिग्रहादीनां ध्वंसास्त एव प्रायशस्तथा विक्रयादिप्रागभावविशिष्टस्य क्रयध्वंसस्य क्रयध्वंसविशिष्टस्य विक्रयप्रागभावस्य च विनिगमकाभावेन तथात्वात् आद्यमादाय स्वत्वमुत्पन्नमित्यस्य द्वितीयमादाय च स्वत्वं नष्टमित्यस्य प्रत्ययस्य न सङ्गतिः । अतिरिक्तस्वत्ववादिना स्वत्वत्वमप्यतिरिक्तमुपेयमित्यावश्यकत्वादास्तामुपदर्शितेषु ध्वंसादिषु स्वत्वत्वकल्पना न त्वतिरिक्तस्वत्वकल्पनापीत्यपि वदन्ति ।

६५। १। एवं शक्तिरपीति तृणफूत्कारसंयोगादिनिष्ठं वह्निजनकतावच्छेदकमित्यर्थः। अतिरिच्यत इति। तृणफूत्कारसंयोगादीनां वह्नित्वावच्छिन्नं प्रति तत्त्वेन हेतुताया व्यभिचारेणासम्भवादतिरिक्तसिद्धिरिति भावः। अथ तृणफूत्कारयोररणिनिर्मन्थनयोर्मणितपनकिरणयोश्च सम्बधस्य जन्यतावच्छेदकं वह्निवृत्तिवैजात्यचयमेव कल्प्यते अतो न व्यभिचार इति नैयायिकमतं दूषयति। तृणारणीति। अथास्तु तृणफूत्कारादिसम्बन्धेषु एकाजातिरेव तथा तथापि नातिरिक्तपदार्थसिद्धिरत आह। सम्बधेति। संकरेति। इदं तु परसिद्धान्तानुसारादुक्तम्। वस्तुतः प्रमाणसिद्धसाङ्कर्यस्य न दोषावहत्वमित्यावेदितम् अतो जातिरेव सा भवितुमर्हति। न च तस्या जातित्वे योग्यव्यक्तिगतजातेर्योग्यत्वनियमात् प्रत्यक्षापत्तिः शक्तिरस्तु न तथा, अतीन्द्रियत्वादिति वाच्यम् तथा जातेः प्रत्यक्षत्वे बाधकाभावात् तथात्वस्येष्टत्वात्। विविच्योपलम्भस्य च वह्निनिष्ठकार्यतावच्छेदिकानां जातीनामिव परमते दोषविशेषेणैव निरासादित्यवधेयम्। ननु तृणादिकं विना न वह्निरित्यन्वयव्यतिरेकाभ्यां तृणादीनामप्येकशक्तिमत्त्वेन कारणत्वं वक्तव्यम्। एवं फूत्कारादीनामप्यपरशक्तिमत्त्वेनेति शक्तिचयकल्पना तवाप्यावश्यकीत्यत आह। यदि चेति। तृणादेः सम्बन्धसम्पादकतयैव वान्वयव्यतिरेकयोरुपपत्तेर्न कारणतासिद्धिः। न च तृणादेरहेतुत्वे तत्र वह्न्यर्थिनः प्रवृत्तिर्न स्यात्। सम्बन्धार्थमेव तत्र तत्र प्रवृत्तिसम्भवादिति।

यदि चेत्युक्तम् । तृणादेरिति । आदिपदादरण्यादि फूत्कारादिपरिग्रहः । तेषां तृणादिफूत्कारादीनाम् । न च तेषु तत्सम्बन्धेषु च नवसु शक्तिरेकैव कल्प्यतां विनापि तत्सम्बन्धं केवलतृणादेरपि वह्न्युत्पत्त्यापत्तेः । अथैवं पटादिकं प्रति वेमतुरीप्रभृतीनामपि एकशक्तिमत्त्वेनैव हेतुत्वमस्तु । वेमत्वादिनाधर्मैः कारणत्वान्यपेक्ष्य लघुत्वात् तत्तत्संयोगत्वादीनां च हेतुत्वान्न केवले वेमादिसत्त्वे पटाद्युत्पत्तिरिति चेन्न वेमत्वादिनाऽन्वयव्यतिरेकाभ्यां तेन रूपेण हेतुताया दुर्वारत्वात् । तृणत्वादिना च नान्वयो न वा व्यतिरेकः प्रत्येकं तत्सत्त्वे वह्नेर्व्यतिरेकस्य तदसत्तायामुत्पादस्य च दर्शनात् । मणित्वादिनेति । आदिपदात् तेजस्त्वादिपरिग्रहः । मणित्वादिकमन्तरेण सा जातिस्तृणादौ तां जातिमन्तरेण च मणित्वादिकं वह्न्युकजनमणिप्रभृतिषु वह्निजनकमणौ च तयोः समावेशापत्तेरित्यर्थः । उत्तानात् तत्तत्सम्बन्धान्यतमत्वेन सम्बन्धानां तृणाद्यन्यतमत्वेन तृणादीनां हेतुत्वात् न शक्तिसिद्धिरपि । न च तत्तदन्यत्वविशिष्टैतदन्यत्वावच्छिन्नप्रतियोगिताको भेदस्तथा च विनिगमकाभावादेतदन्यत्वविशिष्टतदन्यत्वावच्छिन्नप्रतियोगिताकैरपि भेदैः कारणतावक्तव्येत्यनन्तकार्यकारणभावप्रसङ्ग इति वाच्यम् । एकस्यैव भेदस्य तादृशनानाप्रतियोगिकत्वोपगमात् । यत्तु तथापि विनिगमकाभावात्तादृशतादृशप्रतियोगिताकत्वैर्भेदस्य निवेशात् तद्दोषतादवस्थ्यमिति । तन्न तादृशप्रतियोगिताकत्वपरिचितेनाखण्डभेदेनैव जनकताया अवच्छेदात् तच

व ताद्दृशप्रतियोगिताकत्वाना मनिवेशात् । अथैवं सर्वत्र तत्तदन्यान्यत्वस्यैवावच्छेदकतासम्भवेऽपि कार्यकारणभावावच्छेदकतायाः कुत्रापि जातिसिद्धिर्न स्यादिति चेन्न स्यादेव परमार्थतः प्रत्यक्षसिद्धजात्या हि यत्रान्वयव्यतिरेकाभ्यां हेतुहेतुमद्भावबुद्धिस्तत्रैव कार्यकारणयोरतीन्द्रिययोरपि तज्जातिमत्त्वोपगमादित्याहुः । वस्तुतस्तृणादिषु वह्नेः कारणतानवच्छिन्नैव न चि स्वरूपसम्बन्धविशेषोऽतिरिक्तपदार्थरूपा वा कारणता किञ्चिद्धर्मावच्छिन्नैवेति व्याप्तिरस्ति प्रमाणाभावात् । एतेन किञ्चित्कार्यत्वमपि विवेचितम् । अथैवं तन्तुत्वपटत्वादेरपि तथात्व न स्यादिति चेन्न । तन्तुत्वेन तन्तुः पटकारणं पटत्वेन च पटस्तन्तुकार्यमिति प्रत्ययस्तत्र कार्यतावच्छेदकत्वासिद्धेः । इत्रापि तथा प्रतीतिरस्तीति चेन्न शक्तिविशेषेण तृणं वह्निहेतुरिति प्रतितेरसिद्धेः शक्तेरतीन्द्रियत्वोपगमात् । अस्ति तथा शाब्दी बुद्धिरिति चेत् तत्किं ततोपि परमार्थतो वस्तुसिद्धिः । अथैवं वह्नौ तृणादिजन्यतापि निरवच्छिन्नैव स्यादिति चेत् स्यादेव यदि न स्याद्वह्नित्वेन वह्निः तृणादिजन्य इत्यबाधितानुभवविरोध इति ब्रूमः । यदि च तृणत्वादिना तृणादिकं वह्निहेतुरित्यादिकोऽपि प्रामाणिकप्रत्ययस्तदा आस्तां तृणत्वाद्यवच्छिन्नकारणताप्रतियोगिकं निरवच्छिन्नमपि वह्नौ कार्यतान्तरमवच्छिद्यतां वा वह्नित्वावच्छिन्नकार्यताप्रतियोगिककारणत्वमेव तृणत्वादिना प्रमाणसिद्धस्यातिप्रसक्तधर्मेण कार्यत्वस्यादोषत्वात् । यदि तृणत्वावच्छिन्नकारणताप्रतियोगिककार्यता न

वह्नित्वेनेति नानुभव । एतेन लौकिकालौकिकज्ञानेन्द्रियसन्नि-
कर्षादे प्रत्यक्षं प्रति वह्निविषयवह्निव्याप्तिविषयकपरामर्शस्य वह्न्य-
नुमितिं प्रति विविधपदवृत्तिज्ञानजन्यपदार्थोपस्थिते शाब्दं
प्रति तत्तदनन्तानामुद्बोधकानां स्मृतिं प्रति प्रवृत्त्यादिकं प्रति
च स्वर्गादिनानाविधेष्टसाधनतानानादीनां कारणत्वं यथायथं
व्याख्यातम् । तथापि, निरवच्छिन्नकार्यकारणभावोपगमात् ।
अथैवमनन्तपरामर्शपदाध्याहारयोः कल्पनायां गौरवात् अथ
वह्निव्याप्यधूमो धूमवान् पर्वत इत्यादिज्ञानद्वयादप्यनुमितेरर्था-
ध्याहारादपि च शाब्दबोधोत्पत्तिमुरीकुर्वन्तो[1] मीमांसका
एव विजयेरन्निति विजयेरन्नेव को नाम नाभ्युपैति । अथैव ज्ञान
द्वयादित एव प्रवृत्त्यादेरुपपत्तेरन्यथाख्यातिर्न सिद्धेदिति चेन्न
सत्यस्येवासत्यस्यापि विशिष्टज्ञानस्यानुभवसिद्धत्वेन दुर्वारत्वात् ।
कारणबाधस्य च निरस्तत्वात् । अत एव विनापि व्याप्त्या-
दिज्ञानं, घटमानयेत्यादिशब्दश्रवणानन्तरमाकाङ्क्षादिज्ञानस
चितपदार्थोपस्थितेरेव घटमानयेत्याद्याकारानुमितिरेवोत्पद्यत
इति अनुमान एव शब्दान्तर्भाव इति नव्यवैशेषिकाणां शब्द-
प्रामाण्यखण्डने भाव तत्खण्डनं पुनरेवमर्थं शब्दाच्छृणोमि
नानुमिनोमि न साक्षात्करोमीति प्रतीतेरेव नान्यथा शृणोतेश्च
शाब्दत्वं श्रावणत्वं चोभयमपि सामान्य शक्यतावच्छेदकं शब्दं
शृणोमीति प्रतीतिवद्घटपदाद्घटं शृणोमीति प्रतीतेरपि दर्शनात् ।
अत एवात्मा श्रोतव्य इति शाब्दत्वावलम्बनश्रौतकर्मोपीत्यवधेयम् ।

---

(१) मुरीकुर्वन्ता-पा २ पु ।

एके तु वह्नित्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकवत् तृणादिकं तृणत्वाद्यवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकवान् वह्निरित्यादिकं प्रत्ययं कल्पयन्तस्तृणादिषु सङ्कीर्णां जातिं वह्निवृत्तीनि च वैजात्यानि[१] कल्पयन्ति। केचित्तु कार्यता कारणता च सर्वत्र निरवच्छिन्नैव तन्तुः पटकारणमित्यादिको हि लोकानामनुभवो न तु तन्तुत्वादिनापि द्रव्यत्वेन न तन्तोः पटकारत्वं किं तु तन्तुत्वेनेत्यादिकाः प्रतीतयस्तु केवलतान्त्रिकाणामेवेत्याहुः। केन रूपेणेति। न हि तेषां शुद्धदशरथत्वादिनोपस्थितिः संभाव्यतापि तथाऽननुगमात् नापि प्रमेयत्वादिना दशरथत्वादिप्रकारकोपस्थितिः ततः प्रमेयवानित्याकारकशाब्दबोधस्यैव भाव्यत्वादिति भावः। विभावनीयमिति। शुद्धदशरथत्वादिनैव तदुपस्थितिरितरथा तथा शाब्दबोधानुपपत्तेः। न च कारणाबाधः प्रमेयवानित्याकारकसंस्कारादेव प्रमेयत्वांशे उद्बोधकरहितात् तथा स्मरणसम्भवात्। तत्प्रकारकस्मृतिं प्रति तत्प्रकारकानुभवत्वेनैव हेतुत्वं न तु निरवच्छिन्नतत्प्रकारताकस्मृतिं प्रति तादृशानुभवत्वादिनापि गौरवात् मानाभावाच्च। अपि च प्रमेयमभाववदित्याकारकज्ञानात्संसर्गविधया शुद्धदशरथत्वादिस्वरूपप्रतियोगित्वलक्षणसम्बन्धविषयकज्ञानलक्षणप्रत्यासत्तेः शुद्धदशरथत्वादिप्रकारको मानसानुभवोऽपि सुलभः। एतेनान्वयव्यतिरेकाभ्यां शुद्धतत्प्रकारकस्मृतितादृशानुभवत्वादिना हेतुत्वेऽपि न क्षतिः। वस्तुतः तेषां शुद्ध-

(१) वह्निनिष्ठवैजात्यानि-पा॰ २।

दशरथत्वादिना शाब्दधीरेव न भवति । परं तु दशरथादिपदवाच्यत्वादिनैव शाब्दबोधः । एवं च लक्षणया दशरथादिपदवाच्यत्वप्रकारकं वाच्यत्वसम्बन्धेन दशरथादिपदप्रकारकं वा स्मरणमेवापेक्षितं तच्च दशरथादिपदवाच्यत्ववति दशरथादिपदशक्यसम्बन्धप्रकारकाद्वाच्यत्वसंसर्गेण दशरथादिपदवृत्तिशक्यसम्बन्धसंसर्गेण दशरथादिपदप्रकारकाद्वा मानसबोधादेवोत्पत्स्यत इति युक्तमुत्पश्यामः ॥

७५।१। न गुण इति । न गुणपदार्थ इत्यर्थः । गुणादिष्विति गुणपदार्थतया उभयाभ्युपेतेष्वित्यादि । तद्वत्तेति । एकरूपमित्याद्याकारकसंख्यावत्ताप्रत्ययादित्यर्थः । एकेति । एकस्मिन्नर्थे द्वयोः समवाय इत्यर्थः । यत्र सङ्ख्यायाः समवायस्तत्र गुणादेरपि समवायोऽस्तीति तेन सम्बन्धेन प्रतीतेः प्रमात्वमेवेति भावः । ननु मद्वारजनतदुपरक्तपटादौ चौचित्यप्रतीतीनां समवायसमवायिसंयोगात्मकविलक्षणसम्बन्धविषयकत्वेऽपि अविलक्षणप्रकारकत्वादविलक्षणत्वं तथैवापि भवीष्यतीत्यत आह । घटत्वादौ चेति सम्प्रदायः । वस्तुतस्त्वविलक्षणाया इत्यस्याविलक्षणसम्बन्धविषयिण्या इत्यर्थः । तत्त्वं चानुभवसिद्धमिति भावः । मद्वारजनतदुपरक्तपटादौ च विलक्षणसम्बन्धविषयकत्वमनुभवसिद्धम् यत्र चाविलक्षणसम्बन्धविषयकत्वानुभवस्तत्र पटादावपि चौचित्यादिप्रतीतेः । समवायसम्बन्धविषयकत्वमिष्यत एव परं तु बाधकबलात्तस्या भ्रमत्वं कल्प्यते । न चैवं तत्राबाधितप्रमाण्यानुभवो न स्यात् परम्परासम्बन्धविषयीकरणेऽपि तदुपपत्तेरिति

एके तु वह्नित्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकवत् तृणादिकं तृणत्वाद्यवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकवान् वह्निरित्यादिकं प्रत्ययं कल्पयन्तस्तृणादिषु सङ्कीर्णां जातिं वह्निवृत्तीनि च वैजात्यानि[1] कल्पयन्ति। केचित्तु कार्यता कारणता च सर्वत्र निरवच्छिन्नैव तन्तुः पटकारणमित्यादिको हि लोकानामनुभवो न तु तन्तुत्वादिनापि द्रव्यत्वेन न तन्तोः पटकारत्वं किं नु तन्तुत्वेनेत्यादिकाः प्रतीतयस्तु केवलतान्त्रिकाणामेवेत्याहुः । केन रूपेणेति । न हि तेषां शुद्धदशरथत्वादिनोपस्थितिः संभाव्यतापि तथाऽननुगमात् नापि प्रमेयत्वादिना दशरथत्वादिप्रकारकोपस्थितिः तत. प्रमेयवानित्याकारकशाब्दबोधस्यैव भाव्यत्वादिति भावः । विभावनीयमिति । शुद्धदशरथत्वादिनैव तदुपस्थितिरितरथा तथा शाब्दबोधानुपपत्तेः । न च कारणबाधः प्रमेयवानित्याकारकसंस्कारादेव प्रमेयत्वांशे उद्बोधकरहितात् तथा स्मरणसम्भवात् । तत्प्रकारकस्मृतिं प्रति तत्प्रकारकानुभवत्वेनैव हेतुत्वं न तु निरवच्छिन्नतत्प्रकारताकस्मृतिं प्रति तादृशानुभवत्वादिनापि गौरवात् मानाभावाच्च । अपि च प्रमेयमभाववदित्याकारकज्ञानात्संसर्गविधया शुद्धदशरथत्वादिस्वरूपप्रतियोगित्वलक्षणसम्बन्धविषयकज्ञानलक्षणाप्रत्यासत्तेः शुद्धदशरथत्वादिप्रकारको मानसानुभवोऽपि सुलभः । एतेनान्वयव्यतिरेकाभ्यां शुद्धतत्प्रकारकस्मृतितादृशानुभवत्वादिना हेतुत्वेऽपि न क्षतिः । वस्तुतः तेषां शुद्ध-

(१) वह्निनिष्ठवैजात्यानि-पा० २ ।

दशरथत्वादिना शाब्दधीरेव न भवति । परं तु दशरथादिप-
दवाच्यत्वादिनैव शाब्दबोधः । एवं च लक्षणया दशरथादिप-
दवाच्यत्वप्रकारकं वाच्यत्वसम्बन्धेन दशरथादिपदप्रकारकं वा
स्मरणमेवापेक्षितं तच्च दशरथादिपदवाच्यत्ववति दशरथादि-
पदशक्यसम्बन्धप्रकारकाद्वाच्यत्वसंसर्गेण दशरथादिपदवृत्ति-
शक्यसम्बन्धसंसर्गेण दशरथादिपदप्रकारकाद्वा मानसबोधा-
द्वोत्पत्स्यत इति युक्तमुत्पश्यामः ॥

७५।१। न गुण इति । न गुणपदार्थ इत्यर्थः । गुणादिष्विति
गुणपदार्थतया उभयाभ्युपेतेष्वित्यादि । तद्वत्तेति । एकरूपमि-
त्याद्याकारकसंख्यावत्ताप्रत्ययादित्यर्थः । एकेति । एकस्मिन्नर्थे
द्वयोः समवाय इत्यर्थः । यत्र संख्यायाः समवायस्तत्र गुणादेरपि
समवायोऽस्तीति तेन सम्बन्धेन प्रतीतेः प्रमात्वमेवेति भावः ।
ननु महारजनतदुपरक्तपटादौ लौहित्यप्रतीतीनां समवायसमवा-
यिसंयोगात्मकविलक्षणसम्बन्धविषयकत्वेऽपि अविलक्षणप्रका-
रकत्वादविलक्षणत्वं तथेहापि भविष्यतीत्यत आह । घटत्वादौ
चेति सम्प्रदायः । वस्तुतस्त्वविलक्षणाया इत्यस्याविलक्षणसम्ब-
न्धविषयिण्या इत्यर्थः । तत्त्वं चानुभवसिद्धमिति भावः । महार-
जनतदुपरक्तपटादौ च विलक्षणसम्बन्धविषयकत्वमनुभवसिद्धम्
यत्र चाविलक्षणसम्बन्धविषयकत्वानुभवस्तत्र पटादावपि लौ-
हित्यादिप्रतीतेः । समवायसम्बन्धविषयकत्वमिष्यत एव परं तु
बाधकबलात्तस्या भ्रमत्वं कल्प्यते । न चैवं तत्राबाधितप्रमाण्या-
नुभवो न स्यात् परम्परासम्बन्धविषयीकरणेऽपि तदुपपत्तेरिति

दक् । द्वित्वादीति । द्वयं घटत्वमित्यादीत्यर्थः । ननु समवाय-
वदेकार्थसमवायेनापि नैकस्मिन् द्वित्वादि पर्याप्नोतीति न तथा
प्रतीतिरित्यत आह । रूपत्वादौ चेति । तत्सम्भव इति
एकार्थसमवायसम्भव इत्यर्थः । यत्तु तत्राप्येकार्थसमवेतसमवा-
यात् संख्याप्रत्यय इति तन्न उक्तोत्तरत्वात् ॥

७६।१। गन्धादिमत्तेति । अथ गन्धादिमत्ता गन्धादिसम-
वायो गन्धादिकं वा प्रष्टव्यः प्रथमं चेन्न तथा प्रतीतेरदृष्टत्वात्
चरमं चेत् न तत्र गन्धादिसमवायसत्त्वेऽपि गन्धादेरभावादिति ।
अथ तदीयसम्बन्धवत्त्वं तद्वत्त्वनियतमतो गन्धादिमत्ताप्रतीतेराप-
त्तिरिति चेन्न गगनीयसंयोगे व्यभिचारात् । वृत्तिनियामक-
त्वविशेषणान्नैवमिति चेन्न घटवृत्तितानियामककपालसंयोगवत्
कपालस्य स्वाभाववत्त्वेन व्यभिचारात् । उक्तसंयोगस्यापि च
घटादि[1]वृत्तिनियामकत्वात् अप्रयोजकत्वाच्च यत्र तद्वृत्तिता-
नियामकः संसर्गस्तत्र तद्वत्तानियम इति चेदनुमतमेतत् । न
चैतावता आयाति तोयादेर्गन्धादिमत्ता उभयोरसिद्धेः सन्नपि पयसि
गन्धसमवायः कथं तद्वृत्तिनियामक इति चेदनुभवं पृच्छ यद्
सौ समवायेन पयसि गन्धो नास्तीत्याकारको जायतेऽनुभूयते
चेति चेत् । अत्राहुः ' जलस्नेहस्य समवायो न गन्धस्येत्यादि-
प्रतीतेरेव समवायस्य नानात्वं तत्रैव च ग्रन्थाक्षरस्तात्पर्यमिति ।
ननु समवायस्य नानात्वे कथमनुगता समवेताकारधीर्गन्धादि-
ष्वित्यत आह । समवायत्वमिति । तथा च तदनुगमादनुगता-

(१) घटादि–पा॰ २ पु॰ । एवं पूर्वस्मिन्नपि ।

धीरीति भावः । अत्र चानुगतमतेरनुगतविषयनियम्यतया समवायस्यैकत्वे सिद्धे जले न गन्धसमवाय इत्यादिप्रतीतेर्विशिष्टाभावो विषय इति वदन्ति ॥

७६।४। वैशिष्ट्यमपीति । भूतलादावभावसम्बन्ध इत्यर्थः । निमित्तेति । संसर्गविषया विषयतेत्यर्थः । तथेति अभाववत्ताप्रत्ययविषयेत्यर्थः । तत्रापि रूपादिमत्ताप्रतीतावपि । सुवचत्वादिति । अथास्तु समवायस्याप्युच्छेद इति चेन्न विलक्षणसम्बन्धांशे ऽविलक्षणानां रूपादिघटाभावादिमत्त्वप्रत्ययानामनुपपत्तेः । अयं घट इत्यादेरिवाचास्य समवाय इति प्रतीतेरानुभाविकत्वाच्च ॥

७८।१। ज्ञानादीत्यादिपदादिच्छादिपरिग्रहः । विषयतादिपदाद्विषयित्वप्रतियोगित्वानुयोगित्वावधित्वावधिमत्त्वाधारत्वाधेयत्वदिक्कालनिरूपितविशेषणत्वविशेष्यत्वावच्छेदकत्वावच्छेद्यत्वादयः परिगृहीता. व्याख्याता इति । पटादौ ज्ञानादिमत्तानुद्धिनिमित्ततया तेषां सिद्धेरिति भावः । परे तु सम्बन्धांशे ऽविलक्षणरूपादिमत्ताप्रत्ययमात्रस्य समवाय इत्यादिकं प्रत्ययमुपलभन्तः समवायिविशेषणतादिकं सकलमेवातिरिक्ततया मन्यन्ते । केचित्तु कार्यकारणभावावच्छेदकसम्बन्धविधया समवायिविशेषणत्वविषयित्वादिकमतिरिक्तं सिध्यति अन्यथा सम्बन्धाननुगमादननुगतकार्यकारणभावापत्तेः । अत एव ग्रन्थकृतापि निमित्ततयेत्युक्तम् । तदर्थस्य हेतुतयेति । यथाश्रुत एवेत्यर्थः। न्यायचतुर्थाध्याये शून्यतोपादानकत्वनिराकरणप्रकरणे पूर्वपक्षे उक्तम् ॥

७८।२। नानुपमृद्येति । बीजादिकं मद्यापटादि चानुपमृद्या-ङ्कुरादेः खण्डपटादेश्च प्रादुर्भावस्य जन्मनोऽभावादित्यर्थः । एता-वता जनकत्वं सिध्यद्स्तु बाधके उपादानकारणत्वमेव सिध्य-तीति तेषामभिमानः । इदमुपलक्षणं तेषां मोहः पापीयान्ना-मूढस्येत्तरोत्पत्तेरित्यपि न्यायचतुर्थाध्यायसूत्रं तेषां रागद्वेष-मोहानां रागमोहयोर्द्वेषमोहयोर्वा मध्ये मोहः पापीयान् बलव-द्द्वेषविषयः अमूढस्य रागद्वेषानुत्पत्तेरिति तदर्थः । अस्मन्मते कलञ्जभक्षणं पापाजनकत्वाभाववदित्येवार्थः । प्रकृत्यर्थे विध्य-र्थस्य पापजनकत्वस्य नञाऽभावबोधनादतो गुरुणामित्युक्तम् । विषय. कारणम् तन्मते कलञ्जभक्षणाभावेन निषेधापूर्वजननात् । कार्यं कृतिसाध्यं तच्च तन्मते विध्यर्थः । एतादृश इति । प्रकृ-त्यर्थान्वितनञर्थविभक्त्यर्थयोरन्वय इत्यर्थः । स्थलविशेषे तादृश-प्रयोगस्थले ।

७१।२। पदार्थान्तरमिति । न चान्यथासिद्धनिरूपकनियतपू-र्ववर्त्तितावच्छेदकधर्मवत्त्वेनैव तथा व्यवहारोपपत्तेरतिरिक्तका-रणत्वे मानाभावः । अन्यथासिद्धेर्दुर्वचत्वान् नियमस्य चाननुग-तत्वेनानुगतप्रत्ययानुपपत्तेश्च । मम तु कारणत्वत्वेनाखण्डोपा-धिना तथा प्रत्ययात् । एतेनान्यथासिद्धनिरूपकधर्मावच्छिन्नस्य नियतोत्तरवर्त्तितावच्छेदकधर्मत्वं कार्यत्वमित्यपास्तम् । कार्य-भेदादिति । नात एककार्यकारणस्य सकलकार्यकारणत्वप्रसङ्गः कार्यभेदस्य कार्यतावच्छेदकावच्छिन्नभेदः कार्यतावच्छेदकभेद इति फलितार्थः । तेन घटव्यक्तीनां भेदेऽपि घटत्वस्य कार्यता-वच्छेदकस्यैकत्वात् तासां कारणत्वमेकमेवेति मन्तव्यम् । अथ-

च्छेदकभेदादिति। नातो दण्डत्वादिना घटकारणस्य कपालत्वादीनापि तत्कारणत्वमिति भावः । शक्येति। नातः कारणादिपदनानार्थत्वमिति भावः । कश्चिदपलापादन्वयव्यतिरेकग्रह इत्यस्य नियमत इत्यादिः । नातः सति व्यभिचारग्रहे कुचचिदन्वयव्यतिरेकग्रहेऽपि कारणत्वग्रहः । वस्तुतो व्यभिचारस्य कारणत्वाद्यभावव्याप्यादितया ग्रह एव विरोधी तद्ग्रहे व्यभिचारग्रहेऽपि कारणताग्रहस्येष्टत्वादिति यथाश्रुतमेव सम्यक्। न चैवं कारणताप्रत्यक्षं प्रत्यन्वयव्यतिरेकग्रहस्य हेतुत्वे मानाभावः। सत्यपि दण्डेन्द्रियसन्निकर्षे तज्ज्ञाने च विनान्वयव्यतिरेकग्रहं कारणत्वप्रत्यक्षानुदयात् । यदि च तथापि कारणत्वं गृह्यत एव न तु निश्चीयते संशयसामग्रीसत्त्वादिति विभाव्यते तदोक्तरीत्या प्रतिबन्धकस्य व्यभिचारग्रहस्य निवारकतया तदुपयोग इति तथोक्तम् । अन्वयः इन्द्रियसन्निकर्षस्य व्यतिरेकः कारणत्वाभावव्याप्यादितया ग्रहस्य ग्रह इति घटसत्त्वे ग्रहो विशेषणस्येत्येवमेवार्थ इति दिक् । कश्चित् गगनादौ। एतेनेति । कार्यत्वमपि पदार्थान्तरं तच्च कारणतावच्छेदकभेदात् स्वावच्छेदकभेदाच्च भिद्यते कार्यत्वत्वेनाखण्डोपाधिनाऽनुगतं च । तत्कार्यादिपदशक्यतावच्छेदकमावश्यकं चेत्यादीति भावः । कारणतेति। अस्येदं कारणमिति प्रतीतिसिद्धस्य कारणताप्रतियोगिकत्वस्यावश्याभ्युपेयत्वात् । तेनैव कार्यव्यवहारोपपत्तौ नातिरिक्तं कल्प्यत इति भावः । कार्यत्वेति । कार्यत्वमेवातिरिक्तम् पदार्थान्तरम्। कारणत्वं तु कार्यताप्रतियोगिकत्वमेव । अस्येदं कार्यमिति प्रतीतिसिद्धतयाऽवश्याभ्युपेतेन कार्यताप्रतियोगिकत्वेनैव

कारणत्वाव्यवहारसम्भवादिति भावः । तस्मादिति । विनिगमकाभावात् कारणत्वं कार्यत्वप्रतियोगित्वादिति कार्यत्वं च कारणत्वप्रतियोगित्वादितो भिन्नमित्यर्थः । इदं च बोध्यम् । यागादौ स्वर्गादिनिष्ठकारणताया आधाराधेयभावसम्बन्धेन ज्ञानस्य स्वर्गादिनिष्ठकार्यतायाः प्रतियोगित्वसंसर्गेण ज्ञानस्य च द्वयोरेव विनिगमकाभावादेकशक्तिमत्त्वेन प्रवृत्तौ हेतुत्वमिति । परे तु यदवच्छिन्नं प्रति अन्यथासिद्धनिरूपको नियतपूर्ववर्त्तितावच्छेदकस्य यो धर्मस्तद्वत्त्वधर्मवत्त्व एव परस्परनिरूपिते तेन रूपेण कार्यत्वकारणत्वे तद्धर्मावच्छिन्नं प्रति नियतपूर्ववर्मितावच्छेदकत्वेन येन तादृशं प्रति कारणत्वं न व्यवह्रियते स धर्मस्तादृशं प्रत्यन्यथासिद्धिनिरूपकस्तद्भेदसमूहस्तावदन्यतमत्वावच्छिन्नप्रतियोगिताक एक एव भेदो वा प्रतियोग्यविशेषित कारणतायां निवेशनीय इति नान्यथासिद्धिनिरूपकेण कारणत्वभ्रमानुपपत्तिः । अनुगतव्यवहारस्य व्याप्यादिव्यवहारवच्छब्दमात्रानुगमादेव । न चेदेवं व्याप्यत्वादेरपि पदार्थान्तरतापत्तिः । अत एव व्यभिचारग्रहेण नियमतः कारणताधीप्रतिबन्धः अत एव च कार्यत्वकारणत्वयोरवच्छिन्नत्वनियमप्रवादोऽपि साधु सङ्गच्छते । अथ तद्धर्मावच्छिन्ननियतपूर्ववर्तितावच्छेदकत्वम् अव्यवच्छिन्नपूर्वत्वसम्बन्धेन तद्धर्मावच्छिन्नवान् यः समयस्तत्र दैशिकविशेषणतया वर्तमानस्याभावस्य कालिकविशेषणता स्वव्यापारान्यतरसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं तादृशान्यतरसम्बन्धेन स्वावच्छिन्नानधिकरणेन तत्र वर्त्तमानस्य प्रतियोगिता-

वच्छेदको यो यो धर्मस्तदन्यत्वकूटवत्त्वं वा तन्त्वादिमत्यपि समये तन्त्वाद्यनधिकरणदेशावच्छेदेन तन्तुत्वाद्यवच्छिन्नाभावसत्त्वाद-व्यवहितपूर्वत्वसम्बन्धेन तद्धर्मावच्छिन्नवान् यावान् समयो यद्धर्मा-वच्छिन्नवांस्तत्त्वं वा अन्योन्याभावस्याव्याप्यवृत्तित्वात्। एवं च गतघटत्वादिना कार्यत्वेन घटत्वावच्छिन्नाव्यवहितपूर्वत्वा सिद्धेः न हि घटप्रागभावाधिकरणसमयप्रागभावानधिकरणघटप्रा-गभावाधिकरणसमयत्वलक्षणं घटाव्यवहितपूर्वत्वं सम्भाव्यतापि सर्वस्यैव समयस्य यत्किञ्चिद्घटप्रागभावाधिकरणसमयप्रागभा-वाधिकरणतया तदन्यत्वाभावात् तद्धर्माश्रययत्किञ्चिदव्य-वहितपूर्वत्वसंवलितस्य नियमो नोपादेयः। द्रव्यत्वजन्यद्रव्य-त्वावच्छिन्नं प्रत्यपि कपालत्वादिना हेतुतापत्तेः नियमप्रवेशा-नुपपत्तेश्च तद्धर्माश्रयाव्यवहितपूर्ववर्तित्वस्यैव वक्तुमुचितत्वादिति चेन्न तद्धर्माश्रयस्य यावतः प्रत्येकमव्यवहितपूर्वः समयो दर्शि-तान्यतरः तत्सम्बन्धेन यद्धर्मावच्छिन्नं वा तद्धर्मावच्छिन्ननियत-पूर्ववर्त्तितावच्छेदकत्वात्। अत एव कार्यमात्रवृत्तिधर्मस्यैव का-र्यतावच्छेदकत्वमिति प्राचीनगाथापि सङ्गच्छते। तद्धर्माश्रयस्य यावान् प्रागभावस्तत्प्रत्येकं तत्तदधिकरणसमयप्रागभावानधिक-रणं तदधिकरणसमय इत्यादेरुक्तत्वान्नित्यवृत्तिरपि धर्मोऽव-च्छेदको जन्यताया इत्यपि वदन्ति। वस्तुतस्तु तद्धर्माश्रयीभूत-यत्किञ्चिद्व्यक्त्यव्यवहितपूर्वसमयान्यत्वं यद्धर्मावच्छिन्नत्वनिष्ठा-न्योन्याभावप्रतियोगितानवच्छेदकं तदन्यो धर्म एव तद्धर्मा-वच्छिन्नं प्रति नियतपूर्ववर्तितावच्छेदकस्तथा च नित्यानित्य-

वृत्तिरपि धर्मो जन्यताया भवेत्येवावच्छेदक इति युक्तमुत्पश्यामः । एवं यथा यथमेकार्थसमवायादीनां तादात्म्यादिना तादात्म्यादीनां च सम्बन्धेन दैशिकनियमोऽपि प्रायशः कारणतामधिशेत- इत्यलमतिविस्तरेण ॥

प्राञ्चः कथञ्चिदपि सञ्चरणे समर्था
नार्थान् दधाति यदि दीधितिसद्विवेकः ।
श्रीसार्वभौमपरिकल्पितमर्थतत्त्वं
तत्त्वेन तर्हि सुधियः परिशीलयन्तु ॥

इति श्रीरामभद्रसार्वभौमकृतः पदार्थतत्त्वविवेचनप्रकाशः समाप्तः ॥

